ISSN No.:2278-0815

भास्करोदयः

संदर्भित ज्योतिष-शोधपत्रिका

Referred Research Journal of Jyotish

सप्तदशोऽङ्कः

सत्रम् 2019–20

सम्पादकः

प्रो.मदनमोहनपाठकः

आचार्योऽध्यक्षश्च (Professor & Head) ज्यौतिषविभागः

राष्ट्रियसंस्कृतसंस्थानम्, लखनऊ-परिसरः, विशालखण्डः-४, गोमतीनगरम्
लखनऊ - २२६०१० (उ०प्र०)

नवदेहलीस्थितस्य राष्ट्रियसंस्कृतसंस्थानस्य (मानित-विश्वविद्यालयस्य) अनुदानेन प्रकाशितः

भास्करोदयपत्रिकायाः प्रथमं लोकार्पणम् :-

लोकार्पणं कुर्वन्तः
केन्द्रीयसर्वकारस्य मानव-
संसाधनविकासमन्त्रालयेन
सञ्चालितस्य नवदेहलीस्थितस्य
राष्ट्रियसंस्कृतसंस्थानस्य
निदेशकाः
प्रो.वेम्पटिकुटुम्बशास्त्रिमहोदयाः

दिनाङ्कः- १८जनवरी २००१
स्थानम्- श्री.स.शि.के.सं.विद्यापीठम्, पुरी

भास्करोदयपत्रिकायाः अष्टम-अङ्कस्य लोकार्पणम् :-

लोकार्पणं कुर्वन्तः
नवदेहलीस्थितस्य
राष्ट्रियसंस्कृतसंस्थानस्य
शास्त्रसंवर्धकाः कुलपतयः
श्रीमन्तः प्रो.राधावल्लभत्रिपाठीमहोदयाः

पार्श्वे सन्ति गरलीपरिसरस्य
तत्कालीनप्र.प्राचार्याः
प्रो.के.बी.सुब्बरायुडुमहोदयाः

राष्ट्रपतिसम्मानिताः
आचार्याःरामचन्द्रपाण्डेयमहोदयाः

दिनाङ्कः- २६ फरवरी २०११
स्थानम्- रा.सं.संस्थानम्, गरली-परिसरः

भास्करोदयः

Referred Research Journal of Jyotish

सप्तदशोऽङ्कः- सत्रम्- २०१९ - २०

संरक्षकः-

प्रो.परमेश्वरनारायणशास्त्री

कुलपतिः, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

सम्पादकः

प्रो.मदनमोहनपाठकः

आचार्योऽध्यक्षश्च (Pofessor & Head) ज्यौतिषविभागः

राष्ट्रियसंस्कृतसंस्थानम्, लखनऊ - परिसरः, लखनऊ - २२६०१० (उ०प्र०)

सत्प्रेरकाः

डॉ.हरिहरझाः, (राष्ट्रपतिसम्मानितः) पूर्वप्राचार्यः, श्रीसदाशिवपरिसरः

प्रो.रमाकान्तशुक्लः, (राष्ट्रपतिसम्मानितः) आचार्योऽध्यक्षचरः, संस्कृत-विभागः D.U.

प्रो.रामचन्द्रपाण्डेयः(राष्ट्रपतिसम्मानितः) भू.पू.सङ्कायप्रमुखश्च, बी.एच.यू.

प्रो. अर्कनाथचौधरी, भू.पू.कुलपतिः, श्रीसोमनाथसंस्कृतविश्वविद्यालयः, गुजरात

प्रो.रामचन्द्रझाः- भू.पू.कुलपतिः, कामेश्वरसिंहसंस्कृतविश्वविद्यालयः, दरभङ्गा

प्रो.शिवाकान्तझाः,भू.पू. कुलपतिः, नालन्दामुक्तविश्वविद्यालयः पटना,

प्रो.सर्वनारायणझाः,कुलपतिः, कामेश्वरसिंहसंस्कृतविश्वविद्यालयः, दरभङ्गा

प्रो. सुरेन्द्रझाः, भू.पू. प्राचार्यः,राष्ट्रियसंस्कृतसंस्थानम्, लखनऊ-परिसरः,

प्रो.विजयकुमारजैनः, प्र.प्राचार्यः, राष्ट्रियसंस्कृतसंस्थानम्, लखनऊ-परिसरः,

प्रो.राधाकान्तठाकुरः, आचार्योऽध्यक्षः सङ्कायप्रमुखश्च,ज्यौ.विभागः, तिरुपतिः

प्रो.वासुदेवशर्मा, प्र.प्राचार्यः, राष्ट्रियसंस्कृतसंस्थानम्, श्रीरणवीर-परिसरः, जम्मू,

सम्पादनसहायकाः-

डॉ. शैलेशकुमारतिवारी, श्रीवेदप्रकाशपाठकः, श्रीआनन्दप्रकाशपाठकः,

प्रकाशकः-

सम्पादक-भास्करोदयः, ज्योतिर्विज्ञान-अनुसन्धान-केन्द्रम्

वेदानन्द-आश्रमः (www.vedanandashram.in) खरगापुर, नजदीक-महेशकम्पलेक्स,

गोमतीनगरविस्तारः, लखनऊ -२२६०१० (उ.प्र.)

(सर्वाधिकारः सम्पादकाधीनः)

लेखपर्यवेक्षक-मण्डलम्

प्रो.सर्वनारायणझाः,	प्रो.देवीप्रसादत्रिपाठी,	प्रो. ईश्वरभट,	डॉ. विजयकर्णः
कुलपतिः	कुलपतिः	परीक्षा-नियन्त्रकः	संस्कृतविभागाध्यक्षः
का.सिं.सं.वि.वि.	उत्तराखण्डसं.विश्वविद्यालयः	रा.सं.संस्थानम्	विद्यान्तहिन्दूपरास्नातक-
दरभंगा-विहार-८४६००४	हरिद्वारः- २४९४०२	नईदल्ली-५८	महाविद्यालयः लखनऊ-०९

प्रकाशक -
सम्पादकः, भास्करोदयः
ज्योतर्विज्ञान-अनुसन्धान-केन्द्रम्
वेदानन्द-आश्रम, खरगापुर, नजदीक- महेश काम्प्लेक्स
गोमतीनगरम् (विस्तार), लखनऊ-२२६०१० (उ.प्र.)

ISSN No:-2278-0815

संस्करणम् –
प्रथमसंस्करणम् – २०००-०१ (संस्कृतवर्षे)
सप्तदशसंस्करणम् - २०१९-२०

मुद्रकः
गणपति प्रिन्टर
२९-कन्हैयाकुँज विहार, बाराबिरवा, आलमबाग
लखनऊ - २२६०१० (उत्तर प्रदेशः)

(C) सम्पादकः

प्रो.मदनमोहनपाठकः
मोबा. ७००७७९७८१३, ९४५५४३७०६६
e-mail:- pathak_guruji@rediffmail.com
website:- www.vedanandashram.in

सम्पादकीयम्

महाप्रभोर्भगवतो जगन्नाथस्यानुकम्पया भास्करोदयस्यास्य सप्तदशमङ्कं भवतां शास्त्रानुरागगणिान्तत्रापि विशेषेण ज्योतषिशास्त्र-जिज्ञासूनां ज्योतषिविभागीयानुसन्दधित्सूनाञ्च कर-कमलयोः प्रदाय प्रसन्नतामनुभवामि। पत्रिकाया अस्याः प्रयोजनं ज्योतषिविभागीयच्छात्राणां लेखन-कलायाः विकासेन सह तेषु परम्परागतज्यौतषिशास्त्रस्य प्रचारः प्रसारश्च वर्तते । अनेन छात्रा उपकृतास्तु भवन्त्येव सहैव प्रसरति ज्योतषिशास्त्रस्य ज्योतिः गृहे-गृहे, जने-जने ।

अस्तु, इयं पत्रिकापि लेखकानां भाववाहिका विशेषेण देवभाषया ज्योतर्विज्ञानस्य ज्योति-प्रसारकि वर्तते। पत्रिकायाः अस्याः गुणात्मकं स्वरूपमभविर्धयितुं ते सर्वेऽपि वन्दनीया विद्वांसः प्रसङ्गेऽस्मिन् संस्मरणीयास्सन्ति येषां सर्ववधिं सहयोगं सम्प्राप्य भास्करोदयोऽयं संस्कृतमाध्यमेन परम्परागतज्यौतषि-जिज्ञासूनां सकलं मनोभिलषितं पूरयन्नस्ति। अस्मिन् सारस्वतयज्ञकर्मणि बहूनां महानुभावानां सर्वविधसहयोगो भवति अपेक्षितः। तेषु सर्वप्रथमं संस्मर्यन्ते राष्ट्रियसंस्कृतसंस्थानस्य कुलपतयः शास्त्रमूर्त्तयः प्रो.परमेश्वरनारायणशास्त्रिमहोदयाः येषां चिरकालादेव सततप्रोत्साहनेन, आशीःप्रदानेन च एतादृशः सारस्वतो यज्ञः सम्पन्नतां याति। अनन्तरं स्मर्यन्ते संस्थानमुख्यालयस्य कुलसचिवाः प्रो.एस्.सुब्रह्मण्यशर्ममहोदयाः, लखनऊपरिसरस्य प्र.प्राचार्याः प्रो.विजयकुमारजैनमहोदयाः, विभागीयाः सर्वेऽपि आचार्याः, सत्प्रेरकाः सुधयः, सहायक-सम्पादनसमितेः सदस्याः, परिसरस्य सर्वेऽपि प्रोत्साहकाः सहकर्मणिः येषां सर्वदा सोत्साहं सहयोगो मया प्राप्यते, तेषां समेषां कृते अहं साभारं कृतज्ञतां प्रकटयामि। एवमेव अत्र वन्दनीयाः लेखकाः, आयुष्मन्तश्छात्राश्च, विशेषेण धन्यवादार्हास्सन्ति । अतः सर्वेभ्यो धन्यवादराशीन् वितीर्य भगवते जगन्नाथाय, जगदम्बायै च प्रणामाञ्जलीन् विनिवेद्य विरमामि विस्तरादितिशम्।

विद्वच्चरणचञ्चरीको

शिवरात्रिः, संवत् २०७६ (मदनमोहनपाठकः)

२१ फरवरी २०२० शुक्रवासरः

भास्करोदयस्यानुक्रमणिका

क्र.सं. विषयः	नाम	पृष्ठसंख्या
शुभसम्मतयः		05 - 07
1. स्वरशास्त्रस्य वैशिष्ट्यम्	प्रो. मदनमोहनपाठकः	08 - 18
2. भावफलमीमांसा	डॉ. अरुणकुमारः	19 - 26
3. विदेशयात्रायोगविमर्शः	डॉ. विकासः	27 - 33
4. सामुद्रिकशास्त्रीयं सत्त्वविवेचनम्	उमाकान्ततिवारी	34 - 40
5. गोलपृष्ठफले भास्कराचार्यमतम्	डॉ. विजयानन्द अडिगः	41 - 47
6. सन्तानप्रतिबन्धकयोगविमर्शः	डॉ. दीपकुमारः	48 - 54
7. ज्योतिषरत्नमालायाः वैशिष्ट्यम्	आनन्दप्रकाशपाठकः	55 - 59
8. जन्माङ्गचक्रे राजभङ्गयोगानां समीक्षणम्	डॉ.शैलेशकुमारतिवारी	60 - 63
9. राजयोगविमर्शः	वेदप्रकाशपाठकः	64 - 67
10. जगति सूर्यप्रभावः	डॉ. रमेशशर्मा	68 - 73
11. मुहूर्तशास्त्रे गोधूलिलग्नविचारः	डॉ.वेदप्रकाशपाण्डेयः	74 - 78
12. वेदोक्तवास्तुविज्ञानम्	डॉ. चन्द्रश्रीपाण्डेयः	79 - 82
13. पाटीगणिते भास्कराचार्यस्य अवदानम्	हिमांशुझाः	83 - 90
14. ज्यौतिषरत्न-पं.गेनालाल-चातुर्धरिकस्य जीवनवृत्तम्	डॉ. वरुणकुमारझाः	91 - 98
15. लखनऊपरिसरीय-ज्योतिष-विभागस्य (2019-20 सत्रस्य) गतिविधयः-	प्रो.मदनमोहनपाठकः	99 - 103
16. संस्कृतसंरक्षणसम्वर्धनसम्बन्धि विभिन्नकार्यक्रमेषु सम्पादकस्यावदानम्	प्रो.मदनमोहनपाठकः	104

प्रो. रामचन्द्रझाः
कुलपतिः
कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालयः
कामेश्वरनगरम्, दरभङ्गा- ८४६००८
दूरभाषः- ०९४३००६३६४८
e-mail:-varunkjha@gmail.com

शुभाशंसनम्

२०००-०१ तः प्रकाशमानां नाम्नीमिमां ज्योतिषशोधपत्रिकां दृष्ट्वा नितरां प्रसीदति मे मनः । अत्र विदुषां गवेषकानां छात्राणाञ्च शास्त्रीया लेखा जिज्ञासूनां कृते समुपकाराय विलसन्ति ।

ज्ञानार्जने पत्रिकायाः महत्त्वपूर्णं स्थानं विद्यते सत्वष्वपि बहुविधेषु ज्ञानसाधनोपकरणेषु। भारतीयविद्यासु ज्योतिषशास्त्रस्य महत्त्वपूर्ण स्थानं विद्यते। सर्वविध-लौकिक-पारलौकिककार्य-सम्पादनाय मानवजीवनगत-शुभाशुभफल-ज्ञानाय च वेदस्य चक्षुरूपात्मकं शास्त्रमिदं परमोपयोगि विद्यते।

एवम्भूतं ज्यौतिषशास्त्रीयविषयमादायान्वर्थनाम्नी पत्रिकेयं भास्करवद् भासमाना जगतां कल्याणाय जायतां जानकीजानिकृपयेति शम् ।

- इत्याशास्ते
विदुषामनुचरो



स्थानम्- दरभङ्गा
दिनाङ्कः- ५/८/२०१३
विक्रमाब्दः२०७०
श्रावणकृष्ण-मासशिवरात्रिः
सोमवासरः

प्रो.विश्वमूर्त्तिशास्त्री
प्राचार्यः
राष्ट्रियसंस्कृतसंस्थानम्, गरली-परिसरः
गरली, काँगडा (हि.प्र.)
Mob:-94191-38606
E-mail:- profvmshastri@gmail.com

शुभाशंसनम्

भास्करोदयः

संस्कृतस्य प्रचाराय ज्यौतिषस्य विशेषतः।
यत्नः सर्वात्मना साध्यस्तदर्थं भास्करोदयः।।
महिमा भास्करस्यात्र सर्वैर्जेगीयते बुधैः।
समेषां मङ्गलं कुर्वन् भासतां भास्करोदयः।।
ज्योतिर्विदां शुभाशीर्भिर्देवानामनुकम्पया।
सर्वदा देवभाषायां राजतां भास्करोदयः।।
महत्त्वं ज्योतिषस्यात्र प्रस्तोतुं जगतीतले।
जातो हिमाचलाकाशे गरल्यां भास्करोदयः।।
हिताय सर्वलोकानां छात्राणाञ्च विशेषतः।
अस्मिन् परिसरे भायात् सर्वदा भास्करोदयः।।
यस्य प्रवर्त्तको विज्ञो मान्यो मदनमोहनः।
असौ सर्वमनःपद्मं मोदयेद् भास्करोदयः।।

- इत्याशास्ते
विदुषामनुचरो

श्रावणशुक्लपूर्णिमा,
संस्कृतदिवसः
विक्रमाब्दः२०६२
दि. 19/8/2005
शुक्रवासरः



प्रो.सर्वनारायणझाः
कुलपतिः
कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालयः
दरभङ्गा-८४६००८ (बिहार)
मोबा. - ८४४७९७५२१३
email:- snjha62@gmail.com

।। ॐ नमश्चण्डिकायै ।।

शुभाशंसनम्

दैवं फलति सर्वत्र न विद्या न च पौषम्। समुद्रमथनाल्लेभे हरिर्लक्ष्मीं हरो विषम्।।

अथ च - प्रतिकूलतामुपगते हि विधौ विफलत्वमेति बहुसाधनता।
अवलम्बनाय दिनभर्त्तुरभून्न पतिष्यतः करसहस्रमपि।।

किञ्च-
गुणोऽपि दोषतां याति वक्रीभूते विधातरि।
सानुकूले पुनस्तस्मिन् दोषोऽपि च गुणायते।

अपि च - भाग्यक्रमेण हि धनानि भवन्ति यान्ति ।

इत्थं यस्य दैवस्य एतावन्माहात्म्यं गायन्ति मनीषिणस्तस्य ज्ञानं येन शास्त्रेण भवति तच्छास्त्रं नाम ज्योतिषमिति वयं जानीमः। तज्ज्ञातुं त्रिस्कन्धज्योतिषशास्त्रस्याध्ययनमध्यापन- मन्वेषणमनिवार्यम्।

राष्ट्रियसंस्कृतसंस्थानस्य लखनऊ-परिसरस्य ज्योतिषविभागाध्यक्ष आचार्यः मदनमोहनपाठक अध्ययनाध्यापनलेखानुसन्धानेऽतितरामनुरक्तः सन् अनुसन्धित्सूनां छात्राणां हिताय भास्करोदयनाम्निं शोधपत्रिकामपि प्रकाशयतीति नितरां मोदते मे मनः। पत्रिकेयं सम्पादकश्च सुतरां त्विष्यादिति मे शुभाशंसा ।

प्रो.सर्वनारायणझाः

संवत् २०७४ महाशिवरात्रिः
दिनाङ्कः- १४/०२/२०१८
बुधवासरः

स्वरशास्त्रस्य वैशिष्ट्यम्

प्रो.मदनमोहनपाठकः
आचार्योऽध्यक्षश्च, ज्योतिषविभागे
राष्ट्रियसंस्कृतसंसथानम्, लखनऊ-परिसरः
e-mail:- profmmpathak@gmail.com

ज्योतिषशास्त्रं शुभाशुभफलद्योतकं शास्त्रमस्तीत्यत्र नास्ति काचित् संशीतिलेशः। अस्य ज्योतिषशास्त्रस्यापरं नाम कालविधानशास्त्रम्। ज्योतिषशास्त्रस्यास्य कथं कालविधायकत्वमित्यस्मिन् विषये उक्तं यथा श्रीमता भास्कराचार्येण[1]—

वेदास्तावाद्यज्ञकर्मप्रवृता यज्ञाः प्रोक्तास्ते तु कालाश्रयेण
शास्त्रादस्मात् कालबोधो यतः स्याद्वेदाङ्गत्वं ज्यौतिषस्योक्तमस्मात्।।

अर्थात् वेदाः यज्ञार्थं प्रवृत्ताः। यज्ञस्तु सुकाले कृतमेव सफलं याति। अत्र केवलमीश्वराराधनारूपमेव यज्ञं यज्ञत्वेन नैव स्वीकर्तव्यमपितु सकलं मानवव्यवहारोपयोगिनं सत्कर्म सवर्मपि यज्ञरूपमेवाङ्गीकर्तव्यम्। तानि सर्वाण्यपि शुभाशुभकर्माणि कालाश्रितानि सन्ति। यतः सुकाले अथवा समुचिते काले कृतमेव कर्म फलति, अकाले अनुचिते वा काले कृतं कर्म विफलं भवति। यतः उपयुक्तानुपयुक्तकालयोर्विवेचनं ज्योतिषशास्त्रेणैव सञ्जायते। अतः ज्योतिषशास्त्रस्य कालविधायकत्वमेवञ्च वेदाङ्गत्वमपि[2] स्वतः एव सिद्धं भवति। ज्योतिषशास्त्रमिदं वेदाङ्गशास्त्रेषु चक्षुःस्थानीयं[3] शास्त्रं विद्यते।

महर्षिलगधाचार्येण ज्योतिषशास्त्रमिदं वेदाङ्गशास्त्रेषु मूर्ध्निसंस्थितं[4] शास्त्रमस्तीत्यप्वोचत्। कथं कालशास्त्रमिदं वेदाङ्गशास्त्रेषु मूर्ध्निसंस्थितं शास्त्रमुच्यते? विषयेऽस्मिन् किञ्चिदुच्यते- यतः शास्त्रमिदं जीवनयात्रायां सफलमन्त्रीवत् मन्त्रणां प्रदाय, जीवनस्य भविष्यत्काले शुभाशुभस्य उपयुक्तानुपयुक्तस्य कालस्य प्रकृतिं संसूच्य आपत्सु परिरक्षणं करोति। अर्थार्जने शास्त्रमिदं साहाय्यं करोत्येव[5]। मानवस्य जीवनयात्राप्रसङ्गे आगतासु विभिन्नासु आपत्सु विभिन्न-रत्न-यन्त्र-मन्त्रौषधबलैः सर्वथा परिरक्षणं करोति। इत्थं शास्त्रमिदं महन्महनीयं सर्वलोकोपकरकं नितान्तं विज्ञानसम्मतमस्तीत्यत्र नास्ति काचित् विप्रतिपत्तिः। एवं भूतस्य शास्त्रस्य सिद्धान्त-संहिता-होरा-प्रभेदैः त्रिस्कन्धत्वं[6], प्रश्नं शकुनञ्च स्वीकृत्य

1. सिद्धान्तशिरोमणिः मध्यमाधिकारः कालमानाध्यायः श्लो.सं. 9
2. छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते। ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते।।
शिक्षा घ्राणन्तु वेदस्य मुखं व्याकरणं स्मृतम्। तस्मात्साङ्गमधीत्येव ब्रह्मलोको महीयते।। पाणिनीयशिक्षा.श्लो..४१/४२
3. सूर्यं नत्वा ग्रहपतिं जगदुत्पत्तिकारणम्। वक्ष्यामि वेदनयनं यथा ब्रह्ममुखाच्छ्रुतम्।। बृहत्पाराशरहोराशास्त्रम् १/८
4. यथा शिखा मयूराणां नागानां मणयो यथा। तद्वद्वेदाङ्गशास्त्राणां ज्योतिषं मूर्ध्नि संस्थितम्।। वेदाङ्गज्योतिषम्-
5. अर्थार्जने सहायः पुरुषाणामापदार्णवे पोतः। यात्रा समये मन्त्री जातकमपहाय नास्त्यपरः।। सारावली-२/१
6.सिद्धान्दसंहिताहोरारूपं स्कन्धत्रयात्मकम्। वेदस्य निर्मलं चक्षुः ज्योतिः शास्त्रमकल्पम्।। नारदसंहिता. पृ.सं.१

स्कन्धपञ्चकं[7], जातक-गोल-निमित्त-प्रश्न-मुहूर्त-गणितमिति आहत्य षडङ्गत्वं[8] स्वीकुर्वन्ति सर्वेऽपि ज्योतिषशास्त्राचार्याः। तद्यथा[9]-

जातकगोलनिमित्तप्रश्नमुहूर्ताख्यगणितनामानि।
अभिदधतीह षडङ्गान्याचार्या ज्यौतिषे महाशास्त्रे ।।

अत्र प्रश्नमार्गस्य लेखकस्यानुसारं एषां जातक-गोल-निमित्त-प्रश्न-मुहूर्त-गणितमिति षडङ्गानां सिद्धान्त-संहिता-होरादि-त्रिस्कन्धेष्वेव अन्तर्भावः प्रतिपादितः। तद्यथा[10]-

गोलो गणितञ्चेति द्वितयं खलु गणितसंहिते स्कन्धे ।
होरासंहितयोरपि निमित्तमन्यत्रयञ्च होराख्ये ।।

यद्यपि एवं भूतस्य विशिष्टस्य ज्योतिषशास्त्रस्य सन्ति अनेके प्रभेदाः। यथोक्तं ज्योतिषशास्त्रमेकभेदविषयं[11] --- इति ।एतेषु प्रभेदेषु यद्यपि सन्ति सर्वे महन्महत्त्वाधायकाः प्रभेदास्तथापि स्वरशास्त्रस्य महनीयता श्रेष्ठतरा एव विद्यते। यतः राज्ञां रत्नपञ्चकेषु अस्य स्वरज्ञस्य अन्यतमं स्थानं विद्यते। स्वरशास्त्रं यः वेत्ति स एव स्वरज्ञः भवति। रत्नपञ्चकेषु स्वरज्ञस्य प्रथमं स्थनं विद्यते। तद्यथा[12]-

स्वरज्ञः शकुनज्ञश्च दैवज्ञो रत्नपारगः।
केरलीवित्तथा राज्ञां कीर्त्तितं रत्नपञ्चकम्।।

अर्थात् स्वरज्ञः, शकुनज्ञः, दैवज्ञः, रत्नपारगस्तथा केरलीवित् राज्ञां रत्नपञ्चकेषु परिगणिताः भवन्ति। अत्र स्वरज्ञः नाम स्वरशास्त्रस्य ज्ञाता। यस्मिन् शास्त्रे स्वरचक्रं-चक्रं-भूबलं-बलं-ज्यौतिषं-शकुनञ्चेति यस्मिन् शास्त्रे विचार्यन्ते तच्छास्त्रं स्वरशास्त्रमुच्यते । तद्यथा[13]-

स्वरचक्राणि चक्राणि भूबलानि बलानि च ।
ज्यौतिषं शकुनञ्चैव षडङ्गानि वदाम्यहम् ।।

यतः स्वरशास्त्रे विंशतिः स्वरचक्राणि, चतुरशीतिः चक्राणि, चतुरशीतिर्भूबलानि, बलं नाम यन्त्र-मन्त्र-ओषधबलम्, (इत्यस्य चर्चा स्वरशास्त्रे विशेषेण कृता विद्यते)ज्योतिषं नाम समग्रं होराशास्त्रं स्वरशास्त्रे सम्यक्तया प्रतिपादितं विद्यते। प्रसङ्गादत्र स्वरशास्त्रोक्तानि विंशतिः स्वरचक्राणि, चतुरशीतिः चक्राणि, चतुरशीतिर्भूबलानि, बलं नाम यन्त्र-मन्त्र-ओषधबलम्, ज्योतिषं शकुनञ्चेति यथाक्रमेणोच्यते। एषां यामलोक्तानि विंशतिः स्वरचक्राणां नामानि यथाक्रमेणोच्यते।

7.भारतीय ज्योतिष. पृष्ठ.संख्या.२, डा.नेमिचन्द्रशास्त्री

8. स्वरचक्राणि चक्राणि भूबलानि बलानि च। ज्यौतिषं शकुनञ्चैव षडङ्गानि वदाम्यहम् ।। नरपतिजयर्चया स्वरोदयः १/१६

9. प्रश्नमार्गः-१/१०

10. प्रश्नमार्गः-१/७

11. बृहत्संहिता.१/

12. नरपतिजयर्चया.स्वरोदयः१/१५

13. नरपतिजयचर्या स्वरोदये 1/16

तत्रादौ विंशतिः स्वरचक्राणि[14]-

यामलेषु च सर्वेषु यान्युक्तानि स्वरोदये। विंशतिः स्वरचक्राणि वक्ष्येऽहं तानि चाधुना ॥
मात्रा वर्णो ग्रहोजीवो राशिर्भं पिण्डयोगकौ । द्वादशाब्दं तथाब्दं च अब्दार्धमृतुमासिकम् ॥
पक्षाहर्नाडिकं चक्रं तिथिवारर्क्षयोगकम्। दिशि तत्त्वावधानञ्च दिनफलञ्च वदाम्यहम् ॥

अर्थात् यामलोक्तानि विंशतिः स्वरचक्राणि इमानि सन्ति। १. मात्रास्वरचक्रम्, २.वर्णस्वरचक्रम्, ३. ग्रहस्वरचक्रम्, ४. जीवस्वरचक्रम्, ५. राशिस्वरचक्रम्, ६. नक्षत्रस्वरचक्रम्, ७. पिण्डस्वरचक्रम्, ८. योग स्वरचक्रम्, ९. द्वादशवार्षिक- स्वरचक्रम्, १०. वार्षिकस्वरचक्रम्, ११. अयनस्वरचक्रम्, १२. ऋतुस्वरचक्रम्, १३. मासस्वरचक्रम्, १४. पक्षस्वरचक्रम्, १५. दिनस्वरचक्रम्, १६. नाडिकास्वरचक्रम्,, १७. तिथिस्वरचक्रम्, १८. वारस्वरचक्रम्, १९. नक्षत्रस्वरचक्रम्, २०. योगस्वरचक्रञ्चेति।

स्वरशास्त्रानुसारेण फलादेशकथने इमानि स्वरचक्राणि महन्महत्वाधायकानि सन्ति। इदानीं छात्राणामुपकाराय ऊपर्युक्तानां स्वराणां विषये क्रमशः अग्रे संक्षेपेण किञ्चिद् विहङ्गावलोकनं विधाष्यते।

1. **मात्रास्वरचक्रम्**:- अकारादितः अः पर्यन्तं अ आ इ ई उ ऊ ऋ ॠ लृ ॡ ए ऐ ओ औ अं अः षोडशस्वराः मातृकायां प्रोक्ताः विद्यन्ते। एषु अं अः इति द्वावन्तिमौ त्याज्यौ, चत्वारश्च (ऋ ऋ लृ ॡ) नपुंसकावपि त्याज्यौ। शेषेषु दशस्वरेषु ह्रस्व-दीर्घप्रभेदं विना पञ्चस्वराः एवावशिष्टाः। एते अवशिष्टाः **अ इ उ ए ओ** इति पञ्चस्वराः ब्रह्माद्याः पञ्चदेवतारूपाः, निवृत्त्याद्याः पञ्च कलारूपा, इच्छाद्याः शक्तिपञ्चकरूपाः, मायादि(चतुरस्र-अर्धचन्द्र-त्रिकोण-द्वित्रिकोण-वर्त्तुलेति) चक्रपञ्चकरूपा, धरादि-(क्षिति-जल-पावक-गगन-समीर)पञ्चमहाभूतरूपा,शब्दादि(शब्द-स्पर्श-रूप-रस-गन्धेति) विषय-पञ्चकरूपा, शोषणादि (शोषणा-मोहन-दीपन-सन्तापन-प्रमथनेति)पञ्चकामबाणरूपा, पिण्डादि (पिण्ड-पद-रूप-रूपातीत-निरञ्जनेति) पञ्च संज्ञारूपा, एवञ्च बालादि (बाल-कुमार-युवा-वृद्ध-मृतेति) पञ्चावस्था रूपेण ख्याताः सन्ति। मात्रास्वरविचारप्रसङ्गे यस्य जनस्य नाम्नः आदिमे या मात्रा सा मात्रा यस्य स्वरस्यो भागे भवति सः स्वरः एव तस्य जनस्य मात्रास्वरो भवति। यथा अनिलनामकस्य जनस्य आदिमः वर्णः अकारः। अत्र आदिमे वर्णे अकारः। अस्मिन् अकारे अ एव मात्रा वर्तते। अतः अनिलनामकस्य मात्रास्वरः अकारः। पुरुषोत्तमस्य मात्रास्वरः उकारः, वेदप्रकाशस्य मात्रास्वरः एकारः इत्थमन्येषामपि अवगन्तव्यः। तद्यथा-[15]

अथातः सम्प्रवक्ष्यामि ख्याताये ब्रह्मयामले। मात्रादिभेदभिन्नानां स्वराणां षोडशोदयान् ॥१॥
मातृकायां पुरा प्रोक्ताः स्वराः षोडशसंख्यया। अ आ इ ई उ ऊ ऋ ॠ ल लू ए ऐ ओ औ अं अः।
तेषां द्वावन्तिमौ (अं अः) त्याज्यौ चत्वारश्च (ऋ ॠ ल ल) नपुंसकौ ॥२॥
शेषा दश स्वरास्तेषु स्यादेकैको द्विके द्विके। ज्ञेयास्तत्र स्वरा आद्या हस्वाः(अ इ उ ए ओ)पश्च स्वरोदये॥३॥
लाभालाभं सुखं दुःखं जीवितं मरणं तथा । जयः पराजयश्चेति सर्व ज्ञेयं स्वरोदये ॥४॥

14. नरपतिजयचर्या स्वरोदये १/१७-१९
15. नरपतिजयचर्या स्वरोदये २/१-६

स्वरादिमात्रिकोच्चारो मातृव्याप्तं जगत्-त्रयम्। तस्मात्स्वरोद्भवं सर्वं त्रैलोक्यं सचराचरम् ॥५
अकारायाः स्वराः पञ्च ब्रह्माद्याः पञ्चदेवताः। निवृत्त्याद्याः कलाः पञ्च इच्छाद्याः शक्तिपञ्चकम् ॥६

2.वर्णस्वरचक्रम्- बाल-कुमार-युवा-वृद्ध-मृतावस्थाः अकारादि (अ-इ-उ-ए-ओ) पञ्चस्वर- रूपाः सन्ति। पञ्च प्रकोष्ठेषु एतान् संस्थाप्य तदधो भागे ङ-ञ-ण-वर्णान् विहाय कादिहान्तं सर्वान् व्यञ्जनवर्णान् क्रमेण लिखेत्। यस्य जनस्य नामादिमो वर्णः यस्मिन् प्रकोष्ठे पतति तस्य जनस्य स एव स्वरः अर्थात् वर्णस्वरो भवति। तद्यथा[16]-

नाम्निवर्णस्वात् संख्या संख्या मात्रा स्वारात्तथा।
पिण्डे शरहृते शेषे पिण्डस्वर इहोच्यते।।

यथा अनिल नामकस्य जनस्य वणर्स्वरः **अ**कारः, देवदत्तस्य **ओ** स्वरः, कृष्णकान्तनामकस्य **अ**स्वरः, इत्थमग्रेऽपि एवमेव ज्ञातव्यः।

3. ग्रहस्वरचक्रम्-ग्रहस्वरचक्रस्य निर्माणप्रसङ्गे अकारादि पञ्चस्वराणामधो भागे राशीनां स्थापना कर्तव्या। यथा अस्वरस्याधो भागे मेष-सिंह-वृश्चिकराशीनां स्थापना कर्तव्या। इस्वरस्याधो भागे कन्या-युग्म-कर्कटराशीनां स्थापना कर्त्तव्या। उस्वरस्याधो भागे धनुर्मीनराश्योः स्थापना, एकारस्वरस्याधो भागे तुला-वृषयोः स्थापना कर्तव्या। ओकारस्वरस्याधो भागे मृगकुम्भयोः स्थापना कर्त्तव्येति। तत्तद् राशीनामधो भागे तदधीपानां स्थापनाऽपि कर्तव्या। तद्यथा[17]-

अस्वरो मेषसिंहालि इः कन्यायुग्मकर्कटाः।
उकारस्य धनुर्मीनावेस्वरस्य तुलावृषौ।।
ओकारे मृग-कुम्भौ च राशीशाश्च ग्रहास्वराः।
स्वराधः स्थापयेत् खेटान् राशेर्यो यस्य नायकः।।

अत्र विचारितस्य जनस्य यो राशिः तदधिपो ग्रहस्तस्य जनस्य ग्रहस्वरः। यथा अनिलनामकस्य जनस्य मेषराशिः। मेषस्याधिपतिः भौमः अस्वरस्याधो स्थितो विद्यते। अतः अनिलनामकस्य जनस्य ग्रहस्वरः अकारः। आनन्दप्रकाशनामकस्य जनस्यापि अकारादितः नामाद्यक्षरत्वात् मेषराशिः। अस्याधिपोऽपि भौमः। भौमस्य स्थितिरपि अस्वरान्तर्गतावेव वर्तते। अतः आनन्दप्रकाशनामकस्य जनस्यापि ग्रहस्वरः अकारः। इत्थमग्रेऽपि अवगन्तव्यम्।

4. जीवस्वरचक्रम्- जीवस्वरचक्रस्य निर्माणं किञ्चिद् भिन्नतया भवति। यथा षोडशाक्षरोऽवर्गः अकारादि षोडशस्वराः, ककारादि पकारपर्यन्तं प्रत्येकस्मिन् वर्गे पञ्च-पञ्च संख्या, यवर्ग-शवर्गयोः कृते पृथक्-पृथक् एकैकस्य वर्गस्य चतस्रः चतस्रः संख्याः दीयन्ते। इत्थं प्रत्येकस्य वर्णस्य कृते पृथक्-पृथक् संख्यां प्रदाय क्रमशः प्रत्येकस्मिन् प्रकोष्ठे स्थाप्यते तदा जीवस्वरस्य निर्माणं भवति। तद्यथा[18]-

16. नरपतिजयचर्या स्वरोदये २/१२
17. नरपतिजयचर्या स्वरोदये २/१५-१६
18. नरपतिजयचर्या स्वरोदये २/१८-१९

षोडशाक्षरोऽवर्गः स्यात्कादिवर्णास्तु पञ्चकम्।
चतुर्वर्गौ यशौ वर्गौ संख्या वर्गेषु कीर्त्तिताः।
नाम्निवर्णस्वारा ग्राह्या वर्गाणां वर्णसंख्यया।
पिण्डिताः पञ्चभिर्भक्ताः शेषं जीवस्वरं विदुः।।

अत्रोदाहरणम्- अनिलनामकस्य जातकस्य जीवस्वरज्ञानप्रसङ्गे गणना क्रियते। यथा- अनिल इत्यस्मिन् शब्दे अ + न् + इ + ल् + अ वर्णाः विद्यन्ते। तेषां संख्या 1 + 5 + 3 + 4 + 1 = 14 संख्या जाता। पञ्चभिः विभाजिते सति लब्धिः 2 संख्या। शेषस्थनीया संख्या 4 आगता। अनेन ए जीवस्वरः एकारः। देवदत्तस्य द् + ए + व् + अ + द् + द् + त् + त् + अ । अर्थात् तेषां संख्या परस्परं योज्यते तदा 4+1+1+4+1 + 4 + 4 +1 +1 +1 = 23 संख्या आगता। पुनः इयं 23 संख्या पञ्चभि विभाजिते सति लब्धिः 4 संख्यां विहाय शेषस्थानीया 3 संख्या स्वीक्रियते । अतः देवदत्तस्य जीवस्वरः उकारः।

5. राशिस्वरचक्रम्- राशिस्वरचक्रनिर्माणप्रसङ्गे अकारादि पञ्चस्वाराणामधो भागे मेषादिराशीनामुल्लेखः कर्त्तव्यः। तत्प्रकारः उच्यते। अस्वरस्याधो भागे मेषराशेः नव नवांशाः, वृषराशेः नव नवांशाः मिथुनस्य षण्णवांशाः स्थाप्यते। इस्वरस्याधो भागे मिथुनस्य अवशिष्टस्त्रयः नवांशाः, एवं सकलनवांशसहितयोः कर्क-सिंहयोः स्थापना, उस्वरस्याधो भागे कन्या-तुलयोः एवं वृश्चिकस्य त्रयः नवांशाः, एस्वरस्य अधो भागे अवशिष्टाः षण्णवांशाः. धन्विनः सकलः अर्थात् नव नवांशाः, मकरस्य आदिमः षण्णवांशाः, ओस्वरस्य अधो भागे मकरस्य अवशिष्टः त्रयः नवांशाः, कुम्भ-मीनयोः सकलनवांशाः स्थाप्यते। तद्यथा-[19]

मेषवृषावकारे च मिथुनाद्याः षडंशकाः।
मिथुनांशत्रयं चैवमिकारे सिंहकर्कटौ।।
कन्या तुला उकारे च वृश्चिकाद्यास्त्रयोंऽशकाः।
एकारे वृश्चिकान्त्यांशाश्चापाः षट् च मृगादिमाः।।
अंशास्त्रयो मृगस्यान्त्याः कुम्भमीनौ तथौस्वरौ।
एवं राशिस्वराः प्रोक्ताः नवांशैकक्रमोदयाः।।

प्रत्येकस्मिन् राशौ नव नवांशाः भवन्ति। जनस्य राशिनिर्धारणार्थमपि नव अक्षराणि भवन्ति। यथा मेषराशौ चु चे चो ला अश्विनी, लि लु ले लो भरणी, अ इ उ ए कृतिका इत्यत्र प्रथमचरणम् केवलम् अकारमेव स्वीकृत्य नवाक्षराणां मेषराशिः भवति। एवमेव कृतिकानक्षत्रस्य त्रयः (इ उ ए) चरणाः रोहिण्याः ओ वा वि वु, मृगशिरायाः बे बो का कि इति चतुर्षु चरणेषु केवलमादिमं चरणद्वयमेव बे बो स्वीकृत्य वृषराशिः भवति। तथैव मृगशिरायाः चरणद्वयं क कि, आर्द्रायाः (कु घ ङ छ) चरणचतुष्टयं तथा पुनर्वसुनक्षत्रस्य के को हा इति चरणत्रयाक्षरं स्वीकृत्य मिथुनराशिः भवति। अत्र राशिस्वरनिर्माणप्रसङ्गे अस्वरस्याधो भागे मेषराशेः चु चे चो ला, लि लु ले लो, अ वर्णाः, वृषराशेः इ उ ए ओ, ओ बा बि बु, बे बो

19. नरपतिजयचर्या स्वरोदये २/२०-२२

तथा मिथुनराशेः का कि कु घ ङ छ के को हा इत्यक्षरेषु (नव चरणेषु/ नव नवांशेषु वा) केवलं आदितः षण्णवांशाः/ षडक्षराणि स्वीकृत्य अस्वरो भवति। अस्वरस्याधो यावन्तः वर्णाः सन्ति तदाधारीकृत्य यस्य जनस्य नाम भवति तस्य अस्वरो भवति। इत्थमग्रेऽपि अवगन्तव्यम्।

6. नक्षत्रस्वरचक्रम् - नक्षत्रस्वरविचारप्रसङ्गे अकाराद्याः पञ्चस्वराः स्थाप्याः। तत्र **अस्वाराधो** भागे रेवती-अश्विनी-भरणी-कृतिका-रोहिणी-मृगशिरा-आर्द्रेति सप्तनक्षत्राणि स्थाप्यानि। तद्वदेव **इस्वरस्याधो** भागे पुनर्वसुनक्षत्रं समारभ्य पू.फा. नक्षत्रं यावत् पञ्चनक्षत्राणि स्थाप्यानि। इत्थं उ.फा. तः क्रमशः विशाखान्तं यावत् पञ्चनक्षत्राणि **उस्वरस्य** अधो भागे, **एकारस्याधो** भागे अनुराधातः अग्रे उ.षा. नक्षत्रं यावत् पञ्चनक्षत्राणि, **ओकार**स्वरस्याधो भागे श्रवणा तः उत्तराभाद्रपदानक्षत्रपर्यन्तं नक्षत्राणां स्थापना कर्त्तव्या। यस्य जनस्य यन्नक्षत्रं भवति तन्नक्षत्रं यस्य स्वरस्याधो भागे भवेत् तदेव स्वरः तस्य जनस्य भवति। तद्यथा-[20]

अकारे सप्त ऋक्षाणि रेवत्यादिक्रमेण च ।
पञ्च पञ्च इकारादावेवमृक्षस्वरोदयः।।

यथा अनिलनामकस्य अ इ उ ए इत्यनेन कृतिकानक्षत्रं वर्तते। कृतिकानक्षत्रं अस्वरस्याधो भागे अवस्थितत्वात् अनिलनामकस्य जनस्य नक्षत्रस्वरः अकारः। इत्थं पुरुषोत्तमनामकस्य जनस्य पु ष ण ट हस्त इत्यनेन हस्तनक्षत्रं वर्तते। हस्तनक्षत्रस्य उस्वरस्याधो अवस्थितत्वात् पुरुषोत्तमनामकस्य जनस्य नक्षत्रस्वरः उकारः । इत्थमग्रेऽपि अवगन्तव्यम्।

7. पिण्डस्वरचक्रम्-पिण्डस्वरविचारप्रसङ्गे नाम्नि वर्णस्वारात् मात्रास्वाराच्च संख्यां विलिख्य नामवर्णाद् जीवस्वरवशात् या संख्या सा पृथक्-पृथक् स्थापनीया। सर्वा संख्या एकीकृत्य (पिण्डीकृत्य) पञ्चभिः हृते शेषे पिण्डस्वरो जायते। तद्यथा[21]-

नाम्नि वर्णस्वरात्संख्या संख्या मात्रास्वरात्तथा।
पिण्डे शरहृते शेषे पिण्डस्वर इहोच्यते।।

यथा देवदत्तस्य द् 5 ए 4 व् 1 अ1 द्5 अ1 त3 त3 अ1, समेषामपि ऐक्यं 24 संख्या भवति। पञ्चभिः विभाजिते सति शेषस्थाने चतस्रः संख्या आयाति। अनेन देवदत्तस्य एकारस्वरः। इत्थं अनिलनामकस्य जनस्य अ1 न्2 इ2 ल्5 अ1 आहत्य 11 संख्या आगता। पञ्चभिः विभाजिते शेषस्थाने एकसंख्या आगता। तेन अनिलनामकस्य्य जनस्य पिण्डस्वरः अकारः सिद्धः।

8. **योगस्वरचक्रम्**- इतः पूर्वं विवेचितस्वराणामनुसारेण समागतानां स्वराणां संख्यां यदा एकीकृत्य पञ्चभिः विभाज्यते तदा शेषस्थानीया संख्या योगस्वरं सूचयति। तद्यथा[22]-

मात्रादिस्वरभेदेन स्वरानुत्पाद्य नामतः।
योगे शरहृते शेषे योगस्वर इहोच्यते।।

20. नरपतिजयचर्या स्वरोदये २/२३
21. नरपतिजयचर्या स्वरोदये २/२४
22. नरपतिजयचर्या स्वरोदये २/२५

९. द्वादशवार्षिकस्वरचक्रम्, १०. वार्षिकस्वरचक्रम्, ११. अयनस्वरचक्रम्, १२. ऋतुस्वरचक्रम्, १३. मासस्वरचक्रम्, १४. पक्षस्वरचक्रम्, १५. दिनस्वरचक्रम्, १६. नाडिकास्वरचक्रम्,, १७. तिथिस्वरचक्रम्, १८. वारस्वरचक्रम्, १९. नक्षत्रस्वरचक्रम्, २०. योगस्वरचक्रञ्चेति।

अथ चतुरशीतिस्वरचक्राणि[23] -

एकाशीतिपदं चक्रं शतपदं नवांशकम् । छत्रं सिंहासनं चक्रं कूर्मं पञ्चविधं त्विदम् ॥
भूदेशनगरक्षेत्र गृहकर्म च पञ्चमम् । पद्मचक्रं फणीशाख्यं राहुकालानल मतम् ॥
सूर्यकालानलं चक्र चन्द्रकालानलं तथा। घोरकालानलं चक्रं शूलकालानलं मतम् ॥
शशिसूर्यसमायोगे चक्रं कालानलं मतम् । संघ सप्तमं ज्ञेयं सप्तकालानलानि च ।।
तिथिर्वारं च नक्षत्रं त्रिधा चव कुलाकुलम् । कुम्भचक्रं द्विधा प्रोक्तं राशिनक्षत्रसम्भवम् ॥
वर्गप्रस्तारवेधं च त्रिधा तुंबुरुमेव च। भूचरं खेचरं पान्थं नाडीचक्रं द्विधा मतम् ॥
कालचक्रं फणिद्वंदं सूर्याख्यं चन्द्रजं तथा। कविचक्र द्विधा प्रोक्तं स्थानस्वाम्यक्षपूर्वकम् ॥
खलकाख्यं द्विधा प्रोक्तं कृत्तिकास्थानभादिकम् । कोटचक्राष्टकं प्रोक्तं चतुरस्रादिभेदतः ॥
गजमश्वं रथं व्यूह कुन्तं खङ्गं छुरि धनुः । सौरि सेवां नरं डिभं पक्षिवर्गायवर्षणम् ॥
सप्तरेखोद्भवं चक्रं पञ्चरेखेंदुभास्करम् । त्रिविधं मातृकाचक्र विज्ञेयं श्येनतोरणे ॥
अहिलांगलबीजोप्तिवृषाख्यं सप्तनाडिकम्। चक्रं सांवत्सरस्थानं मासं चक्रं दिनाह्वयम् ॥

एतानि चतुरशीति चक्रनामानि सन्ति, यानि फलादेशकथने महन्महत्वाधायकानि भवन्ति। स्वरशास्त्रान्तर्गतेषु समेषु ग्रन्थेषु एतेषां समेषां विषयानां साङ्गोपाङ्गवर्णनं दृश्यते।

अथ भूबलानि[24]-

अथातः सम्प्रवक्ष्यामि भूबलान्यभिधानतः । कविद्वन्द्वे तथा दुर्गे चतुरङ्गे महाहवे ॥
स्वरोदयश्च चक्रश्च शत्रुर्यत्र समोऽधिकः । तत्र युद्ध बलं देयं भूबलैर्विजयार्थिनाम् ॥
तेषां नामान्यहं वक्ष्ये ख्याता ये ब्रह्मयामले। चतुरशीतिसंख्यानां यहलेन जयी रणे ॥
औड्री जालन्धरी पूर्णा कामा कोलैकवीरिका। शिलीन्ध्राश्च महामारी क्षेत्रपाली च वंशजा ॥
रुद्रकालानली प्रोक्ता कालरेखा निरामया। जयलक्ष्मीमहालक्ष्मीर्जया विजयभैरवी ॥
बाला योगेश्वरी चंडी माया मुंभुककर्तरी । शार्दूली सिंहिली तन्वी महामाया महेश्वरी ॥
देवकोटिः शिवा शक्ति नामाला वराटिका । त्रिमुण्डा मत्सरीधर्मा मृत शिष्टाक्षयाक्षया ॥

अथ यन्त्रमन्त्रौषधबलम्[25]-

शत्रोः समाधिके नाम्नि स्वरैश्चक्रश्च भूबलैः। स्थानसैन्याधिके शत्रौ बलविज्ञानसंयुते ॥
अभङ्गे चाप्यभेदे च असाध्ये दुर्जये रिपौ । जयोपायमहं वक्ष्ये मन्त्रयन्त्रादिकं बलम् ॥
रणाभिषेचनं दीक्षां रणार्चा रणकङ्कणम् । वीरपट्ट रणे पट्टे जयपदृस्य बंधनम् ॥

23. नरपतिजयचर्या स्वरोदये १/२१-३१
24. नरपतिजयचर्या स्वरोदये १/३६-४४
25. नरपतिजयचर्या स्वरोदये १/४८-५२

मेखलाकवचन्यासं मुद्रा रक्षा च कञ्चुकम् । औषधं तिलकं तजा घुटिकाश्च कपर्दिका ॥
योगे घटितशस्त्राणि शस्त्ररक्षां च मोटनम् । शस्त्रलेपाश्च विविधा बाणानां पिच्छबन्धनम् ॥
त्रासकं काहला ढक्का मुरजं भस्मसाधनम् । मारणं मोहनं स्तम्भं विद्वषोचाटनं वशम् ॥
पताका पिच्छकं यन्त्रं परविद्याविनाशनम् । शान्तिकंनिजसैन्यस्य कर्त्तव्यं जयकांक्षिभिः ॥
बलान्येतानि यो ज्ञात्वा सङ्ग्रमं कुरुते नरः । असाध्यस्तस्य नैवास्ति शक्रतुल्योऽपि भूपतिः ॥
अथ ज्यौतिषाङ्गम्[26]-
गणितं व्यवहारं च होराज्ञानं परिस्फुटम् । त्रिस्कन्धं ज्योतिषं वक्ष्ये जयचर्यास्वरोदये ॥
ग्रहतिथ्याद्यानयनमुदयास्तौ च शीघ्रगौ। शत्रुमित्रसमाः खेटा राश्यधीश बलाबलम् ।।
उच्च नोचाश्च मध्यस्था दृष्टिस्थानानि यान्यपि । गोचरं च तथा वेधं दशास्वन्तर्दशा पुनः ॥
वारफलं तथा सन्धिर्लत्तावेधमुपग्रहम् । शुभाशुभफलं वक्ष्ये तिथिधिष्ण्यगुणागुणम् ॥
चन्द्रतारावलं ज्ञेयं भद्रां चैव त्रिपुष्करम् । यमघण्टं यमदंष्ट्र चक्रं चैवागलं तथा ॥
देवरक्षोनृणां भानि पार्बोधिोमुखानि च । बालं कुमारं तरुणं वृद्धमृत्युस्वरास्तथा ॥
कालवेलां तथा होरां यामार्धं कुलिकं तथा । वक्ष्ये वेधं च सिद्धं च शीघ्रं प्राणापहारिणीम् ॥
परिघं शूलधिष्ण्यं च वारयोगं च योगिनीम् । दिग्भद्रा कालपाशं च राहोरस्तं च भार्गवम् ॥
छायोत्पत्ति त्रिधा वक्ष्ये त्रिषु मध्ये दिनाष्टगाम् ।। दिनमानं दिने भुक्तिं छायोदयप्रमाणकम् ॥
सिद्धच्छायात्रिषष्टिं च दुष्टभा सप्तविंशतिम् । लग्नोदयं स्वदेशीयं यंत्रतो लग्नसाधनम् ॥
लग्नमानं तथा होरा राशिहक्कनवांशकम् । द्वादशांशं च त्रिंशांशमुदयास्तांशसाधनम् ॥
लग्नाच्छुभाशुभं वक्ष्ये यात्रोद्वाहादिनिर्णयम् । देवतानां प्रतिष्ठां च दीक्षां यात्राप्रवेशनम् ॥
वास्तुदीपार्घविन्यासो कालविंशोपकस्तथा । जलयोगोऽर्घकांडश्च वर्षमासाहनिर्णयः ॥
तिथ्यादिः खेचराश्चन्द्रस्तत्कालोदयजः स्फुटम् । अवस्थानेष्टमुष्टिं च लूकभेदं वदाम्यहम् ॥
अगस्पन्दानि सर्वाणि कालचिहानि यानि च । दुष्टारिष्टान्यहं वक्ष्ये तथा तेषां च शान्तिकम् ॥
ज्यौतिषाङ्गमिदं सर्वं ये जानन्ति मनीषिणः। दीपवत्तं विजानीयान्मोहान्धकारनाशनम् ॥
पोतकी पिङ्गला काको यक्षः शिवा क्रमेण च । पञ्चरत्नमिदं वक्ष्ये षष्ठाङ्गे शाकुने मते ॥

अर्थात् होराशास्त्रस्य विशेषतायाः कृते ऊपर्युक्ताः विषयाः नूनमेव अवगन्तव्याः भवन्ति। तद्यथा- ग्रहानयनप्रकारं, तिथ्यादिपञ्चाङ्गानयनं, ग्रहोदयास्तसाधनं, ग्रहाणां वक्र-मार्ग-शीघ्रातिचारज्ञानं, ग्रहाणां शत्रुमित्र- समादिसम्बन्धज्ञानं, खेटानां राश्यधीशत्वं तेषां बलाबलज्ञानं, ग्रहाणाम् उच्च-नीचादि स्थितिज्ञानं, ग्रहमध्यस्थफलज्ञानं, ग्रहदृष्टिस्थानानि, ग्रहगोचरज्ञानं, ग्रहवेधज्ञानं, ग्रहदशास्वन् तर्दशाज्ञानं,वारफलम्, सन्धिर्लत्तावेधमुपग्रहज्ञानन्तथा तद्वशात् शुभाशुभफलज्ञानं, तिथिधिष्ण्यदिवशाद् विभिन्नयोगज्ञानं, चन्द्रताराबलज्ञानं, भद्रां त्रिपुष्करादियोगं तत् फलज्ञानं, यमघण्टयोगं, यमदंष्ट्रयोगं, अर्गलायोगं, अर्गला देवरक्षोनृणां भानि अर्थात् देव-राक्षस-नर-नक्षत्राणां ज्ञानं, पर्वतिथिज्ञानं,

26. नरपतिजयचर्या स्वरोदये १/५४-६९

अधोमुखानि नक्षत्राणि, बाल-कुमार-तरुण-वृद्धमृत्युस्वरज्ञानं, कालवेलां, होरां, यामार्धं, कुलिकं, ग्रहर्क्षवेधादिद्वारा शीघ्रं प्राणापहारिणी-दशाज्ञानं, परिघं, शूलधिष्ण्यं, वारयोगं, योगिनी-दिग्भद्रा-कालपाशज्ञानं,राहोर्विभिन्नस्थितिवशात् फलज्ञानं, भार्गवस्य विभिन्न-स्थितिवशात् फलज्ञानं, छायोत्पत्तिवशात् दिग्देशकालज्ञानं, दिनाष्टमभागज्ञानं, दिनमानज्ञानं, दिने भुक्तिं, छायोदयप्रमाणज्ञानं, सिद्धच्छाया-त्रिषष्टिज्ञानं, सप्तविंशति दुष्टभाज्ञानं, स्वदेशीयं लग्नोदयं, यंत्रतो लग्नसाधनज्ञानं, लग्नमानं, होराराशिदृक्काण-नवांशक-द्वादशांश-त्रिंशांशमुदयास्तांशादीनां साधनज्ञानं, लग्नाच्छुभाशुभफलज्ञानं, यात्रोद्वाहादिनिर्णयम्, देवतानां प्रतिष्ठां, दीक्षां, यात्राप्रवेशनम्, वास्तुदीपार्घविन्यासोवशाच्छुभाशुभफलज्ञानं, विंशोपकवशाच्छुभाशुभफलज्ञानं, जलयोगोऽर्घकांड- वशाच्छुभाशुभफलज्ञानं, वर्षमासाहनिर्णयज्ञानं, तिथि-खेचरादिद्वारा फलज्ञानं, ग्रहाणाम् अवस्थावशाच्छुभाशुभफलज्ञानं, नेष्टमुष्टिं, लूकभेदं, अङ्गस्पन्दानवशाच्छुभाशुभफलज्ञानं, सर्वाणि कालचिह्नानि, दुष्टारिष्टसफललक्षणज्ञानं, तेषां शान्ति-विधानञ्च यो वेति स एव ज्योतिषं वेत्ति । अर्थात् स एव दैवज्ञः समग्रं शुभाशुभं फलं प्रतिपादयितुं समर्थो भवति। अतः ज्योतिषशास्त्रस्य विशेषेण होरास्कन्धस्य इमे विषयाः विशेषेण अध्येतव्या।

स्वरशास्त्रस्य मूलाधारः यामलग्रन्थाः, डामरग्रन्थाः तन्त्रग्रन्थाश्च वर्तन्ते। यद्यपि यामलग्रन्थाः डामरग्रन्थाश्च तन्त्रग्रन्थादेव उद्धृताः सन्ति। प्रसङ्गादत्र यामलग्रन्थानां परिचयः प्रस्तूयते। यामलग्रन्थाः सप्तसंख्यकाः सन्ति। तद्यथा-

1.आदियामलम्, 2.ब्रह्मयामलम्, 3.विष्णुयामलम्, 4.रुद्रयामलम् 5.गणेशयामलम्, 6.आदित्ययामलञ्चेति। एषां यामलग्रन्थानां अष्टविधलक्षणानि प्रतिपादितानि सन्ति। तद्यथा-

सृष्टिश्च ज्योतिषख्यानं नित्यकृत्यप्रदीपनम्।
क्रमसूत्रं वर्णभेदो जातिभेदस्तथैव च।।
युगधर्मश्च संख्यातो यामलस्याष्टलक्षणम्।

एवमेव योगिनीजालसम्बन्धितं ज्ञानं डामरग्रन्थादुद्धृतमस्ति। डामरग्रन्थानां संख्या षट् वर्तते। प्रसङ्गादत्र डामरग्रन्थानां नामानि तथा श्लोकसंख्याश्चात्रोपस्थाप्यते। तद्यथा-

1. योगडामरग्रन्थः अत्र श्लोकसंख्या २३५३३,
2. शिवडामरग्रन्थः अत्र श्लोकसंख्या - ११००७,
3. दुर्गाडामरग्रन्थः अत्र श्लोकसंख्या - ११ ५०३ ।
4. सारस्वतडामरग्रन्थः अत्र श्लोकसंख्या - ९ ९०५ ।
5. ब्रह्मडामरग्रन्थः अत्र श्लोकसंख्या - ७१०५।
6. गन्धर्व्वडामरग्रन्थः अत्र श्लोकसंख्या ६००६० ।

एषां वर्णनं वाराहीतन्त्रे प्राप्यते। समेषामपि डामरग्रन्थानामाधारभूताः तन्त्रग्रन्थाः सन्ति। प्रसङ्गादत्र तन्त्रग्रन्थानां लक्षणमुपस्थाप्यते। तद्यथा-

"सर्गश्च प्रतिसर्गश्च मन्त्रनिर्णय एव च। देवतानाञ्च संस्थानं तीर्थानाञ्चैव वर्णनम्॥

तथैवाश्रमधर्म्मश्च विप्रसंस्थानमेव च । संस्थानञ्चैव भूतानां यन्त्राणाञ्चैव निर्णयः ॥
उत्पत्तिर्व्विबुधानाञ्च तरूणां कल्पसंज्ञितम् । संस्थानं ज्योतिषाञ्चैव पुराणाख्यानमेव च ॥
कोषस्य कथनञ्चैव व्रतानां परिभाषणम् । शौचाशौचस्य चाख्यानं नरकाणाञ्च वर्णनम् ॥
हरचक्रस्य चाख्यानं स्त्रीपुंसोश्चैव लक्षणम् । राजधर्म्मो दानधर्म्मो युगधर्म्मस्तथैव च॥
व्यवहारः कथ्यते च तथा चाध्यात्मवर्णनम् ॥ इत्यादिलक्षणैर्युक्तं तन्त्रमित्यभिधीयते ॥"

अर्थादुपर्युक्तैः लक्षणैर्युक्तः ग्रन्थः तन्त्रग्रन्थः उच्यते। तन्त्रं नाम शिवोक्तशास्त्रम्। तच्च चतुःषष्टिसंख्यकम्। तद्यथा-

"सिद्धीश्वरं महातन्त्रं कालीतन्त्रं कुलार्णवम्। ज्ञानार्णवं नीलतन्त्रं फेत्कारीतन्त्रमुत्तमम् ॥
देव्यागमं उत्तराख्यं श्रीक्रमं सिद्धियामलम्। मत्स्यसूक्तं सिद्धसारं सिद्धिसारस्वतं तथा ॥
वाराहीतन्त्रं देवेशि ! योगिनीतन्त्रमुत्तमम्। गणेशविमर्षिणी तन्त्रं नित्यातन्त्रं शिवागमम् ॥
चामुण्डाख्यं महेशानि ! मुण्डमालाख्यतन्त्रकम्। हंसमाहेश्वरं तन्त्रं निरुत्तरमनुत्तमम् ॥
कुलप्रकाशकं देवि ! कल्पं गान्धर्व्वकं शिवे !। क्रियासारं निबन्धाख्यं स्वतन्त्रं तन्त्रमुत्तमम् ॥
सम्मोहनं तन्त्रराजं ललिताख्यं तथा शिवे !। राधाख्यं मालिनीतन्त्रं रुद्रयामलमुत्तमम् ॥
बृहत्श्रीक्रमं तन्त्रं गवाक्षं सुकुमुदिनी। विशुद्धेश्वरतन्त्रञ्च मालिनीविजयं तथा ॥
समयाचारतन्त्रञ्च भैरवीतन्त्रमुत्तमम्। यीगिनीहृदयं तन्त्रं भैरवं परमेश्वरि ! ॥
सनत्कुमारकं तन्त्रं योनितन्त्रं प्रकीर्त्तितम्। तन्त्रान्तरञ्च देवेशि ! नवरत्नेश्वरं तथा ॥
कुलचूडामणितन्त्रं भावचूडामणीयकम्। तन्त्रदेवप्रकाशञ्च कामाख्यानामकं तथा ॥
कामधेनु कुमारी च भूतडामरसंज्ञकम्। मालिनीविजयं तन्त्रं यामलं ब्रह्मयामलम् ॥
विश्वसारं महातन्त्रं महाकालं कुलामृतम्। कुलोड्डीशं कुब्जिकाख्यं यन्त्रचिन्तामणीयकम् ॥
एतानि तन्त्ररत्नानि सफलानि युगे युगे। कालीविलासकादीनि तन्त्राणि परमेश्वरि !॥
कालकल्पे सुसिद्धानि अश्वक्रान्तासु भूमिषु। महाचीनादितन्त्राणि अविकल्पे महेश्वरि !॥
सुसिद्धानि वरारोहे! रथक्रान्तासु भूमिषु ॥"

अपि च -

"चतुःषष्टिश्च तन्त्राणि यामलादीनि पार्व्वति !। सफलानीह वाराहे ! विष्णुक्रान्तासु भूमिषु ॥
कल्पभेदेन तन्त्राणि कथितानि च यानि च। पाषण्डमोहनायैव विफलानीह सुन्दरि! ॥

- इति महाविश्वसारतन्त्रम् ॥

अस्मादेव स्वरशास्त्रसम्बन्धिताः विषयाः संकलिताः विद्यन्ते। यतः नरपतिनामाऽऽचार्यो वदति यदहमन्य विषयैः सह सप्त यामलग्रन्थान् अन्विष्य नरपतिजयचर्या नामकं स्वरशास्त्रं रचयामि।[27] अर्थात् निम्नलिखिताः ग्रन्थाः एव स्वरशास्त्रास्य आधारभूताः ग्रन्थाः वर्तन्ते। तद्यथा-

श्रत्वादौ यामलान्सप्त तथा युद्धजयार्णवम् । कौमारी कौशलं चैव योगिनीजालसंचरम् ॥

27. नरपतिजयचर्या स्वरोदयः १/३-७

रक्षोघ्नं च त्रिमुण्डं च स्वरसिंहं स्वरार्णवम् । भूबलं भैरवं नाम पटलं स्वरभैरवम् ॥
तन्त्रं रणाह्वयं ख्यातं सिद्धान्तं जयपद्धतिम्। पुस्तकेन्द्रं च ढोकं च श्रीदर्शं ज्यौतिषं तथा ॥
मन्त्रयन्त्राण्यनेकानि कूटयुद्धानि यानि च। तन्त्रयुक्तिं च विज्ञाय विज्ञानं वडवानले ॥
एतेषां सर्वशास्त्राणां दृष्टसारोऽहमात्मना। सारोद्धारं भणिष्यामि सर्वसत्त्वानुकम्पया ॥

अथ स्वरशास्त्रस्य प्रधानत्वम्-[28]

पत्त्यश्वगजभूपालैः सम्पूर्णा यदि वाहिनी। तथापि भङ्गमायाति नृपो हीनस्वरोदयी ॥
तावत्तरन्ति ते धीरा दोर्भ्यामाहवसागरम्। यावत्पतन्ति नो चक्रे स्वरास्ते वडवानले ॥
कथंचिद्विजयी युद्धे स्वरज्ञेन विना नृपः। घुणवर्णोपमं तत्तु यथान्धचटकग्रहः ॥
यस्यैकोऽपि गृहे नास्ति स्वरशास्त्रस्य पारगः। रम्भास्तम्भोपमं राज्यं निश्चितं तस्य भूपतेः ॥

अर्थात् या सेना पद्भ्यां गच्छतीति पत्तिः, अश्वसेना, गजसेना, एभिः तिसृभिः सेनाभिः सम्वलिता राज्ञः वाहिनी तावदेव रणे सफला भवति यावत् तस्य राज्ञः स्वरः सबलोऽस्ति। यदा सः नृपः हीनस्वरोदयी भवति तदा तस्य सकलशक्तिसम्पन्नाऽपि वाहिनी नष्टा भवति। किमधिकम्? स्वरस्य प्राधान्यं वणर्यन् अचार्यो वदति यत् बहुविधबलिष्ठोऽपि जनः तावदेव आहवसागरे तर्तुं समर्थो भवति यावत् तस्य स्वरः अस्तङ्गतं न याति। यदा तस्य स्वरः अस्तं याति सः वडवानले (समुद्राग्नौ) नूनमेव पतति। स्वरज्ञानं विना अथवा स्वरशास्त्रज्ञस्य सहयोगं विना राजा युद्धे कथञ्चिदेव विजयी भवति। स्वरज्ञहीनो नृपः तथैव स्वीयं राज्यं चालयति यथा अन्धः चटकः (पक्षी) स्वीयं जीवनं यापयति। अपि च- यस्य राज्ञः राज्यसदसि एकोऽपि स्वरशास्त्रज्ञः नास्ति तस्य राज्ञः राज्यं रम्भास्तम्भवत् (कदलीस्तम्भवत्) वर्तते। इत्यत्र संदेहो न कर्तव्यः।

अतः कथनमिदं सर्वथा सत्यमस्ति यत् स्वरशास्त्राभ्यासशीलस्य, सत्यवादिनः, जितेन्द्रियस्य च आदेशानुसारं यः राजा अधिकारी वा स्वीयं दायित्वं निर्वहति स एव राज विजयश्रीभाग्भवति। स राजा सर्त्र्त्र विजयमवाप्नोतीति दिक्। तद्यथा[29]-

स्वरशास्त्रे सदाभ्यासी सत्यवादी जितेन्द्रियः ।
तस्यादेशस्य यः कर्ता जयश्रीस्तं नृपं भजेत् ॥

इत्थं फलादेशे अथवा मानवानां दिशानिर्देशने, विशिष्टजनानां सामान्यानां च मार्गदर्शने ज्योतिषशास्त्रस्य, विशेषेण स्वरशास्त्रस्य महनीयं महत्त्वं विद्यते। अस्मिन् क्षेत्रे सूक्ष्मातिसूक्ष्मान्वेषणेन सह अस्य शास्त्रस्य समुचितः प्रचारः प्रसारश्च भवेत्तदा नूनमेव जनानां महत् कल्याणं भविष्यतीति शम्।

यथा क्षारादिसन्तापैः हेम्नोऽधिकतराद्युतिः।
तथैव नूतनोपायैः शास्त्रं निर्मलतां व्रजेत्।।

28. नरपतिजयचर्या स्वरोदयः १/८-११
29. नरपतिजयचर्या स्वरोदयः १/१२

भावफलमीमांसा

डॉ.अरुणकुमारः
सहायकाचार्यः, ज्योतिषविभागः
हिमाचल-आदर्शसंस्कृतमहाविद्यालयः,
जांगला

मानवजीवने कर्मणः एव प्रामुख्यं विद्यते। यतोहि मनुष्यः यत्किमपि शुभाशुभं कर्म करोति तस्य शुभाशुभं फलमपि सः अवश्यमेव भुङ्क्ते। यथा[1] -

यथा धेनुसहस्त्रेषु वत्सो विन्दति मातरम् ।
तथा पूर्वं कृतं कर्म कर्तारमनुगच्छति।। [2]

तस्यैव शुभाशुभफलस्य प्रतिपादनम्, अशुभफलस्य निराकरणञ्च ज्योतिषशास्त्रं सम्यक्तया प्रतिपादयति। यतोहि कालानुगुणं शुभाशुभफलविवेचनं ज्योतिषशास्त्रस्य मुख्यं प्रयोजनम्। पूर्वजन्मनि कृतानां कर्मणां शुभाशुभपलबोधकं शास्त्रं ज्योतिषशास्त्रमिति आचार्यवराहमिहिरेण स्वलघुजातकाख्यग्रन्थस्य प्रयोजननिरूपणप्रसङ्गे आदावेव प्रतिपादितम्[3] -

यदुपचितमन्यजन्मनि शुभाशुभं तस्य कर्मणः पक्तिम् ।
व्यञ्जयति शास्त्रमेतत् तमसि द्रव्याणि दीप इव ।।

यथा तमसि विद्यमानानि वस्तुनि दीपकस्य प्रकाशेन दृग्गोचराणि भवन्ति तथैव पूर्वजन्मनि कृतानि कार्याणि शास्त्रमेतत् सूर्यादिग्रहाणां शुभाशुभस्थितिवशात् प्रत्यक्षरूपेण प्रकटीकरोति। अतः पूर्वजन्मस्थितिवशादेव सुखं-दुःखं, दारिद्र्यमैश्वर्यं, सन्ततिप्राप्तिरनपत्यता च जायते। ज्योतिषशास्त्रेऽपि पूर्वजन्मनि कृतशुभाशुभकर्मणां तदनुगुणं फलं तन्वादिद्वादशभावैः संसूच्यते। तत्र ज्योतिषशास्त्रे तन्वादयो द्वादशभावाः प्रसिद्धाः यथा[4] -

तनुर्धनं ततो भ्राता च सुहृत्पुत्रो रिपुर्वधुः ।
मृत्युश्च धर्मकर्मायौ व्ययो भावाः प्रकीर्तिताः ।।

एवं प्रकारेण तन्वादिद्वादशभावेषु यस्य कस्यापि भावस्य विचारः क्रियते तद्भावविशेषः लग्नवत् प्रकल्प्य ततः द्वादशभावेषु ग्रहाणां स्थितिं बलाबलं च विलोक्य फलं वक्तव्यम्। यथा

1. अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम्। नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि ।।
2. चाणक्यनीतिदर्पणम्-13/15
3. लघुजातकम्-1/2
4. ज्योतिषतत्त्वप्रकाशः, चतुर्थोऽध्यायः श्लोक-1

आचार्यः मन्त्रेश्वर[5]:-

भावस्य यस्यैव फलं विचिन्त्यं भावं च तं लग्नमिति प्रकल्प्य ।
तस्माद् वदेद्द्वादशभावजानि फलानि तद्रूपधनादिकानि ।।

उपर्युक्तानुसारं ग्रहभावस्पष्टता तेषां बलं च ज्ञातव्यम्। ततो भावसामान्यफलान्तरं शुभपापमित्रग्रह-दृष्टियोगादिकं भावषड्वर्गाः भावेशस्योदयास्तादिकं ज्ञातव्यम्। तत्र तन्वादिद्वादश-भावानां सामान्येन शुभाशुभफलप्रदानस्य सिद्धान्तः प्रायः सर्वैरेवाचार्यैः स्वीकृतः। तद्यथा - अधुना तन्वादीनां द्वादशभावानां शुभाशुभज्ञानमाह -

यो यो भावः स्वामिदृष्टो युतो वा सौम्यैर्वा स्यात्तस्य तस्यास्ति वृद्धिः ।
पापैरेवं तस्य भावस्य हानिर्निर्देष्टव्या पृच्छतां जन्मतो वा[6]।।

अर्थात् जातकस्य जन्मकालतः प्रश्नकालतो वा तन्वादिद्वादशभावेषु यो यो भावः स्व-स्वामिना युतः दृष्टः अथवा सौम्यग्रहाणां बुधगुरुशुक्रपूर्णचन्द्राणामन्यतमेन वा युतः दृष्टः वा भवेत्तदा तस्य तस्य भावस्य वृद्धिर्वक्तव्या। तत्सम्बन्धिभावस्य शुभफलं प्राप्यते इत्यर्थः। एवं प्रकारेण पापग्रहैः यो यो भावः युक्तो दृष्टो वा भवेत् तस्य भावस्य हानिः अपचयः वक्तव्यः। अपि मानसागरीत्यभिधानके ग्रन्थे[7] -

तन्वादयो भावबलं वदन्ति यत्स्वामिसम्पूर्णबलैः समेतः ।
युक्तेऽथ दृष्टे शुभदृग्युते च क्रमेण तद्भावविवृद्धिकारी ।।

भावानां शुभाशुभफलप्रदानस्य सामान्योऽयं नियमः। भावानां बलाबलविषये फलदीपिका-यामपि निगदितमाचार्यमन्त्रेश्वरेणापि यथा[8] -

भावाः सर्वे शुभपतियुता वीक्षिता वा शुभेशैः, तत्तद्भावाः सकलफलदाः पापदृग्योगहीनाः।
पापा सर्वे भवनपतयश्चेदिहाहुस्तथैव, खेटैः सर्वैः शुभफलमिदं नीचमूढारिहीनैः।।

पापाग्रह-युति-दृष्टिरहिता तन्वादयो भावाः स्वस्वामिना शुभग्रहेण वा युता अथवा दृष्टाः शुभफलदाः भवन्ति। भावस्वामी पापग्रहोऽपि यदि स्वभावं पश्येत्, युक्तः वा भवेत् अन्ये पापग्रहाः न पश्येयुस्तदा सोऽपि शुभफलदायकाः भवन्ति। एवं प्रकारेण भावाधिपतिः ग्रहः यदि स्वनीचराशौ स्थितः, शत्रुराशौ स्थितः, अथवा सूर्यसान्निध्येन अस्तङ्गतः न भवेत् तदा सः भावस्य वृद्धिं करोति। अपि च जातकपारिजाते[9] -

5 फलदीपिका, अ-15, श्लो. - 20
6 षट्पञ्चाशिका, अ.-1, श्लो.-3
7 मानसागरी 2
8 फलदीपिका, अ-15, श्लो. - 1
9 जातकपारिजातः, अ.- 11, श्लो.- 1

ये ये भावाः सितज्ञामरगुरुपतिभिः संयुता वीक्षिता वा ।
नान्यैर्दृष्टा न युक्ता यदि शुभफलदा मूर्तिभावादिकेषु ।।

इति तन्वादिभावानां सामान्येन शुभाशुभफलप्रदानस्य क्रमः विद्यते। इदानीं भावानां शुभाशुभविचारे विशेषेण उच्यते।

तत्तद्भावात् त्रिकोणे स्वसुखमदनभे चास्पदे सौम्ययुक्ते,
पापानां दृष्टिहीने भवनपसहिते पापखेटैरयुक्ते ।
भावानां पुष्टिमाहुः सकलशुभकरीमन्यथा चेत्प्रणाशं,
मिश्रं मिश्रैर्ग्रहेन्द्रैः सकलमपि तथा मूर्तिभावादिकानाम् ।।[10]

अर्थात् कस्मादपि भावाद्यदि द्वितीयभावे, त्रिकोणे (5,9), तथा केन्द्रे (1,4,7,10) शुभग्रहाः भवेयुः, भावाधिपतिश्च पापग्रहैर्युक्तः दृष्टः वा न भवेत् तदा सः भावः बलवान् भवति तथा तस्य वृद्धिः भवति। एतद्विपरीतं यदि उपर्युक्तेषु भावेषु पापग्रगहाः भवेयुः अथवा भावाधिपतिः पापग्रहैः युक्तः दृष्टः वा भवेत् तदा सः भावः निर्बलः अशुभफलदायकश्च भवति । उपर्युक्तेषु भावेषु यदि शुभाः पापाश्च (मिश्रिताः) ग्रहाः भवेयुः तथा भावाधिपतिः मिश्रितैर्ग्रहैः (शुभाशुभग्रहैः) युक्तः दृष्टश्च भवति तदा तस्य ग्रहस्य मिश्रितं फलं भवति ।

नाशस्थानगतो दिवाकरकरैलुप्तस्तु यद्भावपो,
नीचाराति गृहं गतो यदि भवेत्सौम्यैरयुक्तेक्षितः ।
तद्भावस्य विनाशनं वितनुते तादृग्विधोऽन्योस्ति चेत्,
तद्भावोऽपि फलप्रदो न हि शुभश्चेन्नाशमुग्रग्रहः ।।[11]

यस्य भावस्याधिपतिः नाशस्थाने अर्थात् तात्कालिकजन्मलग्नादष्टमे भावे स्थितः, सूर्यसान्निध्येन अस्तङ्गतः, शत्रुराशौ, नीचराशौ वा स्थितः, शुभग्रहैरदृष्टः तद्भावस्य फलनाशकरः कथितः। एतादृशः उपर्युक्तलक्षणैर्युतः ग्रहः यस्मिन् भावे स्थितः भवेत् तस्य भावस्य फलमपि नाशयति । उपर्युक्तलक्षणैर्युतः यदि कश्चन शुभग्रहो भवेत् तदा तस्य शुभग्रहाधिष्ठितभावस्य फलं (शुभफलं) अपि सः जातकः न प्राप्नोति । तत्र विषयेऽस्मिन् आचार्यगर्गोऽपि कथयति यथा[12] —

नीचस्थो रिपुगेहस्थो ग्रहो भाव विनाशकृत् ।
उदासीनो ग्रहो मध्यो मित्रस्वर्क्ष त्रिकोणगः ।
स्वोच्चस्थश्च ग्रहोऽप्येवं भाववृद्धिकरः स्मृतः ।

---

10. फलदीपिका, अ-1, श्लो. - 1
11. फलदीपिका, अ-15, श्लो. - 03
12. बृहज्जातके भट्टो.२०।१०

व्ययाष्टमषष्ठभावेषु वैपरीत्यफलमाह उशनाचार्यः[13] -

सौम्याः पुष्टिं पापा विपर्ययं संश्रिताग्रहाः कुर्युः ।
मूर्त्यादिषु निधनान्त्य रिपुभावे व्युत्क्रमात्फलदाः ।।

अपि च[14] -

तत्तद्भावत्रिकोणे स्वसुखमदनभे चास्पदे सौम्ययुक्ते पापानाम्
दृष्टिहीने भवनपसहिते पापखेटैरयुक्ते ।
भावानां पुष्टिमाहुस्त्वथ च शुभकरीमन्यभात्वे प्रणाशम्
मिश्रं मिश्रग्रहैन्द्रैः सकलमपि तथा मूर्तिभावादिकानाम् ।।
लग्नादिभावाद्रिपुरन्ध्ररिष्फे पापग्रहास्तद्भवनादिनाशम् ।
सौम्यास्तु नात्यन्तफलप्रदाः स्युर्भावादिकानां फलमेवमाहुः ।।
यद्भावनाथो रिपुरन्ध्ररिष्फे दुःस्थानपो यद्भवनस्थितो वा ।
तद्भावनाशं कथयन्ति तज्ज्ञाः शुभेक्षितस्तद्भवनस्य सौख्यम् ।।

जन्माङ्गचक्रे लग्नादिविचारणीयभावेभ्यः षष्ठेऽष्टमे द्वादशे च भावे पापग्रहाणां स्थितिः तद्भावसम्बन्धिफलस्य नाशकः भवति। उक्तस्थानेषु शुभग्रहाणां स्थितिः अत्यन्तफलदा न भवति। भावस्य पूर्णफलं न लभ्यते इत्यर्थः ।

यस्य कस्यापि भावस्याधिपतिः षष्ठेऽष्टमे अथवा द्वादशे स्थितः भवेदथवा एतेषां भावानाम् अधिपतयः यद्भावे स्थिताः भवन्ति तद्भावस्य फलं नाशयन्ति। यदि तेषु भावेषु शुभग्रहाणां दृष्टिर्भवति तदा तेषां भावानां सामान्यफलं लभ्यते।

भावाधीशे च भावे सति बलरहिते च ग्रहे कारकाख्ये
पापान्तःस्थे च पापैररिभिरपि समेतेक्षिते नान्यखेटैः ।
पापैस्तद्-बन्धुमृत्युव्ययभवनगतैस्तत्त्रिकोणस्थितैर्वा
वाच्या तद्भावहानिः श्फुटमिह भवति द्वित्रिसंवादभावात् ।।[15]

यदि जन्माङ्गचक्रे विचारणीयभावः, भावाधीशः, भावकारकग्रहश्चेति निर्बलाः भवेयुः, पापग्रहयोर्मध्ये स्थिताः भवेयुः, पापग्रहैः शत्रुग्रहैः वा युक्ता दृष्टाः वा भवेयुः, अन्यैः (शुभग्रहैः मित्रग्रहैः वा) युताः दृष्टाः वा न भवेयुः अथवा विचारणीयभावात् चतुर्थे, अष्टमे, द्वादशे भावे अथवा त्रिकोणे (5,9) पापग्रहाः स्थिताः भवेयुस्तदा विचारणीयभावस्य फलं नश्यति। उपर्युक्तलक्षणेषु द्वे त्रीणि वा लक्षणानि जन्माङ्गचक्रे भवन्ति तदा भावस्य सम्पूर्णं फलं नश्यति ।

13. तत्रैव
14. फलदीपिका, भावशुभाशुभचिन्ताध्यायः, श्लो.-2,4,5
15. फलदीपिका, अ-15, श्लो. - 06

भावस्योदयपाश्रितस्य कुशलं यद्भावपेनोदय-
स्वामी तिष्ठति संयुतोऽपि कलयेत्तद्भावजातं फलम् ।
दुःस्थाने विपरीतमेतदुदितं भावेश्वरे दुर्बले
दोषोऽतीव भवेद् बलेन सहिते दोषाल्पता जल्पिता ।।[16]

यस्मिन् भावे लग्नस्याधिपतिः स्थितः भवेत्तस्य भावफलस्य वृद्धिं करोति। लग्नेन सम्बद्धाः (युताः दृष्टाः वा) ग्रहाः येषां भावानामधिपतयः भवन्ति तेषां भावानां फलस्याभिवृद्धिः लग्नेशेन क्रियते। अर्थात् लग्नेशस्य बलानुसारं तेषां भावानां फलं प्राप्यते।

यदि भावाधिपतिः दुःस्थानेषु (त्रिकादिषु) स्थितः भवेत्तदा तस्य भावफलं ह्रासतामेति। भावेशः निर्बलः भवेत्तदा अधिका हानिः, बलयुक्तः भवेच्चेत् भावफलस्य अल्पहानिं कुरुते।

यद्भावेष्वशुभोऽपि वोदयपतिस्तद्भाववृद्धिं दिशेत्
दुःस्थानाधिपतिः स चेद्यदि तनोः प्राबल्यमन्यस्य न ।
अत्रोदाहरणं कुजे सुतगते सिंहे झषे वा स्थिते
पुत्राप्तिं शुभवीक्षिते झटिति तत् प्राप्तिं वदन्त्युत्तमा ।।[17]

लग्नस्याधिपतिः अशुभग्रहोऽपि किमर्थं न भवेत् सः यस्मिन् कस्मिन् अपि भावे स्थितः भवेत्तस्य भावस्य वृद्धिकारकः भवति। लग्नेशः यदि अशुभभावानाम्(त्रिकभावानां) अधिपतिरपि भवेत्तदापि सः लग्नेशस्य एव शुभफलं ददाति, न तु अशुभभावानाम्।

उदाहरणार्थं मीनराशेः सिंहराशेर्वा मंगलः लग्नेशः सन् पञ्चमभावे स्थितः भवेत्तदापि (यतः मंगलः षष्ठेशः अथवा अष्टमेशः वर्तते तथापि) पञ्चमभावस्य हानिं न कुरुते। वृद्धिम् एव करोतीत्यर्थः। यदि मंगलस्योपरि शुभग्रहाणां दृष्टिर्भवेत्तदा जातकः शीघ्रमेव सन्ततिसुखं प्राप्नोति । अन्ते च सारांशरूपेण यथा[18] -

सौम्यवर्गाश्रिता भावा: शुभतां प्राप्नुवन्ति हि ।पापवर्गाधिका नेष्टास्तन्वाद्या नात्र संशय:।।
लग्नलग्नाधिपौ स्यातां बलाधिकतरौ यदि ।तत्फलानां प्रवृद्धि: स्याद्धीनो हानिकर: स्मृत:।।
एवं भावेषु सर्वेषु भावभावेशयोर्बलात् । ततो जनुषि वक्तव्या हानिवृद्धिश्च कोविदै:।।

पापग्रहाणां स्थितिविषये विशेषः[19] -

पापग्रहाः षष्ठमृतिव्ययस्थास्तद्भाववृद्धिं कलयन्ति दोषैः ।
शुभास्तु तद्भावलयं हि तस्माच्छत्वादि भावात्फलप्रणाशः ।।

---

16. फलदीपिका, अ-15, श्लो. - 09
17. फलदीपिका, भावशुभाशुभचिन्ताध्यायः, श्लो.-10
18. जातकालंकारः, आचार्यसत्येन्द्रमिश्रसम्पादितः, द्वितीयोऽध्यायः, श्लो.-1 (टीकायाम्)
19. फलदीपिका, अ-15, श्लो. - 19

त्रिक् भावेषु षष्ठाष्टमद्वादशेषु स्थिताः पापग्रहाः एतेषां (त्रिक् भावानां) पापफलं विनश्य शुभफलं प्रयच्छन्ति । एतेषु भावेषु (उक्त-अशुभभावेषु) शुभग्रहाणां स्थितिः एतेषां भावानां शुभफलं विनश्य पापफलं प्रयच्छन्ति ।

सन्धिगतग्रहफलम्-

तन्वादिद्वादशभावानां फलविचारे भावसमे खेटे पूर्णं फलं, सन्ध्यंशादितुल्ये ग्रहे तु शून्यं फलं भवति। सन्धिद्वयमध्यस्थिते ग्रहे तद्भावजं फलं भवेत्। द्विसन्धिभ्यां हीनेऽधिके क्रमेण पूर्वापरे भावे फलं भवेत्। अर्थात् आरम्भसन्धितः हीने ग्रहे पूर्वभावस्य तथा विरामसन्धितः अधिके ग्रहे अग्रिमभावस्य फलं प्रयच्छति । यथा[20] -

खेटे भावसमे पूर्णं फलं सन्धिसमे तु खम् ।।
खेटे सन्धिद्वयान्तःस्थे फलं तद्भावजं भवेत्।।
हीनेऽधिके द्विसन्धिभ्यां भावे पूर्वाऽपरे फलम् ।।

अपि च भुवनदीपकाख्ये ग्रन्थे[21] -

भावान्तगतःखेटःपरभावफलं ददाति पृच्छासु ।
अन्तघटीर्यावदसावासीनफलं विवाहादौ ।।

प्रश्नकाले ग्रहो यत्र स्थितो भवति तस्माद् भावात् यदा ग्रहो भावान्तगतो भवति तदा परभावफलं ददाति। इयं स्थितिस्तदा समायाति यदा कश्चिद् ग्रहः कस्यापि राशेः २९ अंशे विद्यते तदाऽयं परस्मिन् राशौ गन्तुमिच्छति। अतोऽयं प्रश्नकालेऽग्रिमराशेः फलं प्रदास्यति। परञ्च विवाहादौ कार्येऽन्तिमांशं यावदसौ ग्रहस्तस्यैव भावस्य फलं ददाति, यत्रासीनं भवति।

भावफलानयने विशेषरूपेण उक्तमपि आचार्यैः[22] -

भावप्रवृत्तौ हि फलप्रवृत्तिः पूर्णं फलं भावसमांशकेषु ।
ह्रासः क्रमाद्भावविरामकाले फलस्य नाशः कथितो मुनीन्द्रैः ।।

इति प्राचीनाचार्याणां वचनप्रामाण्यात् आरम्भसन्ध्यग्रतो भावप्रवृत्तिर्भवति, तत एव फलस्यापि प्रवृत्तिर्जायते। ततः क्रमेण फलस्य वृद्धिर्भवति। भावतुल्ये ग्रहे फलं रूपमितं जायते। तत्र सन्धिग्रहान्तरमपि परमं भवति, अर्थात् भावसन्ध्यन्तरतुल्यं सन्धिग्रहान्तरं जायते। ततः क्रमेण फलस्य ह्रासो जायते। तत्र विरामसन्धितुल्ये ग्रहे फलस्य नाशस्तत्र सन्धिग्रहान्तरमपि शून्यसमं भवत्यतस्तत्र सन्धिखगान्तरवशेनैव फलस्य वृद्धिह्रासौ सिद्धौ। अतोऽनुपातवशेनेष्टस्थाने भावफलं जायते। तत्रानुपातो यथा-यदि भावसन्ध्यन्तरतुल्यसन्धिग्रहान्तरेण परमं फलं रूप

20. ताजिकनीलकण्ठी, प्रथमोऽध्यायः, भावस्थग्रहफलप्रकरणम्,श्लो. - 27-28
21. भुवनदीपकम्, भावान्तगतग्रहफलम्, श्लो.-९६
22. केशवीयजातकपद्धतिः, श्लो. - 3 (टीकायाम्)

(१) मितं लभ्यते तदेष्टसन्धिग्रहान्तरेण किमितीष्टस्थाने भावफलम्। अतः भावसन्धिगतः ग्रहः शून्यफलं, भावततुल्यः ग्रहः पूर्णं (रूपमितं) च फलं प्रयच्छति । यथोक्तमपि सन्धिगतग्रहफलम् आचार्यमन्त्रेश्वरेणापि[23] -

स्वोच्चे सुहृत्क्षेत्रगतो ग्रहेन्द्रः षड्भिर्बलैर्मुख्यबलान्वितोऽपि ।
सन्धौ स्थितः सन्नफलप्रदः स्यात् एवं विचिन्त्यात्र वदेद्विपाके ।।

स्थान-काल-दिगादि-षड्बलैर्युतो ग्रहः स्वोच्चराशौ, स्वमित्रराशौ अथवा स्वराशौ स्थितोऽपि ग्रहः यदि भावसन्धिगतः स्यात्तदा शुभफलं न प्रयच्छति। अतः दशाविचारात्पूर्वम् एतद् अवश्यमेव विचार्यम्। अपि च भावतुल्य ग्रहविषये आचार्यमन्त्रेश्वरः[24] -

भावेषु भावस्फुटतुल्यभागस्तद्भावजं पूर्णफलं विधत्ते ।
सन्धौ फलं नास्ति तदन्तराले चिन्त्योऽनुपातः खलु खेचराणाम् ।।

यस्मिन् कस्मिन्नपि भावे भावस्पष्टतुल्यः स्पष्टग्रहः तस्य भावस्य पूर्णं फलं प्रयच्छति। भावस्नधौ गताः ग्रहाः निष्फलाः भवन्ति। सन्धि-भावयोरन्तराले अनुपातात् ग्रहबलविचारः कर्तव्यः। उक्तमपि यथा[25] -

लग्नाद्भावफलं यद् यद् ग्रहयोगात् प्रकीर्तितम् ।
तत् तत् शुभाशुभं सर्वं भावचक्राद् विचिन्तयेत् ।।
खेटे भावसमे पूर्णं शून्यं सन्धिसमे स्मृतम् ।
फलं तद्भावखेटोत्थं ज्ञेयं मध्येऽनुपाततः ।।

एवम् उपर्युक्तप्रकारेण ग्रहाणां शुभपापवर्गस्य पंक्तिद्वयं वीक्ष्य शुभाधिकत्वे सति दशाफलं भावफलं शुभं वाच्यम्, अशुभाधिकत्वे तु अनिष्टं फलं वाच्यम्। भावानां शुभाशुभविचारप्रसंगे कदाचित् क्रूरोऽपि सौम्याधिकवर्गशाली शुभः स्यात्। अर्थात् सौम्यग्रहस्य वर्गे राशिहोराद्रेष्काणादिषु स्थितः क्रूरग्रहोऽपि कदाचित् शुभफलं प्रयच्छति। एवमेव शुभखेचरः सौम्याधिकवर्गशाली तदा अतिसौम्यः स्यात्। सौम्योऽपि (शुभग्रहोऽपि) पापाधिकवर्गयोगान्नेष्टः स्यात्। पापखेटस्तु पापाधिकवर्गयोगात् अतिनिन्द्यः खलुः। एवमेव तन्वादिद्वादशभावानां लग्नस्य च अनयैव रीत्या राशीशमित्रोच्चरिपुक्रमेण 'शुभाशुभत्वं' चिन्त्यम्। एवं सर्वेष्वपि भावेषु वर्गचक्रं विलोक्य तत्तत्फलम् ऊहनीयम्। यथोक्तमपि[26]-

---

23. फलदीपिका, अ-15, श्लो. - 13
24. फलदीपिका, अ-15, श्लो. - 14
25. ताजिकनीलकण्ठी, श्रीसीतारामझामहोदयेन सम्पादिता, भावस्थग्रहफलप्रकरणम्,श्लो. - 27-28 (टीकायाम्)
26. ताजकिनीलकण्ठी, श्लो.- 46-48

एवं ग्रहाणां शुभपापवर्गपङ्क्तिद्वयं वीक्ष्य शुभाधिकत्वे ।
दशाफलं भावफलं च वाच्यं शुभं त्वनिष्टं ह्यशुभाधिकत्वे ।।
क्रूरोऽपि सौम्याधिकवर्गशाली शुभोऽतिसौम्यः शुभखेचरश्चेत् ।
सौम्योऽपि पापाधिकवर्गयोगान्नेष्टोऽतिनिन्द्यः खलु पापखेटः ।।
राशीशमित्रोच्चरिपुक्रमेण चिन्त्यं तनोरप्यनयैव रीत्या ।
भावेषु सर्वेष्वपि वर्गचक्रं विलोक्य तत्तत्फलमूहनीयम् ।।

यद्यपि कस्यापि मानवस्य भविष्यकथनम् उत वा शुभाशुभफलकथनं नास्ति सुकरं तथापि अस्माकं प्राचीनैः ऋषिभिः जन्माङ्गचक्रं निर्माय द्वादशभावद्वारा फलकथनस्य या पद्धतिः प्रतिपादिता वर्तते सा अतीव सूक्ष्मा वैज्ञानिकी च वर्तते । सम्यक् प्रकारेण अस्यानुसरणेन परिशीलनेन च तन्वादिद्वादशभावानां बलाबलत्त्वं विचार्य जातकस्य शुभाशुभं वक्तुं शक्यत इति मे मतिः ।।

शुभाषितम्

वाञ्छा सज्जनसङ्गमे परगुणे प्रीतिर्गुरौ नम्रता
विद्यायां व्यसनं स्वयोषिति रतिर्लोकापवादाद् भयम्।
भक्तिः शूलिनि शक्तिरात्मदमने संसर्गमुक्तिः खले
एते येषु वसन्ति निर्मलगुणास्तेभ्यो नरेभ्यो नमः।।

विपदि धैर्यमथाभ्युदये क्षमा
सदसि वाक्पटुता युधि विक्रमः ।
यशसि चाभिरुचिर्व्यसनं श्रुतौ
प्रकृतिसिद्धमिदं हि महात्मनाम् ॥

प्रदानं प्रच्छन्नं गृहमुपगते सम्भ्रमविधिः
प्रियं कृत्वा मौनं सदसि कथनं चाप्युपकृतेः।
अनुत्सेको लक्ष्म्यां निरभिभवताराः परकथाः
सतां केनोद्दिष्टं विषममसिधाराव्रतमिदम् ॥

भर्तृहरि-नीतिशतकम्- श्लो.सं. 62-64

विदेशयात्रायोगविमर्शः

डॉ.विकासः
सहायकप्राचार्यः
स्नातकोत्तरज्यौतिषविभागः
कामेश्वरसिंह-दरभङ्गा-संस्कृत-विश्वविद्यालयः, दरभङ्गा

बहवः भारतीयाः विदेशयात्रां बहुविधकारेणेन कुर्वन्ति। केचन जनाः आजीविकाप्राप्त्यर्थं, केचन भ्रमणार्थं, केचन तीर्थाटनार्थं, केचन पुरस्कारप्राप्त्यर्थं, केचन परिजनैः सह मेलनार्थञ्च गच्छन्ति। यात्रिकाः विदेशयात्रां बहुविधप्रकारेण कुर्वन्ति। यथा विमानेन वायुमार्गेण, जलमार्गेण नौकया, लोकयानेन राजमार्गेण च। कुण्डल्यां ग्रहराशिभावानां योगेन विभिन्नयोगाः भवन्ति तेषु योगेषु एको विदेशयात्रायोगो विद्यते।

विदेशयात्राकारकभावाः-

कुण्डल्यां द्वादशभावाः भवन्ति तेषु द्वादशभावेष्वपि पराशर-वैद्यनाथादिमतानुसारं प्रथमद्वितीय-पञ्चमसप्तमनवम-दशमद्वादशभावेभ्यो यात्राविचारः क्रियते। पूर्वोक्तयात्राविचारभावेष्वपि विदेशयात्रा दूराटनं वा द्वादशभावतः क्रियते। यथोक्तं जातकपारिजाते[1] -

यात्रामस्तसुतस्वकर्मभवनैर्दूराटनं रिष्फतः।
यात्रापुत्रकलत्रसौख्यमखिलं सञ्चितयेत् सप्तमात् ।

विदेशयात्राकारकराशयः-

कुण्डल्यां द्वादशराशयो भवन्ति तेषु राशिषु यात्राकारकराशयः चरसञ्ज्ञकराशयः मेषः=अग्नितत्त्वं, कर्कः=जलतत्त्वं, तुला=वायुतत्त्वं, मकरः=पृथ्वीतत्त्वञ्च वर्तन्ते।

विदेशयात्राकारकग्रहाः-

नवग्रहाः विभिन्नयोगानां कारकाः सन्ति। नवग्रहेषु मुख्याः विदेशयात्राकारकाः द्वादशेशः शनैश्चरः चन्द्रः राहुः केतुश्च वर्तन्ते, अन्ये ग्रहारपि युतिः दृष्टिसंयोगात् कारकाः भवन्ति। चन्द्रस्य चरखेचरसञ्ज्ञापि वर्तते, यतोहि चन्द्रमसः सर्वेषु ग्रहेषु सर्वाधिका गतिः विद्यते। तद्यथा[2] -

लग्नादन्त्यतदीशभानुतनयैर्दूराटनम्।

यात्राकारकग्रहस्य वायुतत्त्वं (शनैश्चरः) अस्ति चेत्तदा वायुयानेन, जलतत्त्वं (चन्द्र-शुक्रौ) तदा जलमार्गेण, पृथ्वीतत्त्वं (बुधः) च तदा राजमार्गेण यात्रा भवति।

महर्षिपराशरेण कथितं यत् पापग्रहारपि विदेशयात्राकारकाः भवन्ति। जातकस्य जन्मकुण्डल्यां

1. जातकपारिजातः, पञ्चमषष्ठभावफलाध्यायः- 13.1
2. जातकपारिजातः, दशमैकादशद्वादशभावफलाध्यायः- 15.72

द्वादशभावे पापग्रहाः, द्वादशेशः पापग्रहेण युक्तः दृष्टश्च चेद्जातकः देशाद्देशान्तरं गच्छति। तद्यथा[3] -

व्ययेशे पापसंयुक्ते व्यये वापि समन्विते।

पापग्रहेण संदृष्टे देशाद्देशान्तरं गतः।।

विश्वेऽस्मिन् बहवः देशाः सन्ति। ये देशाः आर्थिक-भौतिक-सांस्कृतिकरूपेण समृद्धाः सन्ति ते देशाः विकसितदेशाः, केचन देशाः विकासशीलदेशाः च सन्ति। जातकः विकसितदेशे विकासशीलदेशे वा गमिष्यतीत्यस्य निर्णयः लग्नेशानुसारं क्रियते। किरणोज्जवलः लग्नेशः सुस्थानेऽस्ति चेद्जातकः उत्तमदेशे गमिष्यति। नीचराशिस्थः पापग्रहराशिस्थः लग्नेशः दुःस्थाने (षष्ठाष्टमद्वादशभावेषु) अस्ति तदा स्वकीयदेशात् आर्थिकरूपेण निम्नदेशे गमिष्यति। तद्यथा[4] -

विख्यातः किरणोज्वले तनुपतौ सुस्थे सुखी वर्धनो

दुःस्थे दुःख्यसदृक्षनीचभवने वासो निकृष्टस्थले।

विदेशे भाग्योदयः-

लग्ने चरराशिः, तदीशोऽपि चरराशौ स्थितः, चरराशिस्थग्रहश्च लग्नेशं पूर्णदृष्ट्या पश्यति चेद्जातकस्य भाग्योदयो विदेशे भवति। यथोक्तं दैवज्ञवैद्यनाथेन[5] -

विदेशभाग्यं चरभे विलग्ने चरे तदीशे चरखेटदृष्टे।

विदेशे भाग्योदययोगः महादेवेन जातकतत्त्वे उक्तम्[6] -

चरेऽङ्गे तदीशे च तथा चरखेटदृष्टे विदेशे भाग्योदयः।

नवमभावे चरराशिः, तदीशोऽपि चरराशौ स्थितः, चरराशिस्थग्रहश्च नवमेशं पूर्णदृष्ट्या पश्यति चेद्जातकस्य भाग्योदयो विदेशे भवति।

दशमभावे चरराशिः, तदीशोऽपि चरराशौ स्थितः, चरराशिस्थग्रहश्च दशमेशं पूर्णदृष्ट्या पश्यति चेद्जातकः आजीविकाप्राप्त्यर्थं विदेशं करोति।

सर्वत्र भाग्योदययोगः-

लग्ने द्विस्वभावराशिः तदीशः द्विस्वभावराशौ, द्विस्वभावराशिस्थग्रहश्च लग्नेशं पूर्णदृष्ट्या पश्यति चेद्जातकस्य भाग्योदयो सर्वत्र भवति अर्थात् कदाचिद् विदेशे कदाचित् स्वदेशे च भवति। तद्यथा[7]-

अन्यथा सर्वत्र भाग्योदयः

जातकस्य जन्मकुण्डल्यां ये योगाः भवन्ति ते योगाः जन्मकालतः एव न प्रारम्भाः भवन्ति

3. बृहत्पाराशरहोराशास्त्रम्, द्वादशभावफलाध्यायः- 24.11
4. फलदीपिका, द्वादशभावफलम्-16.4
5. जातकपारिजातः, प्रथम-द्वितीयभावफलाध्यायः-11.25
6.जातकतत्त्वम्, नवमविवेकः-9.81
7. जातकतत्त्वम्, नवमविवेकः-9.83

अपितु यैः ग्रह-भाव-राश्यादिभिः विदेशादियोगाः जायन्ते ते तत्तद् ग्रहाणां दशान्तर्दशायां प्रारम्भाः भवन्ति। यथोक्तम्[8] -

दशानुसारेण फलं वदन्ति मुनीश्वराः जातशुभाशुभं यत्।
बलानुसारेण यथा हि योगो योगानुसारेण दशामुपैति ।।

विदेशयात्रायोगकारकः राहुग्रहो विद्यते अतः राहुः परदेशवासं करोति। तद्यथा[9] -

सौख्यादिवित्तस्थितिनाशनं च कलत्रपुत्रादिवियोगदुःखम्।
अतीव रोगं परदेशवासं विवादबुद्धिं कुरुते फणीशः।।

उच्चादिराशिस्थराहुः शुभग्रहैः युक्तः दृष्टश्च चेत् जातकः राहुदशायां विदेशे राजसम्मानं वस्त्रम् अलङ्कारं भूषणञ्च प्राप्नोति। तद्यथा[10] -

विदेशे राजसम्मानं वस्त्रालङ्कारभूषणम्।
शुभयुक्ते शुभैर्दृष्टे योगकारकसंयुते।।

दैवज्ञवैद्यनाथेनापि उक्तं यत् राहुदशान्तर्दशायां दूरदेशाटनं भवति। तद्यथा[11] -

जायारोगं विवाद च बुद्धिनाशं धनक्षयम्।
दूरदेशाटनं दुःखं राहौ राहुदशान्तरे।।

राहोः दशायाः अन्ते जातकस्य देशात् निष्कासनं अर्थात् स्वकीयदेशात् अन्यस्मिन् देशे विदेशे वा गमनं भवति। तद्यथा[12] -

राहोर्दशान्ते सर्वस्वनाशो मरणबन्धने।
देशान्निर्वासनं वा स्यात् कष्टं वा महदश्नुते।।

सूर्यात् पापग्रहेण युक्तः केतुः अष्टमे द्वादशे वा भवेत्तदा जातकः सूर्यदशायां केत्वन्तर्दशायां विदेशगमनं शत्रुपीडां महद्भयञ्च प्राप्नोति। तद्यथा[13] -

विदेशगमनं चैव शत्रुपीडां महद्भयम्।।

चन्द्रदशायां शुक्रसूर्ययोः अन्तर्दशायां विदेशयात्रायोगः-

चन्द्रात् पापग्रहेण युक्तः शुक्रः षष्ठे अष्टमे द्वादशे वा भवेत्तदा जातकः चन्द्रदशायां शुक्रान्तर्दशायां विदेशवासं दुःखं मृत्युतुल्यकष्टं चौरादिपीडाञ्च प्राप्नोति। तद्यथा[14] -

---

8. जातकपारिजातः, दशाफलाध्ययायः-18.1
9. जातकपारिजातः, दशाफलाध्ययायः-18.96
10. बृहत्पाराशरहोराशास्त्रम्, दशाफलाध्ययायः-48.38
11. जातकपारिजातः, दशाफलाध्ययायः-18.97
12. बृहत्पाराशरहोराशास्त्रम्, चरादिराशिदशाफलाध्यायः-51.46
13. बृहत्पाराशरहोराशास्त्रम्, रविदशान्तर्दशाफलाध्यायः- 53.61
14. बृहत्पाराशरहोराशास्त्रम्, चन्द्रदशान्तर्दशाफलाध्यायः- 54.62

दायेशाद् रिपुरन्ध्रस्थे व्यये वा पापसंयुते।

विदेशवासदुःखार्त्तिमृत्युचौरादिपीडनम्।।

चन्द्रात् पापग्रहेण युतः सूर्यः अष्टमे द्वादशे वा भवेत्तदा विदेशगमने पीडां प्राप्नोति। तद्यथा[15] -

विदेशगमने चार्त्तिर्भवत्येव न संशयः।।

भौमदशायां राहु-शनैश्चर-बुध-सूर्याणाम् अन्तर्दशायां विदेशयात्रायोगः-

उच्चादिराशिस्थः शुभग्रहैः युक्तः दृष्टश्च राहुः केन्द्रे त्रिकोणे लाभे वा भवेत्तदा भौमदशायां राह्वन्तर्दशायां गङ्गास्नानफलावाप्तिं विदेशगमनञ्च प्राप्नोति। तद्यथा[16] -

गङ्गास्नानफलावाप्तिर्विदेशगमनं तथा।।

भौमतः शनैश्चरः केन्द्रे त्रिकोणे लाभे वा भवेत्तदा भौमदशायां शनैश्चरान्तर्दशायां गङ्गास्नानफलावाप्तिं विदेशगमनञ्च प्राप्नोति। तद्यथा[17] -

विदेशयानं लभते दुष्कीर्त्तिरर्विविधा तथा।।

नीचास्तङ्गतस्थो बुधः षष्ठाष्टमद्वादशस्थाने वा स्यात्तदा जातकः विदेशगमनं नानारोगञ्चाप्नोति। तद्यथा[18]-

विदेशगमनं चैव नानारोगस्तथैव च।।

स्वोच्चराशि-भाग्यकर्मेशसंयुतस्थः सूर्यः केन्द्रे मूलत्रिकोणे लाभे वा भवेत्तदा भौमदशायां सूर्यान्तर्दशायां व्यवसायात् फलाधिक्यं विदेशे राजदर्शनञ्च प्राप्नोति। तद्यथा[19] -

व्यवसायात् फलाधिक्यं विदेशे राजदर्शनम्।।

राहुदशायां शनैश्चर-शुक्र-सूर्याणाम् अन्तर्दशायां विदेशयात्रायोगः-

राहुकेतू त्रिकोणस्थौ, तयोः दशायां पुत्रपीडा धनक्षयः परदेशाटनं कष्टं भयञ्च भवति। तद्यथा[20]-

राहौ केतौ त्रिकोणस्थे सुतार्त्तिर्द्रविणक्षयः।

परदेशाटनं कष्टं भीतिः सर्वत्र जायते।।

पूर्वमुक्तं यत् शनैश्चरोऽपि दूरदेशनिवासं करोति। अतः राहुदशायां शनैश्चरान्तर्दशायां विदेशयात्रा भवति। तद्यथा[21] -

वातपित्तकृतं रोगं बन्धुमित्रादिपीडनम्।

दूरदेशनिवासं च शनौ राहुदशान्तरे।।

15.बृहत्पाराशरहोराशास्त्रम्, चन्द्रदशान्तर्दशाफलाध्यायः- 54.68
16. बृहत्पाराशरहोराशास्त्रम्, भौमदशान्तर्दशाफलाध्यायः- 55.10
17. बृहत्पाराशरहोराशास्त्रम्, भौमदशान्तर्दशाफलाध्यायः- 55.30
18. बृहत्पाराशरहोराशास्त्रम्, भौमदशान्तर्दशाफलाध्यायः- 55.39
19. बृहत्पाराशरहोराशास्त्रम्, भौमदशान्तर्दशाफलाध्यायः- 55.65
20. बृहत्पाराशरहोराशास्त्रम्, चरादिराशिदशाफलाध्यायः-51.60
21.जातकपारिजातः, दशाफलाध्ययायः-18.99

राहुतः पापसंयुतः शनैश्चरः षष्ठे अष्टमे द्वादशे वा भवेत्तदा अन्यदेशादिषु सञ्चारो भवति। तद्यथा[22]-

अन्यदेशादिसञ्चारो गुल्मवद्व्याधिभाग्भवेत्।

राहुतः सूर्यः केन्द्रे त्रिकोणे तृतीये एकादशे वा भवेत्तदा राहुदशायां सूर्यान्तर्दशायां विदेशे राजसम्मानं शुभप्रदकल्याणञ्चाप्नोति। तद्यथा[23] -

विदेशे राजसम्मानं कल्याणं च शुभावहम्।

शुक्रः वाहन-छत्र-चामर-सम्पदां कारकोऽस्ति। अतः जातकः राहुदशायां शुक्रान्तर्दशायां विदेशे वाहन-छत्र-चामर-सम्पदः प्राप्नोति। तद्यथा[24] -

विदेशाद्वाहनप्राप्तिश्छत्रचामरसम्पदः।
रोगारिबन्धुभीतिः स्यात् शुक्रे राहुदशान्तरे।।

गुरुदशायां बुधचन्द्रराहूणाम् अन्तर्दशायां विदेशयात्रायोगः-

गुरोः पापयुक्तः बुधः शुभग्रहदृष्टिं विना षष्ठे अष्टमे द्वादशस्थाने वा भवेत्तदा गुरुदशायां बुधान्तर्दशायां धनधान्यरहितो विदेशगमनं मार्गे चौरभयं व्रणदाहाक्षिरोगी नानादेशाटनञ्च करोति। तद्यथा[25]-

विदेशगमनं चैव मार्गे चौरभयं तथा।
व्रणदाहाक्षिरोगश्च नानादेशाटनं भवेत्।।

गुरुतः पापसंयुतः चन्द्रः षष्ठाष्टमद्वादशस्थानेषु भवेत्तदा गुरुदशायां चन्द्रान्तर्दशायां विदेशयात्रा भवति। तद्यथा[26] -

मानार्थबन्धुहानिश्च विदेशषरिविच्युतिः।

गुरोः स्वोच्चादिस्थः केन्द्राधिपसंयुतः राहुः केन्द्रे त्रिकोणे वा भवेत्तदा गुरुदशायां राह्वन्तर्दशायां दूरयात्राधिगमनं भवति। तद्यथा[27]-

दूरयात्राधिगमनं पुण्यधर्मादिसङ्ग्रहः।

शनैश्चरदशायां शनिभौमराहुगुरूणाम् अन्तर्दशायां विदेशयात्रायोगः-

नीचस्थः पापसंयुतः शनैश्चरः भवेत्तदा शनैश्चरदशान्तर्दशायां देशत्यागो भवति। तद्यथा[28]-

---

22. बृहत्पाराशरहोराशास्त्रम्, राहुदशान्तर्दशाफलाध्यायः- 56.27
23. बृहत्पाराशरहोराशास्त्रम्, राहुदशान्तर्दशाफलाध्यायः- 56.66
24. जातकपारिजातः, दशाफलाध्ययायः-18.102
25.बृहत्पाराशरहोराशास्त्रम्, गुरुदशान्तर्दशाफलाध्यायः-57.25-26
26. बृहत्पाराशरहोराशास्त्रम्, गुरुदशान्तर्दशाफलाध्यायः-57.60
27. बृहत्पाराशरहोराशास्त्रम्, गुरुदशान्तर्दशाफलाध्यायः-57.72
28. बृहत्पाराशरहोराशास्त्रम्, शनिदशान्तर्दशाफलाध्यायः-58.5

मध्ये चौरादिभीतिश्च देशत्यागो मनोरुजा।

लग्नात् नीचस्थः पापदृष्टसंयुतः अस्तङ्गतः शनैश्चरः अष्टमे द्वादशे वा भवेत्तदा शनैश्चरदशान्तर्दशायां भौमान्तर्दशायां विदेशगमनं बहुविधप्रकारेण धननाशश्च जायते। तद्यथा[29] -

विदेशगमनं चैव नानामार्गे धनव्ययः।

शनैश्चरस्य दशायां राह्वन्तर्दशायां विदेशगमनं गृहक्षेत्रादिनाशनञ्च भवति। तद्यथा[30] -

विदेशगमनं चैव गृहक्षेत्रादिनाशनम्।

नीचस्थः पापसंयुतः गुरुः षष्ठे अष्टमे द्वादशभावे वा भवेत्तदा शनैश्चरदशायां गुर्वन्तर्दशायां विदेशयात्रा कुष्ठरोगादिसम्भवश्च भवति। तद्यथा[31]-

विदेशगमनं चैव कुष्ठरोगादिसम्भवः।

बुधदशायां शन्यन्तर्दशायां विदेशयात्रायोगः-

बुधात् शनैश्चरः अष्टमे द्वादशे वा भवेत्तदा बुधदशायां शनैश्चरान्तर्दशायां विदेशगमनं दुःस्वप्नदर्शनञ्च भवति। तद्यथा[32]-

विदेशगमनं चैव दुष्टस्वप्नावलोकनम्।

बुधदशायां सूर्यान्तर्दशायां विदेशयात्रायोगः-

लग्नात् पापग्रहयुक्तः सूर्यः अष्टमे द्वादशे वा भवेत्तदा बुधदशायां सूर्यान्तर्दशायां विदेशगमनं चौराहिव्रणपीडनञ्च भवति। तद्यथा[33] -

विदेशगमनं चैव चौराहिव्रणपीडनम्।

केतोः दशायां केन्तु-चन्द्र-भौम-गुरूणामन्तर्दशायां विदेशयात्रायोगः-

उच्चादिराशिस्थकेतुः शुभग्रहैः युक्तः दृष्टश्च केन्द्रे त्रिकोणे लाभे वा चेत्तदा जातकः केतुदशायां देशग्रामाधिपत्यं वाहनं पुत्रं देशान्तरप्रयाणम् अतिसुखञ्चाप्नोति। तद्यथा[34] -

देशग्रामाधिपत्यं च वाहनं पुत्रसम्भवम्।
देशान्तरप्रयाणं ततोऽप्यतिसुखं वदेत्।।

केतुः धने रन्ध्रे व्यये वा पापग्रहैः युक्तः दृष्टश्च चेत्तदा जातकः केतुदशायाः अन्ते दूराटनं देहविश्रमणञ्च प्राप्नोति। तद्यथा[35] -

---

29. बृहत्पाराशरहोराशास्त्रम्, शनिदशान्तर्दशाफलाध्यायः-58.58
30. बृहत्पाराशरहोराशास्त्रम्, शनिदशान्तर्दशाफलाध्यायः-58.62
31. बृहत्पाराशरहोराशास्त्रम्, शनिदशान्तर्दशाफलाध्यायः-58.74
32. बृहत्पाराशरहोराशास्त्रम्, बुधदशान्तर्दशाफलाध्यायः-59.69
33. बृहत्पाराशरहोराशास्त्रम्, केतुदशान्तर्दशाफलाध्यायः-60.19
34. बृहत्पाराशरहोराशास्त्रम्, दशाफलाध्यायः-48.72
35. बृहत्पाराशरहोराशास्त्रम्, दशाफलाध्यायः-48.75

अन्ते दूराटनं चैव देहविश्रमणं तथा।
धने रन्ध्रे व्यये केतौ पापग्रहयुतेक्षिते।।

केतोः चन्द्रः केन्द्रे त्रिकोणे लाभे वा भवेत्तदा केतुदशायां चन्द्रान्तर्दशायां राजभयं विदेशगमनं दूर यात्रादिसञ्चारश्च भवति। तद्यथा[36] -

अन्ते तु राजभीतिश्च विदेशगमनं तथा।
दूरे यात्रादिसञ्चारः सम्बन्धिजनपूजनम्।।

केतोः भौमः द्वितीये अष्टमे द्वादशे वा भवेत्तदा केतुदशायां भौमान्तर्दशायां विदेशे आपदा भवति। तद्यथा[37]-

द्रुतं करोति मरणं विदेशे चापदं भ्रमम्।

केतोः शुभग्रहयुक्तः गुरुः केन्द्रे त्रिकोणे तृतीये लाभे वा भवेत्तदा केतुदशायां गुर्वन्तर्दशायां दूरदेशप्रयाणं स्वबन्धुजनपोषणञ्च भवति। तद्यथा[38] -

दूरदेशप्रयाणं च स्वबन्धुजनपोषणम्।

शुक्रदशायां चन्द्रान्तर्दशायां विदेशयात्रायोगः-

शुक्राद् नीचस्थः अस्तङ्गतश्च चन्द्रः षष्ठे अष्टमे द्वादशे वा भवेत्तदा शुक्रदशायां चन्द्रान्तर्दशायां विदेशगमनं तीर्थयात्रादिकञ्च भवति। तद्यथा[39] -

विदेशगमनं चैव तीर्थयात्रादिकं फलम्।

विदेशयात्रायां ये कारकग्रहाः उक्ता ते प्रायः पापग्रहाः सन्ति यथा- जातकस्य जन्मकुण्डल्यां द्वादशभावे पापग्रहाः, द्वादशेशः पापग्रहेण युक्तः दृष्टश्च चेद्जातकः देशाद्देशान्तरं गच्छति। द्वादशेशः शनैश्चरः चन्द्रः भौमः राहुः केतुश्च। अनेन ज्ञायते यत् विदेशगमनं शुभयोगो नास्ति। प्राचीनकाले विदेशगमनं कष्टकरम् आसीत् परञ्च वर्तमानकाले विदेशयात्रा महती उपलब्धिः मन्यते। अधिकाः भारतीयाः धनार्जनाय विदेशं गच्छन्ति। वर्तमानकाले जनाः अर्थार्जने प्राधान्यं ददति। पुराकाले भारतीयानां दर्शनम् "तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्यस्विद्धनम्" तीर्थाटनम् ईश्वरप्राप्तिश्च मुख्यम् अर्थार्जनञ्च गौणमासीत्।

---

36. बृहत्पाराशरहोराशास्त्रम्, केतुदशान्तर्दशाफलाध्यायः-60.33
37. बृहत्पाराशरहोराशास्त्रम्, केतुदशान्तर्दशाफलाध्यायः-60.41
38. बृहत्पाराशरहोराशास्त्रम्, केतुदशान्तर्दशाफलाध्यायः-60.58
39. बृहत्पाराशरहोराशास्त्रम्, शुक्रदशान्तर्दशाफलाध्यायः-61.26

सामुद्रिकशास्त्रीयं सत्त्वविवेचनम्

उमाकान्ततिवारी
शोधच्छात्रः

सत्त्वम् इत्यस्य अर्थो भवति मनः। सत्त्वं मनुष्यस्य मानसिकं स्वभावं द्योतयति। सामुद्रिकशास्त्रानुसारं यथा पाञ्चभौतिकी प्रकृतिः मनुष्यस्य शारीरिकं भावं बलाबलादिकं द्योतयति, तथैव सत्त्वं व्यक्तेः मानसिकं स्वभावं द्योतयति। सत्त्वपरीक्षणेन मानवस्य स्वभावज्ञानं ततः तस्य सामाजिक-अवस्थायाः ज्ञानं भवति। आधुनिकाः सामाजिक- मनोविज्ञानिनः अपि व्यक्तेः सामाजिकपरिस्थितिं ज्ञातुम् अप्रत्यक्षतया सामुद्रिकशास्त्रीयंसत्त्वपरीक्षणमिदम् अनुसरन्त्येव। अतः सामुद्रिकशास्त्री व्यक्तेः सत्त्वपरीक्षणं विधाय समाजे तस्य प्रभावं ततश्च सामाजिकपरिस्थितेः परिवर्तनार्थम् उचितं मार्गदर्शनं कर्तुं पारयति इति । वराहमिहिरेण सामुद्रिकस्य विषयकथनक्रमे सत्त्वम् अपि निर्दिष्टम्[1] —

उन्मानमानगतिसंहतिसारवर्णस्नेहस्वरप्रकृतिसत्वमनूकमादौ।
क्षेत्रं मृजां च विधिवत् कुशलोऽलोक्यसामुद्रिविद्वदति यातमनागतं च॥

वस्तुतः सत्त्वम् अर्थात् व्यक्तेः मानसिकः स्वभावः त्रिविधः एव भवति- सात्त्विकः राजसः तामसश्चेति। भगवद्गीतायां सत्त्वं रजः तमश्चेति यः त्रिगुणः निर्दिष्टस्तेषामन्यतमेन एव प्रभावितः मनुष्यः तत्सत्त्वः अथवा तन्मनाः भवति। अर्थात् तस्य पुरुषस्य मनः सात्त्विकं राजसं तामसं वा भवति इति।

सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः ।
निबध्नन्ति महाबाहो देहे देहिनमव्ययम् ।।[2]

सात्त्विकादीनां मानसिकप्रकृतीनां सम्यगवगमनार्थम् आदौ सत्त्व-रजस्तमसां गुणानां सम्यग्बोधः आवश्यको भवति। तद्भगवद्गीतायां निरूपितं वर्तते यथा[3] —

तत्र सत्त्वं निर्मलत्वात्प्रकाशकमनामयम् ।
सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघः ॥
रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम् ।
तन्निबध्नाति कौन्तेय कर्मसङ्गेन देहिनम् ॥
तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम् ।
प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत ॥

अर्थात्—सत्त्वगुणः निर्मलः प्रकाशकः विकाररहितश्च भवति। सः सुखस्य ज्ञानस्य च दायको भवति। रागरूपः रजोगुणः तृष्णायुक्तो भवति। सः कर्मणे प्रेरयति, कर्मफले आसक्तिं च योजयति। अज्ञानरूपस्तमोगुणः मोहकरो भवति। सः प्रमादम् आलस्यं निद्रां च जनयति।

यद्यपि एते त्रयो गुणाः साम्यरूपेण सर्वेषु मनुष्येषु भवन्त्येव, तथापि मनुष्यः केनचित्

1. वृहत्संहिता-६७/१
2.श्रीमद्भगवद्गीता-१४/ ५
3. श्रीमद्भगवद्गीता-१४/६-८

गुणैकेन गुणद्वयेन वा अतिप्रभावितो भवति। कश्चित् जितेन्द्रियः मनुष्यः त्रिगुणसाम्योऽपि भवति। वृहत्पाराशरहोराशास्त्रे एतेषां गुणानांमानवेषु प्रभावाः निरूपिताः वर्तन्ते। तद्यथा[4] –

शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च ।
अलोभः सत्यवादित्वं जने सत्त्वाधिके गुणाः॥

अर्थात्– यस्मिन् मनुष्ये सत्त्वगुणः अधिको भवति, सः शम-दम-तपोगुणैर्युक्तः शुचिः क्षमाशीलः सरलः लोभरहितः सत्यवादी च भवति।

शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम् ।
साधूनां रक्षणं चेति गुणाः ज्ञेयाः रजोऽधिके ॥[5]

अर्थात् – यस्मिन् मनुष्ये रजोगुणः अधिको भवति, सः शूरः तेजस्वी धैर्यवान् दक्षः युद्धाभीरुः साधुरक्षाकृद्भवति।

लोभश्चासत्यवादित्वं जाड्यमालस्यमेव च ।
सेवाकर्मपटुत्वं च गुणा एते तमोऽधिके ॥[6]

यस्मिन् तमोगुणस्यआधिक्यं भवति, सः लोभी असत्यवादी जडस्वभावः अलसः तथा च भृत्यकर्मकरः भवति।

कृषिकर्मणि वाणिज्ये पटुत्वं पशुपालने ।
सत्यासत्यप्रभाषित्वं गुणसाम्ये गुणा इमे ॥[7]

गुणत्रये साम्ये सति मनुष्यः कृषिकर्मणि वाणिज्ये पशुपालने चापि कुशलो भवति। सः आवश्यकतानुसारं सत्यम् असत्यञ्चापि वदति।

एवं गुणानाम् आधिक्येन अथवा एकाधिकगुणनाम् प्रभावेण व्यक्तेः गुणजन्यप्रभावो भवति। एतेषां गुणानां न्यूनाधिकरूपेण प्रभावकारणादेव व्यक्तेः सत्त्वस्य निर्धारणं भवति। चरकसंहिताख्ये आयुर्वेदग्रन्थे गुणाधारेण मनुष्यस्य सत्त्वं निरूपितं वर्तते। तद्यथा –

त्रिविधं खलु सत्त्वम्– शुद्धं राजसं तामसमिति। तत्र शुद्धमदोषमाख्यातं कल्याणांशत्वात्, राजसं – सदोषमाख्यातं रोषांशत्वात्, तामसमपि सदोषमाख्यातं मोहांशत्वात्।[8]

अर्थात्– सत्त्वं त्रिविधं भवति शुद्धम् अर्थात् सात्त्विकंराजसिकंतामसिकं च। शुद्धं कल्याणांशत्वात् दोषरहितं भवति, राजसं रोषांशत्वात् सदोषं भवति। तामसम् अपि मोहांशत्वात् सदोषम् इति उच्यते। सुश्रुतसंहितायाम् अपि सात्विकादीनां गुणाः निर्दिष्टाः सन्ति –

4. वृहत्पाराशरहोराशास्त्रम्-४७/५
5. वृहत्पाराशरहोराशास्त्रम्-४७/६
6. वृहत्पाराशरहोराशास्त्रम्-४७/७
7. वृहत्पाराशरहोराशास्त्रम्-४७/८
8. चरकसंहिता / शारीरस्थानम्/ ४/३६

सात्विकास्तु आनृशंस्यं संविभागरुचिता तितिक्षा सत्यं धर्म आस्तिक्यं ज्ञानं बुद्धिर्मेधा स्मृतिर्धृति- रनभिषङ्गश्च ।।[9]

अक्रूरकर्मकारित्वं संविभज्य भोक्तुम् इच्छा, क्षमा, सत्यम्, धर्मः, आस्तिकता, ज्ञानम्, बुद्धिः, मेधा, स्मृतिः, धृति, अनभिषङ्गः च एते सात्विकगुणाः सन्ति।

सात्विकेषु ब्राह्मसत्त्वम् –

शौचमास्तिक्यमभ्यासो वेदेषु गुरुपूजनम् ।
प्रियातिथित्वमिज्या च ब्रह्मकायस्य लक्षणम् ।।[10]

अर्थात् – पवित्रता, आस्तिकता, वेदाभ्यासः, गुरुणां पूजा, अतिथीनां सेवा, यज्ञं च एतानि ब्रह्मकायस्य अथवा ब्रह्मसत्त्वस्य लक्षणानि भवन्ति।

ऐन्द्रसत्त्वम् –

माहात्म्यं शौर्यमाज्ञा च सततं शास्त्रबुद्धिता ।
भृत्यानां भरणं चापि माहेन्द्रं कायलक्षणम् ।।[11]

अर्थात् –महाशयत्वं, शौर्यम्, आज्ञा, शास्त्रबुद्धित्वं, भृत्यानां भरणं च माहेन्द्रकायस्य लक्षणानि भवन्ति ।

वरुणसत्त्वम् –

शीतसेवा सहिष्णुत्वं पैङ्गल्यं हरिकेशता ।
प्रियवादित्वमित्येतद्वारुणं कायलक्षणम् ।।[12]

अर्थात् – शीतवस्तुनां सेवा, सहिष्णुता, पिङ्गलवर्णभासता, वानराणाम् इव केशः, प्रियवादिता च एतानि वारुणकायस्य लक्षणानि भवन्ति।

कौबेरसत्त्वम् –

मध्यस्थता सहिष्णुत्वमर्थस्यागमसञ्चयौ ।
महाप्रसवशक्तित्वं कौबेरं कायलक्षणम् ।।[13]

अर्थात् –सर्वकार्येषु मध्यममार्गशीलता, सहिष्णुता, धनस्य आगमः सञ्चयश्च, अतिपूत्रोत्पादन-शक्तिः च एतानि कौबेरकायस्य लक्षणानि भवन्ति ।

गन्धर्वसत्त्वम् –

गन्धमाल्यप्रियत्वं च नृत्यवादित्रकामिता ।

---

9. सुश्रुतसंहिता / शारीरिकस्थानम् / १ / १८
10. सुश्रुतसंहिता / शारीरिकस्थानम् / ४ / ८१
11. सुश्रुतसंहिता / शारीरिकस्थानम् / ४ / ८२
12. सुश्रुतसंहिता / शारीरिकस्थानम् / ४ / ८३
13. सुश्रुतसंहिता / शारीरिकस्थानम् / ४ / ८४

विहारशीलता चैव गान्धर्वं कायलक्षणम् ।।[14]

अर्थात्- गन्धमाल्यप्रियत्वम्, नृत्य-वादित्रकामिता, विहारशीलता च एतानि गान्धर्वकायस्य लक्षणानि भवन्ति।

याम्यसत्त्वम् –

प्राप्तकारी दृढोत्थानो निर्भयः स्मृतिमाञ्छुचिः ।
रागमोहमदद्वेषैर्वर्जितो याम्यसत्त्ववान् ।।[15]

अर्थात्– उपस्थितकार्यस्य शीघ्रसम्पादनशीलः, दृढोत्थानः, निर्भयः, स्मृतिमान्, शारीरिक-मानसिक शुचितायुक्तः, राग-मोह-मद-द्वेषैः मानसिकविकारैः वर्जितः च पुरुषः याम्यसत्त्ववान् भवति।

आर्षसत्त्वम् –

जपव्रतब्रह्मचर्यहोमाध्ययनसेविनम् ।
ज्ञानविज्ञानसंपन्नमृषिसत्वं नरं विदुः ।।[16]

अर्थात् – जपम्, व्रतम्, ब्रह्मचर्यम्, होमम्, अध्ययनशीलता, ज्ञान-विज्ञानशीलता च एतानि आर्षसत्त्वस्य अथवा ऋषिकायस्य लक्षणानि भवन्ति। एतानि सप्त सात्त्विकानि सत्त्वानि कल्याणार्थकानि भवन्ति। सुरनरादीनां सत्त्वानां निरूपणम् अत्र क्रियते।

सुरसत्त्वम् –

त्यागरतिः सस्नेहः सुरस्वभावेन पृथुकोपः ।।[17]

सुरः अर्थात् देवः। सुरसत्त्ववान् नरः देवतुल्यः भवति। सः त्यागशीलः, स्नेहयुक्तः, अल्पकोपश्च भवति।

वृहत्संहितायाम् अपि –

त्यागयुतः पुरुषो मृदुकोपः स्नेहरतश्च भवेत् सुरसत्वः ।[18]

अर्थात् – त्यागशीलः, अल्पकोपः, स्नेहयुक्तश्च नरः सुरसत्ववान् भवेत् ।

नरसत्त्वः –

भूषणगीतप्रवणो नरस्वभावेन संविभागी स्यात् ।।[19]

अर्थात् - नरसत्त्ववान् नरः वस्त्र-आभूषणादीनां शृङ्गारवस्तूनां इच्छुकः, गीतादिमनोरञ्जनप्रियः च भवति। सः भोज्यादीनि भोगवस्तूनि विभज्य सेवते।

वृहत्संहितायाम् अपि –

---

14. सुश्रुतसंहिता / शारीरिकस्थानम् / ४ / ८५
15. सुश्रुतसंहिता / शारीरिकस्थानम् / ४ / ८६
16. सुश्रुतसंहिता / शारीरिकस्थानम् / ४ / ८७
17. सामुद्रिकशास्त्रम्-२/६४
18. वृहत्संहिता / ६७ / १११
19. सामुद्रिकशास्त्रम् / २ / ६५

मर्त्यसत्वसंयुतो गीतभूषणप्रियः । संविभागशीलवान् नित्यमेव मानवः ।।[20]

अर्थात् –पुरुषसत्ववान् मानवः गीतप्रियः आभूषणप्रियः च भवति । सः नित्यं परस्परं विभज्य भोगवस्तूनां सेवनं कुरुते ।

रक्षःप्रकृतिः –

दुर्जनचेष्टः पापो रक्षःप्रकृतिः खरक्रोधः ।।[21]

अर्थात्– रक्षःप्रकृतिः मनुष्यः दुर्जनः इव चेष्टते।सः प्रचण्डक्रोधी, पापकर्मा च भवति।

वृहत्संहितायाम् अपि –

तीक्ष्णप्रकोपः खलचेष्टितश्च पापश्च सत्त्वेन निशाचराणाम् ।[22]

अर्थात् – निशाचरप्रकृतिकः मनुष्यः तीक्ष्णप्रकोपः, दुष्टचेष्टावान् पापी च भवति।

पिशाचसत्त्वम् –

भवति पिशाचप्रकृतिः स्थूलो मलिनश्च प्रलापी च ।।[23]

अर्थात् – पिशाचप्रकृतिकः पुरुषः स्थूलकायः मलिनः प्रलापी च भवति ।

वृहत्संहितायाम् अपि –

पिशाचसत्वश्चपलो मलाक्तो बहुप्रलापी च समुल्वणाङ्गः ।।[24]

अर्थात् – पिशाचसत्ववान् नरः चञ्चलस्वभावः मलिनः बहुप्रलापी स्थूलकायः च भवति।

तिर्यक्सत्त्वम् –

क्षुद्रानुगतस्तिर्यक्प्रकृतिर्बहुभुक् भवेन्मनुजः ।।[25]

अर्थात् – तिर्यक्प्रकृतिकः मनुष्यः क्षुद्रसङ्गतः, अतिभोजी च भवति ।

वृहत्संहितायाम् अपि –

भीरुः क्षुधालुर्बहुभुक् च यः स्याद् ज्ञेयश्च सत्वेन नरस्तिरश्चाम् ।।[26]

अर्थात्– यः मनुष्यः सर्वदा भीरुस्वभावः क्षुधालुः अतिभुक्त च स्यात् सः तिर्यक्प्रकृतिकः भवेत्।

राजसगुणाः –

राजसास्तु–**दुःखबहुलताऽटनशीलताऽधृतिरहङ्कार आनृतिकत्वमकारुण्यं दम्भो मानो हर्षः कामः क्रोधश्च।।**[27]

---

20. वृहत्संहिता / ६७ / ११२
21. सा.शा. / २ / ६५
22. वृ.सं. / ६७ / ११३
23. सा.शा. / २ / ६६
24. वृ.सं. / ६७ / ११३
25. सा.शा. / २ / ६६
26. वृ.सं. / ६७ / ११४
27. सुश्रुतसंहिता / शारीरिकस्थानम् / १ / १८

अर्थात् – दुःखबहुलता, अटनशीलता, अधैर्यम्, अहङ्कारः, मिथ्यावचनशीलता, अकारुण्यम्, दम्भः, अभिमानत्वम्, हर्षः, कामः, क्रोधश्च एते राजसगुणाः सन्ति।

राक्षससत्वम्–

एकान्तग्राहिता रौद्रमसूया धर्मबाह्यता ।
भृशमात्रं तमश्चापि राक्षसं कायलक्षणम् ॥[28]

अर्थात् – एकान्तग्राहिता, रौद्रम्, असूया, धर्मबाह्यता, अत्यधिकं तामसप्रवृत्तिः च राक्षसकायस्य लक्षणं भवति।

पैशाचसत्त्वम् –

उच्छिष्टाहारता तैक्ष्ण्यं साहसप्रियता तथा ।
स्त्रीलोलुपत्वं नैर्लज्ज्यं पैशाचं कायलक्षणम् ॥[29]

पैशाचकायः पुरुषः उच्छिष्टभोजी, तीक्ष्णस्वभावः, साहसप्रियः, स्त्रीलोलुपः, निर्लज्जः च भवति। अथवा एतानि पैशाचकायस्य लक्षणानि भवन्ति।

सार्पसत्त्वम् –

तीक्ष्णमायासिनं भीरुं चण्डं मायान्वितं तथा ।
विहाराचारचपलं सर्पसत्वं विदुर्नरम् ॥[30]

तीक्ष्णस्वभावयुक्तम्, श्रमशीलम्, प्रचण्डम्, मायाविनम्, विहार-आचारादिषु चञ्चलस्वभावं नरम् सर्पसत्वम् इति जानीयात् ।

प्रैतसत्त्वम् –

असंविभागमलसं दुःखशीलमसूयकम् ।
लोलुपं चाप्यदातारं प्रेतसत्त्वं विदुर्नरम् ॥[31]

अर्थात् – अविभज्य एकाकी भोजनशीलं, आलस्ययुक्तम्, सर्वदा दुःखिनं, परगुणेषु दोषारोपण-शीलम्, लोलुपम्, अदानशीलं च पुरुषं प्रेतसत्त्वयुक्तं जानीयात्।

तामसगुणाः –

तामसास्तु-**विषादित्वं नास्तिक्यमधर्मशीलता बुद्धेर्निरोधोऽज्ञानं दुर्मेधस्त्वमकर्मशीलता निद्रालुत्वं चेति॥**[32]

अर्थात् – मूढता, नास्तिकता, अधर्मशीलता, बुद्धेः निरोधः, अज्ञानम्, दुर्बुद्धिता, अकर्मण्यता, निद्रालुता च एते तामसगुणाः भवन्ति ।

---

28. सुश्रुतसंहिता / शारीरिकस्थानम् / ४ / ९१-९२
29. सु.सं.शा.-४/९२-९३
30. सुश्रुतसंहिता / शारीरिकस्थानम् / ४ / ८९-९०
31. सुश्रुतसंहिता / शारीरिकस्थानम् / ४ / ९३-९४
32. सुश्रुतसंहिता / शारीरिकस्थानम् / १ / ९८

तामसेषु पाशवसत्त्वम् –

दुर्मेधस्त्वं मन्दता च स्वप्ने मैथूननित्यता ।
निराकरिष्णुता चैव विज्ञेयाः पाशवाः गुणाः ।।[33]

अर्थात् – पाशवसत्त्वयुक्तः पुरुषः दुर्बुद्धिः मन्दबुद्धिः च भवति, स्वप्ने एव मैथूनं पश्यति करोति च, अन्येषां तिरस्कारं च करोति।

मात्स्यसत्त्वम् –

अनवस्थितता मौर्ख्यं भीरुत्वं सलिलार्थता ।
परस्पराभिमर्दश्च मत्स्यसत्वस्य लक्षणम् ।।[34]

अर्थात्– मात्स्यसत्त्वयुक्तः पुरुषः अस्थिरः, मुर्खः, भीरुः, नित्यजलेच्छुकः, परस्परं कलहरतश्च भवति।

वानस्पत्यसत्त्वम् –

एकस्थानरतिर्नित्यमाहारे केवले रतः ।
वानस्पत्यो नरः सत्त्वधर्मकाममार्थवर्जितः ।।[35]

अर्थात् –वानस्पतसत्त्वयुक्तः मनुष्यः एकस्मिन् स्थाने एव वसितुमिच्छति। सः आहारप्रियः केवलं भोजने रतः पुरुषार्थरहितश्च भवति। एवं व्यक्तीनां स्वभावं जीवनशैलीं च विज्ञाय तदनुसारम् तेषां प्रकृतिसत्त्वानां ज्ञानं भवति। सामुद्रिकशास्त्राख्ये ग्रन्थे गाम्भीर्यम् एव सत्त्वम् इति विशेषतया निर्दिष्टं वर्तते। यथा –

व्यसने वाभ्युदये वा गतशङ्काशोकाकुलितोत्साहम् ।
उन्मीलनधीरत्त्वं गम्भीरमिह कीर्त्यते सत्त्वम् ।।[36]

अर्थात् यः विपत्तौ उन्नतौ वा शङ्का-शोक-व्याकुलताभिः रहितः, सर्वदा उत्साहयुक्तः धैर्यवान् च भवति, तस्य गम्भीरसत्त्वम् इति कथ्यते ।

---

33. सुश्रुतसंहिता / शारीरिकस्थानम् / ४ / ९५
34. सुश्रुतसंहिता / शारीरिकस्थानम् / ४ / ९६
35. सुश्रुतसंहिता / शारीरिकस्थानम् / ४ / ९७
36. सामुद्रिकशास्त्रम् / ३ / ३६

गोलपृष्ठफले भास्कराचार्यमतम्

डॉ. विजयानन्द अडिगः
सहायकाचार्यो ज्योतिषविभागे
राष्ट्रियसंस्कृतसंस्थानम्, गुरुवायूर-परिसरः
पुरनाट्टुकरा-680551, त्रिचूर-केरल
e-mail:- adiga.vijaya@gmail.com
चलदूरवाणी-8921294545

पुरान्तरं चेदिदमुत्तरं स्यात्तदक्षविश्लेषलवैस्तदा किम्।[1]

चक्रांशकैरित्यनुपातयुक्त्या युक्तं निरुक्तं परिधेः प्रमाणम्॥ इति प्रदेशद्वयाक्षांशान्तरं योजनात्मकं दूरं च विज्ञाय अक्षांशान्तरैः तानि योजनानि लभ्यन्ते चेत् चक्रांशैः (३६० अंशैः) किमित्यनुपातेन भूपरिधियोजनानि लभ्यन्ते। तानि च सप्ताङ्गनन्दाब्धिमितानि (४९६७)।

परिधिः खबाणसूर्यैर्गुणितो भक्तोभनन्दाग्निभिः।

व्यासो ज्ञेयो वा शैलगुणो द्वाविंशत्याभक्तः।।[2] एवं कृते व्यासः १५८११/२४ एतन्मितः स्यात्।

वृत्तक्षेत्रे परिधिगुणितव्यासपादः फलं तत्
क्षुण्णं वेदैरुपरि परितः कन्दुकस्येव जालं
गोलस्यैवं तदपि च फलं पृष्ठजम्..[3] इत्युक्तत्वात् –

परिधिः × १/४व्यासः = वृत्तक्षेत्रफलम्, वृत्तक्षेत्रफलम् × ४ = गोलपृष्ठफलम्। अथवा– (परिधिः × व्यासः) / ४ × ४ = परिधिः × व्यासः= गोलपृष्ठफलम्। एतत्सर्वं हि –

प्रोक्तो योजनसंख्यया कुपरिधिः सप्ताङ्गनन्दाब्धयः
तद्व्यासः कुभुजङ्गसायकभुवः सिद्धांशकेनाधिकाः।
पृष्ठक्षेत्रफलं तथा युगगुणत्रिंशच्छराष्टाद्रयो
भूमेः कन्दुकजालवत्कुपरिधिव्यासाहतेः प्रस्फुटम्[4] ॥

इति भास्करेण अभ्यधायि। एवं परिधिव्यासगुणनात्गोलपृष्ठफलं सिद्ध्यति, परन्तु लल्लाचार्येण **वृत्तफलं परिधिघ्नं समन्ततो भवति गोलपृष्ठफलम्**[5] इति स्वगणिते प्रतिपादितम्। एवं सति वृत्तक्षेत्रफलं परिधिना गुणितं सत् २८५६३३८५५७ इत्येतावन्मितं भूपिण्डस्य बहि र्वर्तमानस्य

1. सिद्धान्तशिरोमणौ गोलाध्याये भुवनकोशे श्लो.सं. 14
2. सम्प्रदायसिद्धः श्लोकः मूलं मृग्यम्
3. सिद्धान्तशिरोमणौ
4. सिद्धान्तशिरोमणौ गोलाध्याये भुवनकोशे श्लो.सं. 52
5. शिष्यधीवृद्धिदम्,

कन्दुकजालपरिणाहरूप पृष्ठक्षेत्रफलप्रमाणं भवतीत्युच्यते। तथा च तद्वचनम् –

नगशिलीमुखबाणभुजङ्गमज्वलनवह्निरसेषु गजाश्विनः।
कुवलयस्य बहिः परियोजनान्यथ जगुः खलु कन्दुकजालवत्॥ [6]

परिधिव्यासघातस्य परिधिक्षेत्रफलघातस्य च महदन्तरसद्भावात्कस्य ग्रहणं निर्दुष्टमित्यत्र भास्कराचार्याः एवमूचुः –

दुष्टं कन्दुकजालवदिलागोले फलं जल्पितं
लल्लेनास्यशतांशकोऽपि न भवेद्यस्मात्फलं वास्तवम्।
तत्प्रत्यक्षविरुद्धमुद्धतमिदं नैवास्तु वा वस्तु वा
हे प्रौढा गणका! विचारयत तन्मध्यस्थबुद्ध्या भृशम् ॥ [7]

अर्थात्नगशिलीमुखेत्यादिना यदुक्तं तस्य शतांशोऽपि वास्तवं फलं नायाति, ततश्च परिधिशतांशस्य समत्वदर्शनात्लल्लोक्तस्य प्रत्यक्षविरुद्धत्वात्तेन असत्प्रतिपादितम् इति।

परिधिव्यासघातस्य परिधिक्षेत्रफलघातस्य च अन्तरम् इदानीं पश्यामः -

परिधिः×व्यासः= (4967×1581.0415) = 7853033.13

परिधिः×व्यासः÷4=(4967×1581.0415)÷4=1963258.2826=क्षेत्रफलम्क्षेत्रफलम्×परिधिः = 1963258.2826×4967=9751503889.798 |

एवं परिधिक्षेत्रफलघातस्य न खलु शतांशः सहस्रांशः अपि परिधिव्यासघातात् (वास्तवफलात्) अधिकः एव भवति।

अतः आचार्यः भास्करः स्वमतं द्रढीकुर्वन् लल्लोक्तिं च निराकुर्वन् परिधिव्यासघातादेव गोलपृष्ठफलं स्यादिति त्रिभिः प्रकारैः प्रत्यपादयत्।

तत्र प्रथमः प्रकारः यथा –

यत्परिध्यर्धविष्कम्भं वृत्तं कृत्तं किलांशुकम्।
तेनार्धश्छाद्यते गोलः किञ्चिद्वस्त्रेऽवशिष्यते॥
गोलक्षेत्रफलात्तस्माद्वस्त्रक्षेत्रफलं यतः ।
सार्धद्विगुणितासन्नं तावदेवापरे दले॥
एवं पञ्चगुणात्क्षेत्रफलात्पृष्ठफलं खलु।
नाधिकंजायते तेन परिधिघ्नं कुतः कृतम्॥
वृत्तक्षेत्रफलं यस्मात्परिधिघ्नं न युक्तिमत्।
दुष्टत्वाद्गणितस्यास्य दुष्टं भूपृष्टजं फलम्॥ [8]

एकं गोलं स्वीकृत्य तस्य परिध्यर्ध प्रमाणव्यासात्मकं वस्त्रं वृत्तं कृत्वा तद्वस्त्रं गोलोपरिन्यसेत्,

6. शिष्यधीवृद्धिदम्,
7. सिद्धान्तशिरोमणौ गोलाध्याये भुवनकोशे श्लो.सं. 53
8. सिद्धान्तशिरोमणौ गोलाध्याये भुवनकोशे श्लो.सं. 54-57

तदागोलस्य अर्धभागः आच्छाद्यते। (वस्त्रपरिधेः सङ्कोचात्वस्त्रे किञ्चित् अवशिष्यते)। अतः एवं सति तद्गोल व्यासवृत्तक्षेत्रफलात् वस्त्रवृत्तक्षेत्रफलं सार्धद्विगुणितासन्नं भवति। एतत्तु गोलार्धे। एतावदेव अपरेऽपि गोलार्धे। एवं वृत्तक्षेत्रफलात्पञ्चगुणादधिकं पृष्ठफलं कथञ्चिदपि न भवति। एवं क्षेत्रफलं पञ्चभिः गुणितमेव वास्तवपृष्ठफलादधिकं भवति, किंपुनः परिधिघातकरणेन? एवं वृत्तफलं परिधिघ्नमिति यदुक्तं तद्दुष्टमेव। अतः वृत्तफलं चतुर्घ्नमेवपृष्ठफलं भवतीत्युच्यते।

द्वितीयः प्रकारो यथा –

चक्रकलापरिधिकल्पितस्य भूगोलस्य मस्तके एकं बिन्दुं कृत्वा, वृत्ते षण्णवतिमितांशस्य समदर्शनात् (२१६००/९६ = २२५) आगोलार्धं प्रत्येकं तत्त्वाश्विमितकलासु चिह्नं कृत्वा तन्मस्तकस्तबिन्दुं केन्द्रीकृत्य वृत्तानि कुर्यात्, तानि २४ भवन्ति। एषां चतुर्विंशतेः वृत्तानां ज्यार्धानि अपि क्रमेण २२५, ४४९ इत्यादीनि भवन्ति। अतः अन्तिमवृत्तस्य ज्यार्धं ३४३८ भवति। अस्य अन्तिमवृत्तस्य मानं चक्रकलापरिमितम् (२१,६००)। अतः त्रैराशिकेण सर्वेषां वृत्तानां मानानि ज्ञातुं शक्यन्ते। तद्यथा– ३४३८ त्रिज्यायां वृत्तमानं २१,६०० चेत् २२५, ४४९ .... इत्यादि ज्यार्धेषु किमिति? तदा सर्वेषां वृत्तानां मानानि जायन्ते[9]। सम्प्रतिद्वयोः द्वयोः वृत्तयोः मध्ये एकैकं वलयाकारकं क्षेत्रम् उत्पन्नम्। आहत्य तेषां संख्या – २४। इदानीं तेषां वलयाकारक्षेत्राणां क्षेत्रफलं संसाध्य तेषां सर्वेषां योगः कर्तव्यः। [वलयाकारक्षेत्राणि च समानलम्ब चतुर्भुजाकारेण स्थितानि इत्यतः- **'चतुर्भुजेऽन्यत्र समानलम्बे लम्बेन निघ्नं कुमुखैक्यखण्डम्'**[10] एवं प्रकारेण तत्तत्क्षेत्रफलं साध्यम्। अत्र सर्वत्र लम्बः २२५ एव, अधो भागे विद्यमानं महावृत्तं कुः (भूमिः), उपरि विद्यमानं लघुवृत्तं मुखं प्रकल्प्य सर्वेषां वलयक्षेत्राणां क्षेत्रफलम् आनेयम्। अन्तिमस्य अर्थात्मस्तकबिन्दुसमीपस्थस्य आद्यवृत्तस्य क्षेत्रफलानयने मुखं शून्यं ज्ञेयम्]

तद्योगफलं गोलार्धपृष्ठफलं भवति, एतद् द्विगुणितं सत्सकलगोलपृष्ठफलं भवति। इदं च परिधिव्यासघातसमानं न तु परिधिक्षेत्रफलघातसमानं भवति। अनयोः अन्तरं यथा –

परिधिः×व्यासः= 21600 × 6876 =148521600 =

परिधिः × व्यासः ÷ 4=(21600 × 6876) ÷ 4 = 37130400 = क्षेत्रफलम् ।

क्षेत्रफलम्×परिधिः37130400×21600=802016640000

9. ज्यार्द्धानि चक्रकलागुणितानि वृत्तमानानि जायन्ते इत्यर्थः

10. लीलावती क्षेत्रव्यवहारः श्लो. सं. 24



क्र.सं	ज्यार्धानि	वृत्तमानानि		लम्बः	मुखम्	भूमिः	क्षेत्रफलम्
1	225	1413.612565	225	0	1413.612565	159031.4136126	
2	449	2820.942408	225	1413.612565		2820.942408	476387.4345550
3	671	4215.706806	225	2820.942408		4215.706806	791623.0366492
4	890	5591.623037	225	4215.706806		5591.623037	1103324.6073298
5	1105	6942.408377	225	5591.623037		6942.408377	1410078.5340314
6	1315	8261.780105	225	6942.408377		8261.780105	1710471.2041885
7	1520	9549.738220	225	8261.780105		9549.738220	2003795.8115183
8	1719	10800.000000	225	9549.738220		10800.000000	2289345.5497382
9	1910	12000.000000	225	10800.000000		12000.000000	2565000.0000000
10	2093	13149.738220	225	12000.000000		13149.738220	2829345.5497382
11	2267	14242.931937	225	13149.738220		14242.931937	3081675.3926702
12	2431	15273.298429	225	14242.931937		15273.298429	3320575.9162304
13	2585	16240.837696	225	15273.298429		16240.837696	3545340.3141361
14	2728	17139.267016	225	16240.837696		17139.267016	3755261.7801047
15	2859	17962.303665	225	17139.267016		17962.303665	3948926.7015707
16	2978	18709.947644	225	17962.303665		18709.947644	4125628.2722513
17	3084	19375.916230	225	18709.947644		19375.916230	4284659.6858639
18	3177	19960.209424	225	19375.916230		19960.209424	4425314.1361257
19	3256	20456.544503	225	19960.209424		20456.544503	4546884.8167539
20	3321	20864.921466	225	20456.544503		20864.921466	4648664.9214660
21	3372	21185.340314	225	20864.921466		21185.340314	4730654.4502618
22	3409	21417.801047	225	21185.340314		21417.801047	4792853.4031414
23	3431	21556.020942	225	21417.801047		21556.020942	4834554.9738220
24	3438	21600.000000	225	21556.020942		21600.000000	4855052.3560209

क्षेत्रफलयोगः(गोलार्धपृष्ठफलम्)　　74234450.2617801





सकलगोलपृष्ठफलम् । एतत्परिधिव्यासघातेनसमानम् । परिधिः (21600) × व्यासः (6876) =148521600.00। [11]

तृतीयः प्रकारः यथा–

गोलस्यपरिधिः कल्प्योवेदघ्नज्यामितेर्मितः ।
मुखबुध्नगरेखाभिर्यद्वदामलकेस्थिताः॥
दृश्यन्तेवप्रकास्तद्वत्प्रागुक्तपरिधेर्मितान्।
ऊर्ध्वाधःकृतरेखाभिर्गोलेवप्रान्प्रकल्पयेत्।
तत्रैकवप्रकक्षेत्रफलंखण्डैःप्रसाध्यते॥ [12]

एतदनुसारेणअभीष्टग्रन्थेयावन्तिज्यार्धानिस्वीकृतानितच्चतुर्गुणपरिधिप्रमाणकंगोलंकल्पयेत्। अत्रग्रन्थे २४ ज्यार्धानिविद्यन्तेइत्यतः २४×४=९६ परिधिमान्गोलःकल्प्यते। एतस्मिन्गोलेयथा आमलकफलेमस्तकतलबिन्दुभ्यां वप्रकाः दृश्यन्ते, तथा परिधिसंख्याकान्वप्रकान्रचयेत्। परिधेः ९६ हस्तमितत्वात् प्रतिहस्तं वप्रकाः कार्याः । एवम् आहत्य ९६ वप्रकाः सम्भवन्ति।

तत्र प्रत्येकं वप्रक्षेत्रे क्षेत्रफलं साध्यम्। तद्यथा– एकस्यवप्रकस्यअर्धेप्रतिहस्तंतिर्यग्रेखाःकृत्वाज्यासंख्यकानि (२४) खण्डकानिकार्याणि। तत्रजीवाः पृथक्पृथक्त्रिज्याभक्ताः तिर्यग्रेखाप्रमाणानि भवन्ति। तत्र अधस्तनी रेखाहस्तमात्रा, उपरितन्यस्तु ज्यावशेन किञ्चित्किञ्चित्न्यूनाः, सर्वत्रहस्तमितः एवलम्बः[13]। पुनः पूर्ववत्लम्बेन निघ्नं कुमुखैक्यखण्डमित्यनेन प्रत्येकं चतुर्विंशतेः खण्डानां क्षेत्रफलम् आनेतव्यम्। तदित्थम् -

क्र.सं	ज्यार्धानि	त्रिज्या	तिर्यग्रेखामानम्	लम्बः	मुखम्	भूमिः	खण्डक्षेत्रफलम्
1	225	3438	0.06544503	1	0	0.065445	0.032723
2	449	3438	0.13059919	1	0.065445	0.130599	0.098022
3	671	3438	0.19517161	1	0.130599	0.195172	0.162885
4	890	3438	0.25887144	1	0.195172	0.258871	0.227022
5	1105	3438	0.3214078	1	0.258871	0.321408	0.29014
6	1315	3438	0.38248982	1	0.321408	0.38249	0.351949
7	1520	3438	0.44211751	1	0.38249	0.442118	0.412304
8	1719	3438	0.5	1	0.442118	0.5	0.471059
9	1910	3438	0.55555556	1	0.5	0.555556	0.527778
10	2093	3438	0.60878418	1	0.555556	0.608784	0.58217
11	2267	3438	0.659395	1	0.608784	0.659395	0.63409
12	2431	3438	0.70709715	1	0.659395	0.707097	0.683246
13	2585	3438	0.75189063	1	0.707097	0.751891	0.729494

11. एतत् स्वल्पान्तरं प्रायः, पूर्णाङ्कस्वीकरणेन अपगच्छेत्।

12. सिद्धान्तशिरोमणौ गोलाध्याये भुवनकोशे श्लो.सं. 58-59

13. सिद्धान्तशिरोमणौ गोलाध्याये भुवनकोशे श्लो.सं. 58 इत्यस्य वासनाभाष्ये

14	2728	3438	0.79348458	1	0.751891	0.793485	0.772688
15	2859	3438	0.83158813	1	0.793485	0.831588	0.812536
16	2978	3438	0.86620128	1	0.831588	0.866201	0.848895
17	3084	3438	0.89703316	1	0.866201	0.897033	0.881617
18	3177	3438	0.92408377	1	0.897033	0.924084	0.910558
19	3256	3438	0.94706225	1	0.924084	0.947062	0.935573
20	3321	3438	0.96596859	1	0.947062	0.965969	0.956515
21	3372	3438	0.98080279	1	0.965969	0.980803	0.973386
22	3409	3438	0.99156486	1	0.980803	0.991565	0.986184
23	3431	3438	0.99796393	1	0.991565	0.997964	0.994764
24	3438	3438	1	1	0.997964	1	0.998982
	54233	सर्वज्यैक्यम्	क्षेत्रफलयोगः (वप्रार्धक्षेत्रफलम्)				15.2745782

वप्रार्धफलम् = 15.2745782 × 2 = 30.5491564 = एकस्य वप्रक्षेत्रस्य पृष्ठफलम्। एतस्य आनयने भास्कराचार्यः पृथक् सूत्रं निगदति– **"सर्वज्यैक्यं त्रिभज्यार्धहीनं त्रिज्यार्धभाजितम्"** [14] इति। अर्थात् २२५, ४४९.... इत्याद्यानां सर्वासां ज्यानां योगं कृत्वा ततः त्रिज्यार्धं त्यक्त्वा तेनैव विभाजयेत्, तदा एकस्य वप्रक्षेत्रस्य पृष्ठफलं लभ्यते। तदित्थम् -

225+449+ +3438 = 54233 (उपरिकोष्ठके दर्शितम्)। 3438 ÷ 2 = 1719 त्रिज्यार्धम् । 54233 – 1719 =52514÷1719 = 30.5491565 = एकस्य वप्रक्षेत्रस्य पृष्ठफलम्। गोले 96 वप्रक्षेत्राणि सन्ति इत्यतः 30.5491565 × 96 = 2932.719023 इति सकलगोलपृष्ठफलं लभ्यते। एतत् परिधिव्यासघातेन समानं यतः, 96 परिधिमतिगोले व्यासप्रमाणम् = 30.56। परिधि × व्यासः = 30.56 × 96 = 2933.76। स्वल्पान्तरत्वात् उभयं समानमेव। परिधिक्षेत्रफलघातस्तु यथा –

क्षेत्रफलम्= परिधिः × व्यासः ÷ 4 = (30.56 × 96)÷ 4 = 733.44 क्षेत्रफलम् × परिधिः = 733.44 × 96 = 70410.24 । अतः वास्तवपृष्ठफलस्य सहस्रगुणादपि अधिकं लल्लेन निरुक्तमिति तद् गणितं भृशं विचार्य **'परिधिव्यासघातोऽतो गोलपृष्ठफलं स्मृतम्'** [15] इति साधुनिरूपितम् इत्यलमति विस्तरेण।

14. सिद्धान्तशिरोमणौ गोलाध्याये भुवनकोशे श्लो.सं. 60
15. सिद्धान्तशिरोमणौ गोलाध्याये भुवनकोशे श्लो.सं. 61

सन्तानप्रतिबन्धकयोगविमर्शः

डॉ. दीपकुमारः
सहायकाचार्य, ज्योतिष विभाग,
वेदव्यासपरिसरः, बलाहरः (हि.प्र.)

वेदानां सारभूता या गायन्तं त्रायते सदा ।
तां शिवां विघ्ननाशार्थं प्रणमामि पुनः पुनः ।।

उपोद्घातः– वेदाङ्गत्वेन ज्योतिषशास्त्रं हि शास्त्रान्तरवद्भारतीयानां स्वकीयस्यैव मौलि कचिन्तनस्य परिणतिरस्ति। सुमेरोरारभ्य क्षीरसागरपर्यन्तं ऋषिभिरुपार्जितं ज्योतिषज्ञानं ग्रन्थरूपेणास्मान् शास्ति। सिद्धान्त-संहिता-होरेति त्रिस्कन्धात्मकं वर्तते इदं ज्योतिषशास्त्रम् । तद्यथा –

ज्योतिःशास्त्रमनेकभेदविषयं स्कन्धत्रयाधिष्ठितं
तत्कात्स्न्योंपनयस्य नाम मुनिभिः सङ्कीर्त्यते संहिता ।
स्कन्धेऽस्मिन् गणितेन या ग्रहगतिस्तन्त्राभिधानस्त्वसौ
होराऽन्योऽङ्गविनिश्चयश्च कथितः स्कन्धस्तृतीयोऽपरः ।।[1]

त्रयो स्कन्धाः विश्वकल्याणाय उपयुज्यन्ते। तत्रापि होरास्कन्धे विनिश्चितस्य फलविचारः क्रियते। पूर्वार्जितं कर्म परवर्तिनिकाले भाग्यं परिणमति। अन्य जन्मनि प्रारब्धक्रियमाणसञ्चितकर्मानु सारेण भगवता ग्रहर्क्षाणां गतिस्थितिवशात् जन्माङ्गचक्रे तद् उचितानुचित कर्म निर्दिश्यते, इति भणितं होराशास्त्रस्य प्रयोजनकथनवेलायां त्रिस्कन्धज्ञेन आचार्य वराहमिहिरेण -

यदुपचितमन्यजन्मनि शुभाशुभं तस्य कर्मणः पक्तिम् ।
व्यञ्ज्यति शास्त्रमेतत् तमसि द्रव्याणि दीप इव।।[2]

अतः पूर्वजन्मनि अर्जितानां शुभाशुभकर्मणां प्रभावात् जन्मकालिकग्रहास्थित्यनुगुणमनेके तादृशयोगाः मानवानां जीवने सञ्जायन्ते यैः योगैः तैः सुखानुभवः दुखानुभवश्च क्रियते। तेष्वेव योगेषु सन्ततियोगोऽपि अतीवमहत्वावधायकं स्थानमावहति। अतोऽत्रशोधपत्रेऽस्मिन् सन्ततिप्रतिबन्धकयोगाः तत्परिहाराश्च संक्षेपेण विमृश्यन्ते।

द्वादशभावाः- ये योगाः जातकान् सर्वथा प्रभावयन्यि ते योगाः द्वादशभावानाश्रित्य सञ्जायन्ते अर्थात् द्वादशभावेषु ग्रहाणां युतिदृष्टि-वशात् योगाः सम्भवन्ति। फलितज्योतिषे आचार्यैः द्वादशभावाः कथितास्सन्ति । तनुः, धनं, भ्राता, सुखं, पुत्रः, रिपुः, स्त्री, मृत्युः, धर्मः, कर्म, आयः, व्ययेति द्वादशाभावाः वर्तन्ते। यथा -

तनुर्धनं ततो भ्राता सुखं पुत्ररिपुस्त्रियः ।

---

1. बृहत्संहिता 1-9
2. लघुजातकम् 1-3

मृत्युर्भाग्यं राज्यलाभौ व्ययो भावाः क्रमादिमे ।[3]

तत्र लग्नादिद्वादशभावेषु यस्याधिपतिः पूर्णबलवान् भवेत्, यो भावः स्वस्वामिना युतो दृष्टो वा भवेतस्य भावस्य वृद्धिर्भवति। किन्तु यस्याधिपतिःअल्पवीर्यवान् भवेत् यस्मिन् च पापयुतिः दृष्टिः वा स्यातस्य हानिर्जायते। तद्यथा -

तन्वादयो भावबलं वदन्ति यत्स्वामिसम्पूर्णबलैः समेतः ।
युक्तेऽथ दृष्टे शुभदृग्युते च क्रमेण तद्भावविवृद्धिकारी ।।[4]

अपि च -

यो यो भावः स्वामि दृष्टो युतो वा सौम्यैर्वास्यातस्य तस्यास्तिवृद्धिः ।
पापैरेवं तस्य भावस्य हानिनिर्देष्टव्या पृच्छतो जन्मतो वा ।।[5]

एतेष्वेव भावेषु पञ्चमभावः सन्ततिभावेति कथ्यते ।

पञ्चमभावः- सुत, धी, विद्या सन्तति, मन्त्र सन्तानादीनि पञ्चमभावस्य पर्यायनामानि वर्तन्ते। लग्नस्थानात् यो पञ्चमभावः चन्द्रस्थानात् वा यो पञ्चमभावः तस्मात् सन्तानविचारः क्रियते। न केवलं सन्तानविचारः अपितु मन्त्रवचनगद्यपद्यप्रवीणतामतिवृद्धिनीतिविनयप्रबन्धादिविचारोऽपि पञ्चमभावात् क्रियते। यथा -

पुत्रमन्त्रवचनप्रवीणता गद्यपद्यमतिवृद्धिमङ्गजात् ।
मातुलादरिचतुष्पदव्रणव्रात भीतिसमरादि चिन्तयते ।।[6]

तथा च -

बुद्धिप्रबन्धात्मजमन्त्रविद्या विनयगर्भस्थितिनीतिसंस्थाः ।
सुताभिधाने भवने नराणां होरागमतज्ञैः परिचिन्तनीयाः ।।[7]

सूर्यादिग्रहेषु बृहस्पतिः पञ्चमभावस्य कारकः। अतः बृहस्पतेरपि सन्ततिविचारः क्रियते।

सूर्योगुरूः कुजः सोमो गुरुभौमःसितः शनिः ।
गुरुश्चन्द्रसुतो जीवो मन्दश्च भावकारकाः ।।[8]

अपि च जातकतत्वे -

अर्को जीवः कुजश्चन्द्रज्ञौ गुरुः मन्दारौ शुक्रः शनिः सूर्येज्यौ ज्ञार्केज्यमन्दा जीवः शनिरिति क्रमात् तन्वादिकारकाः।[9]

---

3. भावप्रकाशः 1-7
4. मानसागरी 2
5. षट्पञ्चाशिका 1-3
6. भावप्रकाशः 3-3
7. भावकुतूहलम् 6-3
8. बृ.पा.हो. 33-34
9. जा.त. 1-65

सन्तानयोगाः- पञ्चमाधिपतिः पञ्चमस्थाने भवेदथवा पञ्चमस्थाने पञ्चमेशदृष्टिः भवेत्तथा पञ्चमस्थानं शुभग्रहयुतं स्यादत्तदा जातकाय सन्तति लाभो जायते। तथैव लग्नपञ्चमयोः शुभ ग्रहाः भवेयुः गुरुश्च पञ्चमे, दशमे, एकादशे वा स्यात्तदापि विवाहानन्तरं शीघ्रमेव पुत्रोत्पत्तिर्जायते। तद्यथा -

लग्ने शुभे ग्रहे पुत्रे शुभाक्रान्ते सुतो भवेत् ।
पञ्चमे दशमे लाभे गुरौ वा बलसंयुते ।।[10]

पञ्चमाधिपतिर्भूत्वा पूर्णवीर्यः गुरुः लग्नेशेन दृष्टः स्यात्तदा जातकः पुत्रयुक्तः भवति। पञ्चमेशलग्नेशयोः परस्परं व्यत्ययसम्बन्धेनापि सन्ततिप्राप्तिर्जायते। यथा -

पुत्रेशेज्ये बलिनि लग्नेशदृष्टे पुत्राप्तिः।
पुत्राङ्गपावन्योन्यभगौ वायुतौ पुत्राप्तिः।।[11]

सन्ततिप्रतिबन्धकयोगाः– पञ्चमाधिपतिर्यदि पञ्चमस्थानं न पश्येत्, पञ्चमस्थानं पापयुतं पापदृष्टं गुरूदृष्टिरहितं च स्यादथवा पञ्चमेशो शुभदृष्टियुतिरहितो भूत्वा क्रूराक्रान्तः स्यात्तदा जातकः सन्तति-सुखरहितः जायते। पञ्चमेशः दुर्बलो भूत्वा पापयुतः अस्तङ्गतः वा स्यात्तदा तस्य जातकस्य पुत्रः व सम्भवति। भवेच्चेत् सद्यः निधनमेति ।

दुर्बले पापसंयुक्ते पञ्चमेशेऽस्तगेऽपि वा ।
आत्मजो न भवेत्तस्य जातोऽपि म्रियते क्षणात् ।[12]

पञ्चमस्थेन भौमेन सन्ततिः पुनः पुनः नाशमायाति । पञ्चमस्थः सूर्यः हतापत्ययोगं मृतापत्ययोगं च जनयति।

नन्दने मङ्गलो जातं जातं हन्ति सुतं बलात् ।
हतापत्यं मृतापत्यं कुरूते पञ्चमे रविः ।।[13]

गुरुः शुक्रो वा नीचस्थः बुधः समराशिस्थः, सूर्यः विषमस्थः भवेत्तदापि जातकः सन्ततिसुखं नाप्नोति ।

नीचे गुरौ भृगौ वापि समे ज्ञे विषमे रवौ ।
तदा पुत्रसुखं च स्यादित्युक्तं गणकोतमैः ।।[14]

अपि च पराशरः -

सुतेशेऽस्तङ्गते वाऽपि पापाक्रान्ते च निर्बले ।
तदा न जायते पुत्रो जातो वा म्रियते ध्रुवम् ।।

यस्या जातिकायाः जन्माङ्गचक्रे पञ्चमेशो नीचस्थो भूत्वा पापयुतः त्रिकस्थः भवेत् सा जातिका काकवन्ध्या भवति। विशिष्य अस्मिन् योगे शनियुतिना स्त्री अनपत्यतामाप्नोति।

---

10. भावकुतूहलम् 6-8
11. जा.त. 5-168,172
12. भा. प्र. 5-17
13. भा.प्र. 5-18
14. भा.कु. 6-8

नीचे पुत्रेशे षष्ठादित्रयगे पापयुते काकवन्ध्या ।

पुत्रेशे नीचे मन्दयुते काकवन्ध्या ।।[15]

त्रिकस्थगतस्य वीर्यहीनस्य पञ्चमेशस्य भौमकेतुबुधशनिभिः युते सति जातकानामनपत्यतायोगो भवति। तथाह आचार्यः पराशरः -

षष्ठस्थाने सुताधीशे लग्नेशे कुजसंयुते ।

म्रियते प्रथमापत्यं काकवन्ध्या च गेहिनी ।।

सुताधीशो हि नीचस्थो व्ययषष्ठाष्टमस्थितः ।

काकवन्ध्या भवेन्नारी सुते केतुबुधौ यदि ।।

सुतेशो नीचगो यत्र सुतस्थानं न पश्यति ।

तत्र सौरिबुधौ स्यातां काकवन्ध्यत्वमाप्नुयात् ।।[16]

पञ्चमेशसप्तमेशनवमेशानां नवांशेशाः पापयुताः क्रूरराशियुताः वा भवेयुस्तदा पुत्रनाशः सम्भवति।

भाग्यपुत्रकलत्रेशसंयुक्तनवभागपाः।

पापांशगाः पापयुताः पुत्रनाशं वदेत्तदा ।।[17]

शापयोगाः– जातकस्य जन्मकुण्डल्यां पञ्चमस्थः राहुः भौमदृष्टः भवेदथवा मेषस्थः वृश्चिकस्थः वा राहुः पञ्चमस्थाने भवेत्तदा सर्पशापाद् सन्ततिरप्राप्तिः भवति। तथैव पञ्चमस्थः शनिः चन्द्रदृष्टियुतः स्यात्तथा पञ्चमाधिपतिः राहुणा युतो भवेत्तदा सर्पशापकारणादनपत्यता विज्ञेया। अतः पञ्चमस्थानं, पञ्चमेशः, लग्नं पञ्चमभावकारकग्रहः वा कथंचिदपि भौमराहुकेतूभिः सम्बन्धः स्थापयति चेत् सर्पशापाद् सन्तानहानिर्वक्तव्या।

सुते राहौ भौम दृष्टे भौमभे वा सर्पशापाद्विपुत्रः ।

यमे सुते चन्द्रदृष्टे सुतेशे राहुयुते सर्पशापाद्विपुत्रः ।

राहुकेतुयुते दृष्टे पञ्चमे बलवर्जिते ।

तदीशे वा तथा प्राप्ते सर्पदोषात्सुतक्षयः ।।[18]

सूर्यः पञ्चमेशो भूत्वा पापमध्यगः पापयुतः पापदृष्टः वा त्रिकोणस्थः स्यात्तदा पितृशापवशाद्विपुत्रत्वं सम्भवति। दशमेशः, दशमस्थानं क्रूरयुतं स्यात्, बृहस्पतिः सिंहस्थः भवेत्, पञ्चमेशः सूर्ययुतः स्यात्, पञ्चमस्थानं लग्नं च क्रूराक्रान्तं भवेत्तदापि पितृशापद्वारा सन्ततिकष्टं भवति।

पुत्रपेऽर्के क्रूरान्तरे त्रिकोणे पापयुतदृष्टे पितृशापाद्विपुत्रः ।

सिंहेज्ये पुत्रेशेऽर्कयुते पुत्राङ्गगौ पापौ पितृशापाद्विपुत्रः ।।[19]

---

15. जा. त. 5-190,191
16. बृ. पा. हो. 17-4,5,6
17. सर्वार्थचिन्तामणिः 5-15
18. जा. तः 5-85, 86
19. जा. त. 5-93,95 ,जा.पा.13-35

अपि च जातकपारिजाते –

नवमे पापसंयुक्ते मन्दयुक्ते सुताधिपे ।
त्रिकोणे मान्दि संयुक्ते पितृदोषात्सुतक्षयः ।।

यदि जातकस्य जन्मांगचक्रे क्रूराग्रहाः चतुर्थभावस्थाः भवेयुः, पञ्चमेशः शनियुक्तः स्यात्तथा अष्टमद्वादशयोरपि क्रूरग्रहाः स्युस्तदा मातृशापाद् अपत्यहानिर्जायते ।

मातृस्थानगते पापे सुतेशे मन्दसंयुते ।
व्ययनाशगते पापे मतृदोषात्सुतक्षयः ।।[20]

तथैव चन्द्रो पुत्रेशो भूत्वा नीचस्थः पापमध्यगः भवेत्, चतर्थपञ्चमयोः क्रूरखेचराः भवेयुस्तदा मातृशापाद् सुतक्षयः सञ्जायते। शनिरेकादशस्थः, पापाः चतुर्थगाः, नीचस्थः चन्द्रः पञ्चमस्थः स्यात्तदाऽपि मातृशापकारणेन सन्ततिहानिर्सम्भवति।

पुत्रस्थानाधिपे चन्द्रे नीचे वा पापमध्यगे ।
हिबुके पञ्चमे पापे मातृशापात् सुतक्षयः।।
लाभे मन्दसमायुक्ते मातृस्थाने शुभेतरे ।
नीचे पञ्चमगे चन्द्रे मातृशापात् सुतक्षयः।।[21]

यस्य जातकस्य जन्मकाले पञ्चस्थानं राहुणा केतुना वा युतं दृष्टं वा भवेत्तथा पञ्चमभावः स्वयमपि वीर्यहीनः स्याच्चेत् सर्पदोषात् सन्ततिनाशः सम्भवति । सुतेशः राहुयुतः, शनिः सुतस्थः भवेत्तत्र च चन्द्र युतिः दृष्टिः वा स्यात्तदापि सर्पदोषेण सन्तान प्रतिबन्धकयोगः सञ्जायते पञ्चमस्थः राहुः भौमदृष्टः स्यादथवा मेषस्थः वृश्चिकस्थः राहुः पञ्चमस्थाने भवेत्तदापि सर्पदोषोऽवगन्तव्यः ।

राहुः केतुयुते दृष्टे पञ्चमे बलवर्जिते ।
तदीशे वा तथा प्राप्ते सर्पदोषात्सुतक्षयः ।।
पुत्रेशे राहुसंयुक्ते पुत्रस्थे भानुनन्दने ।
चन्द्रेण संयुक्ते दृष्टे सर्पदोषात्सुतक्षयः ।।
सुते राहौ भौमदृष्टे भौमभे वा सर्पशापाद्विपुत्रः ।[22]

शनिगृहे स्थितः सूर्यः यदि पापेन दृष्टः भवेत्तथा लग्नमपि क्रूरग्रहवर्गेऽस्थितः भवेत्तदा कुलदेवदोषात्सन्ताननाशः सम्भवति। शत्रुगृहगः आदित्यपुत्रः सूर्यचन्द्रबुधैः दृष्टिगोचरो स्यात्, लग्नमपि पापदृष्टः भवेत्तदापि कुलदेवशापवशात् सन्तानहानिर्जायते।

मन्दालयेऽर्के खलदृष्टियुक्ते लग्नेऽपि वा पापखगस्य वर्गे।
अपत्यहानिः कुलदेवकोपात्पुरातनैरङ्गभृतां निरुक्ताः।।

---

20. जा.पा. 13-35
21. बृ.पा.हो. 85-34,35
22. जा.पा. 13-36, बृ.पा.हो. 85-10, जा.त.5-85

मन्दोऽरिगेहे ज्ञेन्दुसूर्यदृष्टे लग्ने पापदृष्टे कुलदेवदोषाद्विपुत्रः ।[23]

परिहाराः– ज्योतिषशास्त्रस्य अयं वैशिष्ट्यं वर्तते यद्त्र न केवलं शुभाऽशुभयोगाः वर्णिताः अपितु क्रूरग्रहकृत्दुर्योगानां परिहारोपाया अपि दैवज्ञैः प्रतिपादिताः। ये ग्रहा अशुभफलप्रदाः भवन्ति ते होमदानजपपूजनादिना शान्तिमधिगच्छन्ति।[24]

येऽपि दुष्टफलकारका ग्रहास्तेऽपिपूजनादिना दानजपः।
सत्फलं परिदिशन्ति हर्षिता वच्मि दानविधिमादरादतः।।

अनया रीत्या सन्ततिप्रतिबन्धकयोगानां परिहाराय अपि आचार्येभ्यः अनेके उपायाः ज्योतिष-शास्त्रग्रन्थेषूक्ताः सन्ति। जन्माङ्गचक्रे सन्ततिप्रतिबन्धकः चन्द्रः भवेत्तदा देवदोषेण सूर्यगुरौ स्यातां तदा पितृदोषात् भौमेन यक्षदोषात् बुधेन प्रतिबन्धकत्वेन प्रेतदोषात् सन्ततिप्राप्तौ बाधा आयान्ति। तथैव शुक्रकृतप्रतिबन्धकयोगेन वीर्यदोषः शनिना रजदोषः राहुकेतूभ्यां भ्रूणहत्यादोषः विज्ञेयः।[25]

चन्द्रे तु देवतादोषः पितृदोषोऽर्कजीवयोः ।
मङ्गले यक्षकृद्दोषः सौम्ये भूतभवो मतः ।।
शुक्रे शुक्रकृतो दोषो मन्दे योनिकृतो भवेत् ।
राहौ केतौ भ्रूणहत्या दोषः सद्भिर्निरूपितः ।।

तत्र सूर्यः अनपत्यकारकः स्यात्तदा हरिवंशपुराणस्य पारायणेन कथाश्रवणेन च शान्तिर्भवति। राहुकृतदोषे कन्यादानेन केतौ कपिलाधेनुदानेन शनिभौमयोः रुद्राभिषेकेन सन्तानप्राप्तिर्जायते।

हरिवंशौ रवौ प्रोक्तः कन्यादानं तु राहुणा ।
केतुना कपिलादानं रूद्रपाठः शनौ कुजे ।।[26]

अनेनैव प्रकारेण विविधशापयोगोपशमनाय अप्यनेके परिहाराः वर्तन्ते। तद्यथा सन्ततिबाधायां सर्पदोषे सति सुवर्णनागप्रतिमां निर्माय प्रतिष्ठापनं कृत्वा वैदिकविधिना नागपूजनपुरस्सरं गो-भूमि-तिल-सुवर्णादिपदार्थानां स्वसामर्थ्यनुगुणं दानकरणेन सर्पदोषः नश्यति सन्ततिश्च प्राप्यते।

स्वगृहोक्तविधानेन प्रतिष्ठां कारयेत् सुधीः।
नागमूर्ति सुवर्णेन कृत्वा पूजां समाचरेत्।।
गो-भू-तिल-हिरण्यादि दद्यात् वित्तानुसारतः।
एवं कृते तु नागेन्द्र-प्रसादात् वर्धते कुलम्।।[27]

ग्रहयोगवशात् पितृशापेन सन्तानावरोधः दृष्टिपथमायाति चेत्तद्दोषपशमनार्थं गयातीर्थं सम्प्राप्य विप्रभोजन-पुरस्सरं श्राद्धकर्मणा कारयेदथवा कन्यादानं गोदानं वा कुर्यात्। एवं कृते सति पितृशाप-

23. भा.कु. 6-13,जा.त.5-106
24. भा. प्र. 12-1
25. बृ. पा. हो. 85-18
26. बृ. पा.हो. 85-31,32
27. भा.प्र.5-31

निवृत्तिपूर्वकं सुसन्ततिः प्राप्यते ।

तद्दोषपरिहारार्थं गयाश्राद्धं च कारयेत् ।
ब्राह्मणान् भोजयेदत्र अयुतं वा सहस्रकम् ।।
अथवा कन्यकादानं गोदानं च समाचरेत् ।
एवं कृते पितुः शापान्मुच्यते नाऽत्र संशयः ।।[28]

मातृशापोपशमनाय समुद्रे स्नात्वा अत्यल्पदुग्धपानमात्रं कृत्वा लक्षसंख्यकंगायत्रीजपं कृत्वा ग्रहदानं विप्रभोजदानं च कृत्वा भक्त्या श्रद्ध्या च अश्वत्थस्य सहस्रोत्तरशतम् प्रदक्षिणाः क्रियन्ते चेदवश्यं पुत्ररत्नं प्राप्यते ।

सेतुस्नानं प्रकर्तव्यं गायत्री लक्षसंख्यका ।
रौप्यमात्रं पयः पीत्वा ग्रहदानं प्रयत्नतः ।।
ब्राह्मणान् भोजयेतद्वदश्वत्थस्य प्रदक्षिणम् ।
कर्तव्यं भक्तियुक्तेन चाष्टोत्तरसहस्रकम् ।।
एवं कृते महादेवि शापान्मोक्षो भविष्यति ।
सुपुत्रं लभते पश्चात् कुलवृद्धिश्च जायते ।।[29]

अनेन विधिना शापाविमुक्त्युपाया ज्योतिषशास्त्रे बहुधा निरूपिताः वर्तन्ते। येषामाश्रयेण जनाः विविधेभ्यः शापेभ्यः मुक्ताः भूत्वा सुसन्ततीः प्राप्तुं शक्नुवन्ति। तद्यथा राहुदोषे कन्यादानेन रविदोषे विष्णुसेवया, केतुकृतदोषे कपिला धेनुदानद्वारा भौमदोषे च रूद्रभिषेककर्मणा सन्ततिः प्राप्यते। अपि च सर्वविधदोषपरिहारार्थं सन्तानगोपालनुष्ठानद्वारा भौमव्रतेन कामदेवव्रतेन वा शान्तिः भवति।

राहुणा कन्यकादानं भानुना हरिकीर्तनम् ।
शिखिना कपिलादानं मन्दाराभ्यां षडङ्गकम् ।।
सर्वदोषविनाशाय सन्तानहरिपूजनम् ।
कुर्याद्भौमव्रतं चापि कामदेवव्रतं नरः ।।[30]

एवं प्रकारेण सिद्ध्यति यत् ज्योतिषशास्त्रं निश्चयेन हि प्रत्यक्षं, सामाजिकं, लोकोपकारकारकं चमत्कारकारकं च शास्त्रमस्तीति शम्।

---

28. भा.प्र. 48,49,50
29. भा. कु. 6-19,20
30. भा. प्र,.5-32,33

श्रीपतिभटविरचितायाः ज्योतिषरत्नमालायाः वैशिष्ट्यम्

आनन्दप्रकाशपाठकः
शोधच्छात्रः (NET)
का.सि.द.सं.वि.वि.

अखिलब्रह्माण्डनायकस्य निःश्वासभूतः वेदः समस्तज्ञानविज्ञानराशेः आकरोऽस्ति। एवं भूतस्य वेदस्य शिक्षा-व्याकरण-ज्योतिष-निरुक्त-कल्प-छन्दांसीति षडङ्गानि वर्तन्ते। ननु ज्योतिषशास्त्रस्य वेदाङ्गत्वं कथमित्याह भास्करेण स्वीये सिद्धान्तशिरोमणौ-

वेदास्तावद्यज्ञकर्मप्रवृता यज्ञाः प्रोक्तास्ते तु कालाश्रयेण।
शास्त्रादस्मात् कालबोधो यतः स्याद्वेदाङ्गत्वं ज्योतिषस्योक्तमस्मात्।।[1]

वेदस्य षडङ्गेषु नेत्रस्थानीयमिदं ज्योतिषशास्त्रम्। ननु तेषु कर्ण-घ्राण-नासिका-मुख-हस्तेत्यादिषु अङ्गेषु चक्षुः रूपेणैव कथं ज्योतिषशास्त्रमित्युच्यते प्रश्नमार्गे-

यदुपचितमन्यजन्मनि शुभाशुभं तस्य कर्मणः पङ्क्तिम्।
व्यञ्जयति शास्त्रमेतत् तमसि द्रव्याणि दीप इव।।[2]

वैदिककालात् प्रवर्धितमिदं शास्त्रं सिद्धान्त-संहिता-होरास्कन्धत्रयेषु विभक्तमस्ति। यस्मिन् स्कन्धे त्रुट्यादितः प्रलयान्तकालकलनादिमानप्रभेदाः, पलभातुरीयप्रभृतीनां यन्त्राणां विवेचनं, चन्द्रार्कग्रहणे उदयास्तमयौ, शृङ्गोनतीत्यादयः विषयाः वर्णिताः सन्ति, तादृशः स्कन्धः सिद्धान्तस्कन्धः उच्यते। यथोपदिष्टं भास्कराचार्येण-

त्रुट्यादिप्रलयान्तकालकलना मानप्रभेदः क्रमात्
चारश्च द्युसदां द्विधा च गणितं प्रश्नास्तथा सोत्तराः ।
भूधिष्ण्यग्रहसंस्थितेश्च कथनं यन्त्रादि यत्रोच्यते
सिद्धान्तः स उदाहृतोऽत्र गणितस्कन्धप्रबन्धे बुधैः ।।[3]

ज्योतिषशास्त्रस्यापराङ्गत्वेनाभिधीयते होरास्कन्धः। अहश्च रात्रिश्चाहोरात्रशब्दे पूर्वो वर्णो अकारो अपरवर्णश्च त्रकारस्तयोः लोपात् होराशब्दः सिद्ध्यति। पूर्वजन्मनि कृत शुभाशुभकर्मणः फलादेशः होरास्कन्धेन क्रियते। तद्यथा बृहज्जातके-

होरेत्यहोरात्रविकल्पमेके वाञ्छन्ति पूर्वापरवर्णलोपात्।
कर्मार्जितं पूर्वभवे सदादि यत्तस्य पक्तिं समभिव्यनक्ति।।[4]

स्कन्धेऽस्मिन् राशि-होरा-द्रेष्काणादि-बलाबलनिर्धारणं, जातकस्य जन्मकालिकग्रहस्थित्यनुसारं शुभाशुभफलनिर्धारणं, जन्मकुण्डल्यनुसारं राजयोगारिष्टयोगादीनां विवेचनं, ग्रहाणां दिक्-कालचेष्टाभिः

1. सि.शि.मध्य.काल./श्लो.९
2. प्रश्नमार्गः १/३६
3. सि.शि.मध्य.काल./श्लो.६
4. बृहज्जातक.राशिप्रभेदाध्याय.श्लो.३

बलनिर्धारणमित्यादीनां विषयाणां प्रतिपादनं कृतमस्ति। तथा च नारदपुराणे-

जातके राशिभेदाश्च ग्रहयोनिश्च योनिजम्।
निषेकजन्मारिष्टानि ह्यायुर्दायो दशाक्रमः ।।[5]

सम्यक् हितं प्रतिपाद्यं यत्र अर्थात् जातकस्य कृत्स्नं शुभाशुभफलं यस्मिन् स्कन्धे निगदितं तत् संहितास्कन्धः । अत्र ग्रहाणां स्वभावाः, विभिन्नोत्पातविषयाः, वृष्टियोगाः, मुहूर्तविषयादयोऽनेके विषयाः प्रतिपादिताः सन्ति। यथोक्तं महर्षिनारदेन-

संहिताशास्त्ररूपं च ग्रहचारोऽब्दलक्षणम्।
तिथिवासरनक्षत्रयोगतिथ्यर्धसंज्ञका।।
आधानपुंससीमन्तजातनामान्नभुक्तयः ।
चौलं कर्णच्छिदा मौञ्जी क्षुरिकाबन्धनं तथा।।
समावर्तनवैवाहप्रतिष्ठानसद्मलक्षणम्।
यात्रा प्रवेशनं सद्यो वृष्टिः कर्मविलक्षणम्।।[6]

संहितास्कन्धान्तर्गतसमेषु ग्रन्थेषु ज्योतिषरत्नमाला इति ग्रन्थः कश्चन विशेषोऽस्ति। "सर्वस्यैव हि शास्त्रस्य कर्मणो वाऽपि कस्यचित्। यावत् प्रयोजनं नोक्तं तावत् तत् केन गृह्यते।।"इति वचनानुसारमस्य ग्रन्थस्यापि किमपि विशिष्टं प्रयोजनमस्त्येव। ग्रन्थोऽयं मुहूर्तविषयिकी अस्ति। श्रीश्रीपतिभटविराचितोऽयं ग्रथः विद्वद्जनानां मध्ये अतिप्रसिद्धोऽस्ति। अस्य ग्रन्थस्य श्लोकाः अनुष्टुप्-मालिनी-स्रग्धरा-मन्दाक्रान्ता-आर्या-शार्दूलविक्रीडित-वसन्ततिलका-इन्द्रवज्रोपेन्द्रवज्रोपजातीत्यादिषु वृतिषु निर्मलभाषया निर्मिताः सन्ति। तद्यथा श्रीपतिना ग्रन्थोपसंहारे-

अतिललितसुवृत्तां निर्मलां रत्नमालामुदहरदधिकार्यां सद्गुणां रत्नकोशात्।
निजगुरुपदभक्तः श्रीपतिः सा सुदीर्घं चतुरगणककण्ठे राजतामुज्वलश्रीः ।।[7]

यद्यपि ग्रन्थकारेण स्वजीवनवृत्तस्य विषये कुत्रापि नोक्तं, तथापि अस्य ज्योतिषरत्नमाला-मधिकृत्य ११८५ तमे शकाब्दे महादेवकृतटीकायां प्रथमे प्रकरणे तस्य परिचयः संक्षिप्त रुपेण प्राप्यते। तद्यथा-

"कश्यपवंशपुन्डरीकखण्डमार्तण्डः दैवज्ञचूडामणिः केशवस्य पौत्रः ज्योतिषशास्त्रसमुद्र-दृष्टपारस्य श्रीनागदेवसूनुः ज्योतिषशास्त्रमहार्णवस्य तरणेः हनुमान्, अवगाहने मन्दराद्रिः, पाने कुम्भोद्भवो निर्माणे प्रजापतिरन्तर्निवासे यथार्थनामा समस्तमौहूर्तिकचक्र-शिरोमुकुट-माणिक्य-कान्तिनीराजितपदद्वन्द्वो महाकारुणिकः श्रीपतिर्ग्रहगणित-पाटीगणित-बीजगणित-रूप-सुनिश्चलमूलस्य बहुविधवितत-होरातन्त्रणाशाखस्य ज्योतिषशास्त्रवनस्पतेः संहिताया एव फलानीत्यवधाय जातकर्म-नामकरण-मौञ्जीबन्ध-विवाहयात्रादौ गर्गादिसंहिताभिः

5. ना.पु.२/५४/३
6. ना.पु.५४/८,१०,११
7. ज्योतिषरत्नमाला.२०/१२

विस्तीर्णस्य विसंस्थुलत्वात् प्रतिदिवसं प्रयास्यमानं दैवज्ञनिवहमवेक्ष्य सञ्जातदयो निखिलसंहितार्थमल्पग्रन्थेनाभिधातुमिच्छुः।" इति

अनेन ज्ञायते यत् श्रीपतिः कश्यपवंशीयः ब्राह्मणकुलोत्पन्नः आसीत्। तस्य पितुः नागदेवाचार्यः तथा पितामहः केशवाचार्यः आसीत्। श्रीपतिः न केवलं संहिताशास्त्रस्य अपितु सिद्धान्त-जातकयोरपि मर्मज्ञविद्वान् आसीत्। तेन सिद्धान्तस्कन्धे 'सिद्धान्तशेखरः' 'धीकोटीकरणञ्च' इति सिद्धान्तप्रक्षीयाः ग्रन्थाः, जातके 'जातकपद्धतिः', 'रमलपद्धतिश्च' तथा संहितायां 'ज्योतिषरत्नमाला' इति ग्रन्थानां रचना कृता। आचार्यमहादेवेन स्पष्टीकृतं वर्तते यत् श्रीपतिना नानाविधग्रन्थानामवलोकनं कृत्वैव एते ग्रन्थाः रचिताः। तद्यथा महादेवकृतज्योतिषरत्नमालायाः टीकायाम्-

"गर्गवशिष्ठपाराशरादिसंहितां विलोक्य न केवलं गर्गादिमुनिप्रणीतं वराहलल्लादिकृतं च वाराहीसंहितारत्नकोशं च दृष्ट्वा। ननु यदि गर्गादिमुनिप्रणीतशास्त्रमवलोकितं तत् कथं वराहमिहिरादिथादरः सत्यं। मुनीनां बाहुल्यात्। बहुमत्पाद्यत्किल वराहमिहिरादिभिः बहुमतान्यवलोक्य स्वधिया क्रमोपनिबद्धाः तमपि विलोक्य।" इति।।

विषयेऽस्मिन् श्रीपतिनापि उक्तम्-

विलोक्य गर्गादिमुनिप्रणीतं वराहलल्लादिकृतं च शास्त्रम्।
दैवज्ञकण्ठाभरणार्थमेषा विरच्यते ज्योतिषरत्नमाला।।[8]

एवं भूतस्य ज्योतिषशास्त्रमर्मज्ञस्य गणना वराहभास्करब्रह्मगुप्तप्रभृतीनामाचार्याणां श्रेण्यां भवति। बृहद्दैवज्ञरञ्जनकारः स्वीये ग्रन्थस्य आरम्भे एतेषामाचार्याणां स्मरणं करोति। तद्यथा-

वराहमिहिराचार्यः श्रीपतिः सत्यभास्करौ।
लल्लसुरीब्रह्मगुप्तौ वैद्यनाथश्च रेणुकः ।।
एषां शस्त्राणि संविक्ष्य सारदामादाय यत्नतः।
तदुक्तवचनैः कुर्वे फलग्रन्थमनोरमम्।। [9]

ज्योतिषरत्नमाला इति ग्रन्थः श्रीपतिना विरचितः संहिताग्रन्थेषु सर्वोत्कृष्टरूपेण राराजते। **अतिललितसुवृतां निर्मलां रत्नमालामुदहरदधि कार्यां सद्गुणां रत्नकोशात्"** इति पङ्क्त्या लल्लाचार्यकृत 'रत्नकोशः' इति ग्रन्थस्य महान् प्रभावः ग्रन्थेऽस्मिन् वर्तते इति ज्ञायते। ग्रन्थोऽयं संवत्सर-तिथि-वार-नक्षत्र-योग-करण-मुहूर्त-उपग्रह-संक्रान्ति-गोचर-चन्द्रताराबल-लग्न-सीमन्तादि-परिग्रह-राज्याभिषेक-यात्रा-विवाह-गृहारम्भ-गृहप्रवेश-वस्त्राधारण सुरप्रतिष्ठेति विंशतिप्रकरणे विभक्तोऽस्ति। तद्यथा श्रीपतिना ग्रन्थोपसंहारे-

संवत्सरादितिथिवारगुणास्ततश्च योगाभिधानं करणप्रसंशा।
भानां फलानि तदनुक्षणजागुणाश्च पश्चादुपग्रहफलं रविसंक्रमोथः ।।

---

8. ज्योतिषरत्नमाला.१/२
9. बृहद्दैवज्ञरञ्जन.१/६-७

स्याद्गोचरः शशिफलं च विलग्नचिन्ता संस्कारजाग्निरभिषेचनमेवकर्मः।
यात्राविवाहविधिरालयसन्निवेशे वेश्मप्रवेशनववस्त्रसुरप्रतिष्ठाः ।।[10]

अत्र **प्रथमं प्रकरणं** संवत्सरनामकं वर्तते। प्रकरणेऽस्मिन् "प्रभवविरतिमध्यज्ञानवध्यानितान्त" मिति मङ्गलाचरणे कालस्य वन्दना कृता वर्तते। तदनन्तरं संवत्सरानयनप्रकारः वर्णितो वर्तते। तद्यथा-

शकेन्द्रकालः पृथगाकृतिघ्नः शशाङ्कनन्दाश्वियुगैः समेतः ।
शराद्रिवस्विन्दुहृतः सलब्धः षष्ट्याप्तशेषे प्रभवादयोऽब्दाः।।[11]

अर्थात् इष्टशककालः द्विधा संस्थाप्य एकत्र कृतिः (२२;छन्दविशेषः) इत्यनेन संगुणिता कार्या। लब्धिः शशाङ्कनन्दाश्वियुगैः (४२९१) संयोज्य शराद्रिवस्विन्दुः(१८७५) हृतः शेषः वर्षादि भवति। पूर्वस्थापितेष्टशककालेषु वर्षादिशेषः संयोज्य षष्ट्याप्ते शेषे प्रभवादिसम्वत्सराणि भवन्ति। यथा वर्षेस्मिन् इष्टशककालः १९४१ एवं सम्वत्सरः परीधावीनाम्नः वर्तते। तर्हि-१९४१ (इष्टशककालः)x२२(कृतिः) =४२७०२+४२९१(शशाङ्कनन्दाश्वियुगः)=४६९९३ ÷१८७५(शराद्रिवस्विन्दुः)=२५(शेषः)+१९४१ (इष्टशककालः)=१९६६ ÷६०=४६(परीधावी)। प्रभवादिसम्वत्सरनामानि निम्नलिखितानि सन्ति-

प्रभवादिगौरवसम्वत्सरनामानि-				
1. प्रभवः	13. प्रमाथी	25. खरः	37. शोभकृत्	49. राक्षसः
2. विभवः	14. विक्रमः	26. नन्दनः	38. क्रोधी	50. अनलः
3. शुक्लः	15. वृषः	27. विजयः	39. विश्वावसु	51. पिङ्गलः
4. प्रमोदः	16. चित्रभानुः	28. जयः	40. पराभवः	52. कालः
5. प्रजापतिः	17. सुभानुः	29. मन्मथः	41. प्लवंगः	53. सिद्धार्थी
6. अङ्गिरा	18. तारणः	30. दुर्मुखः	42. कीलकः	54. रौद्रः
7. श्रीमुखः	19. पार्थिवः	31. हेमलम्बी	43. सौम्यः	55. दुर्मतिः
8. भावः	20. व्ययः	32. विलम्बी	44. साधारणः	56. दुंदुभिः
9. युवा	21. सर्वजित्	33. विकारी	45. विरोधकृत्	57.रुधिरोद्गारी
10. धाता	22. सर्वधारी	34. शार्वरी	46. परिधावी	58. रक्ताक्षी
11. ईश्वरः	23. विरोधी	35. प्लवः	47. प्रमादी	59. क्रोधनः
12. बहुधान्यः	24. विकृतिः	36. शुभकृत्	48. आनन्दः	60. क्षयः

तदनन्तरं ऋतुविचारः, मासज्ञानमित्यादिविषयाः द्वाविंशतिश्लोकेषु वर्णिताः सन्ति।

10. ज्योतिषरत्नमाला.२०/१०-११
11. नरपतिजयचर्यास्वरोदयस्य द्वादशवार्षिकस्वरचक्रस्य व्याख्यायाम्

द्वितीयप्रकरणे तिथिपतयः, नन्दादितिथिसंज्ञाः, शुभाशुभतिथीनां विचारः तथा तिथिसम्बन्धिविचाराः वर्णिताः सन्ति।

तृतीयप्रकरणं वारनाम्ना वर्तते। प्रकरणेऽस्मिन् वारकृत्यं, वारप्रवृत्तिः, वारे विद्यारम्भमुहूर्तप्रभृतयो विषयाः चतुर्विंशतिश्लोकेषु प्रतिपादितास्सन्ति।

चतुर्थप्रकरणे नक्षत्रविषये चर्चा कृताऽस्ति। तत्र नक्षत्रदेवानां विचारः, नक्षत्रैः देवमनुष्य-राक्षसगणानां विचारः, नक्षत्रमाधारीकृत्य विद्यारम्भमुहूर्तस्तथा तत्सम्बन्धिनः अन्येऽपि विषयास्सन्ति।

पञ्चमप्रकरणं योगमाधारीकृत्य रचितमस्ति।

षष्ठप्रकरणे स्थिरचरकरणानां नामानि, करणानां देवताः, विष्टिस्वरूपमित्यादिविषयाः सन्ति। **सप्तमप्रकरणे** विविधमुहूर्तानां विचाराः कृतास्सन्ति।

अष्टमप्रकरणे नन्दाद्यष्टाविंशतियोगानां नामानि, अमृतसिद्धियोगाः, संवर्तयोगाः तथा अन्येऽपि तत् सम्बन्धिविषयाः वर्णितास्सन्ति।

नवमप्रकरणे सङ्क्रान्तिविचारो वर्तते।

दशमप्रकरणे ग्रहाणां शुभाशुभभावानां विचारः, ग्रहाणां समिधाविचारः, ग्रहकृतारिष्टनिवारणोपायः तथा तत्सम्बन्धिनः अन्येऽपि विषयाः ऊनविंशतिश्लोकेषु वर्णिताः वर्तन्ते।

एकादशे ताराबलं तथा **द्वादशे** लग्नमधिकृत्य प्रकरणं रचितमस्ति।

त्रयोदशप्रकरणे सीमन्तोन्नयनमुहूर्तः, जातकर्ममुहूर्तः, कर्णवेधमुहूर्तः, अन्नप्राशनादीनां मुहूर्तानां विचारा कृतास्सन्ति।

चतुर्दशप्रकरणं राज्याभिषेकविषयकमस्ति।

पञ्चदशप्रकरणे यात्राविषयः एकसप्ततिषु श्लोकेषु वर्णितोऽस्ति।

षोडशप्रकरणे विवाहफलं, विवाहे त्याज्यमासाः, गुरुशुक्रोदयास्तविचारः, क्रूरग्रहोद्भवयोगाः, षडष्टकविचारः, ग्रहाणां भावफलमित्यादयो विषयाः वर्णितास्सन्ति।

सप्तदशप्रकरणे गृहारम्भविचारः, **अष्टादशे** गृहप्रवेशविचारस्तथा **एकोनविंशे** वस्त्रधारणविचारः कृतोऽस्ति।

विंशतिप्रकरणं सुरप्रतिष्ठानामकमस्ति। प्रकरणेऽस्मिन् देवप्रतिष्ठाविचारः, नक्षत्रशुद्धिविचारः एवमन्येऽपि तत्सम्बन्धिविषयास्सन्ति।

एते सर्वे विषयाः अत्यन्तलोकोपयोगिनस्सन्ति। अधुना प्रायः समेषु पञ्चाङ्गेषु अस्य ग्रन्थस्य उक्तयः सचक्राः सचित्राः दृश्यन्ते। एवं भूतस्य ग्रन्थस्य यद्यपि अनेकाः मातृकाः उपलब्धास्सन्ति तथापि अद्यावधिः अस्य ग्रन्थस्य मूलपाठस्य प्रकाशनं शुद्धरूपेण सरलतया न प्राप्यते।

जन्माङ्गचक्रे राजभङ्गयोगानां समीक्षणम्

डॉ.शैलेशकुमारतिवारी
फलितज्यौतिषाचार्यः, विद्यावारिधिः
राष्ट्रियसंस्कृतसंसथानम्, लखनऊ-परिसरः
e-mail:- shaileshjyotirvigyan@gmail.com
चलदूरवाणी-9198823227

वरं वनं व्याघ्रगजेन्द्रसेवितं द्रुमालयं पक्वफलाम्बु भोजनम्।
तृणानि शय्या परिधानवल्कलं न बन्धुमध्ये धनहीनजीवनम्।।(१)

अनेन सुभाषितवचनेन सुस्पष्टो भवति यत् मानवजीवने प्रायः प्राचीनकालादेव परमोच्चपदेन सह समस्तैश्वर्यादिसुखोपभोगोपकरणानां कल्पना प्रचलिता वर्तते।इयं कल्पना अवधारणा वा तदा चरितार्था भवति यदा कस्यचिज्जातकस्य जातिकाया वा जन्मकुण्डल्यां तादृशाः ग्रहयोगास्स्युः येषां परस्परसम्बन्धेन राजयोगं निर्मीयते।राजगृहे राजयोगे वासमुत्पन्नानां जातकानां जीवने विनैव बाधा सर्वाणि धर्मार्थकाममोक्षादीनि मनोभिलषितानि कार्याणि पूरितानि भवन्ति।परन्तु जन्मकुण्डल्यां राजयोगोऽपि राजयोगानुरूपं फलप्राप्तिर्नैव भवति, तदा मनस्यनेके प्रश्नाःसमायान्ति यत् राजयोगफलंकथं न संघटति,कदा वा भविष्यतीति जिज्ञासायां राजभङ्गयोगानामत्र समीक्षा विधीयते।तत्र राजभङ्गयोगस्य कोऽभिप्रायः इति जिज्ञासायां कथ्यते यत् जन्मकुण्डल्यां केचन ग्रहयोगाः तादृशाः भवन्ति येषां सम्बन्धेन राजयोगाः भङ्गाः खण्डिता वा भवन्ति।एतदितिरिच्य केचन दरिद्रयोगाः कथितास्सन्ति तस्यां रेका-प्रेष्य-केमद्रुमयोगादयश्च प्रमुखाः,येषां जातकानां जन्मपत्रे एकोऽपि योगस्योपस्थितिवशात् विद्यमानाः विविधाः राजयोगाःभङ्गाःजायन्ते। उक्तञ्च जातकपारिजाते-

केचिद्योगाः राजयोगस्य भङ्गाः केचिद्रेकानामदारिद्र्ययोगाः।
केचित्प्रेष्याः के च केमद्रुमाख्यास्ते चत्वारो जातभङ्गाकराः स्युः।।(२)

अपि च-

मेषे जूकनवांशके दिनकरे पापेक्षिते निर्धनः
कन्याराशिगते यदा भृगुसुते कन्यांशके भिक्षुकः।
नीचर्क्षे त्वतिनीचभागसहिते जातो दिवानायके
राजश्रेष्ठकुलाग्रजोऽपिविगतश्रीपुत्रदाराशनः।।(३)

अर्थात् पापग्रहैर्दृष्टः मेषराशिस्थः सूर्यः तुलाराशिनवमांशे स्यात्, अथवा कन्याराशिगतः शुक्रः कन्याराशिनवमांशे व स्थितस्स्यात्, अपि च नीचराशिस्थिते सूर्ये परमनीचनवमांशे वा स्यात्। उपर्युक्तेषु त्रिषु ग्रहयोगेषूत्पन्नो जातकः क्रमेण निर्धनः, भिक्षुकः, अग्रगण्ये राजकुले समुत्पन्नेऽपि श्रीरहितः,स्त्री-पुत्रादिभिर्हीनो भवति। एते योगत्रयः राजभङ्गकारकास्सन्ति। जन्मकुण्डल्यां एतादृशानां

योगानामुपस्थितिवशात् समेषां राजयोगफलानां नाशो भवति। होराशास्त्रस्य प्रायः सर्वेषु ग्रन्थेषु राजभङ्गयोगानां वर्णनं सविस्तरेण प्राप्यते। प्रसङ्गेऽस्मिन् सारावलीवचनम्-

परनीचं गते चन्द्रे क्षीणो योगो महीपतेः।
नाशमायाति राजेव दैवज्ञप्रतिलोमगः ।।
तुलायां पद्मिनीबन्धुस्त्रिंशांशे दशमेऽस्थितः।
हन्ति राज्यं यथा लोभः समस्तगुणसञ्चयम्।।
जूकस्य दशमे भागे स्थितः कमलबोधनः।
सहस्रं राजयोगानां मन्दमेव करोत्यसौ।।(४)

एवमेव सूर्यचन्द्रौ रोगभावस्थितौ भूत्वा शनिना वीक्षितौ स्यातां तदा योगेस्मिन्नुत्पन्नो जातकः नीचकर्मेण वृत्तिमवाप्नोति। उक्तञ्च-

तारानाथविकर्तनौ गदगतौ सौरेण संवीक्षितौ ।
जातोऽसौ समुपैति नीचविहितोपायेन सञ्जीवनम्।।(५)

जातकस्य जन्मपत्रे केन्द्रे (१-४-७-१०) लग्नभावे वा शुभदृष्टिविवर्जितः शनिः स्यात् एवञ्च जातकस्य जन्म भौमस्य कालहोरायां स्यात्तदा योगेऽस्मिन् प्रसूतो जातकः भिक्षुको दासो वा भवति।तथा च भौमेन संयुतश्चन्द्रः मेषराशिगतो भूत्वा केन्द्रेऽवस्थितः सन् मन्देन दृष्टः परञ्च शुभग्रहैरदृष्टः स्यात्तदापि जातको भिक्षुको भवति।उक्तञ्च-

केन्द्रस्थे वा विलग्ने दिनकरतनये सौम्यखेटैरदृष्टे
भूसूनौ कालहोरासमयजमनुजो भिक्षको दासभूतः।
सौम्यादृष्टेऽर्किदृष्टे शशिनि सरुधिरे मेषगे भिक्षुकःस्या-
दर्क्कीन्द्वर्कैःसकेन्द्रैर्जडतनुरधनश्चान्यभुक्ताशनःस्यात्।।(६)

योगोऽयं किञ्चिदन्तरेण सर्वार्थचिन्तामणावपि प्राप्यते। तद्यथा-

मेषे शशाङ्के रविसूनुदृष्टे भिक्षाशनी भूमिसुतेन दृष्टे।
निःश्रीर्विलग्नस्य निशाकरस्य लुब्धो दिनेशात्मजदृष्टियोगात्।।(७)

अपि च- जन्मकुण्डल्यां केन्द्रे शनिः, लग्नभावे चन्द्रः, द्वादशभावे च देवगुरुः स्यात्तदा योगेऽस्मिन्नुत्पन्नो जातकः परदेशगामी, शोकसन्तप्तो भिक्षुकश्च भवति।

एवमेव भाग्येशः व्ययभावगतश्चेत्तदाजातकः पापकर्मरतः,विद्याविहीनः, परान्नभोगी, परधनरतश्च भवति। तद्यथा-

मन्दे केन्द्रगते विलग्नगृहगे चन्द्रेऽन्त्यभेवाक्पतौ
जातो भिक्षुक एव शोकजलधौ मग्नो विदेशं गतः।
धर्मस्थानपतौ तु रिष्फगृहगे पापग्रहे केन्द्रगे
जातः पापरतः परान्नधनभुग् विद्द्याविहीनो भवेत्।। (८)

राजभङ्गयोगस्यास्य चर्चा सर्वार्थचिन्तामणिग्रन्थेपि विद्यते। तद्यथा-

गृहात्परिभ्रष्टविदारपुत्रो गुणेन हीनो यदि वा जडोऽसौ।
केन्द्रे शनौ लग्नगते शशाङ्कजीवे व्यये भिक्षुक एव जातः।।(९)

राहु-केतुभ्यां युक्तो बृहस्पतिः पापग्रहैः संदृष्टः स्यात्तदा योगेऽस्मिन्नुत्पन्नो जातकः नीचकर्मकरो भवति। नीचराशिस्थे (मकरे) देवगुरौ नीचराशिगतैर्ग्रहैः वीक्षितस्स्यात्तदा ब्राह्मणकुलेऽपि समुत्पन्नो जातकः दुष्कर्मकर्ता भवति। लग्नेशः,चन्द्रः,सूर्यश्च मन्देन दृष्टोऽप्येकराशिगतस्स्यात्तदा योगेऽस्मिन्नुद्भवो जातकः आलस्ययुक्तो भवति। दशमे भावे स्थिताः शुभग्रहदृष्टिविवर्जिताः पापग्रहास्स्युस्तदा जातकः दासवृत्त्या स्वजीवनं यापयति। उक्तञ्च-

जीवे राहुयुतेऽथवा शिखियुते पापेक्षिते नीचकृत्
नीचे नीचसमीक्षितेसुरगुरौ विप्रोऽपि दुष्कर्मकृत्।
निद्री चन्द्रविलग्नपौ सह दिवानाथेन मन्देक्षितौ
प्रेष्यः स्यादशुभैः शुभग्रहदृशा हीनैश्च मानस्थितैः।।(१०)

अपि च-

भाग्येशेऽन्त्यगते सहोदरगतैः पापैर्व्ययेशेऽर्थगे
दुर्भोजी परिबन्धनादिसहितो जातोऽन्यजायारतः ।
सर्वैर्नीचसपत्नभागसहितैः कर्मेतरस्थानगै-
र्विद्याबुद्धिकलत्रपुत्ररहितः कोपी सदा भैक्षकृत्।। (११)

अर्थात् भाग्याधिपतिः व्ययभावे (द्वादशे),पापग्रहाः तृतीयभावे,द्वादशभावस्वामी द्वितीयभावे च स्युस्तदा योगेऽस्मिन् प्रसूतो जातकः निकृष्टान्नभोक्ता, बन्धनयुक्तः, परस्त्रीरतश्च भवति। तथा च सर्वेषां ग्रहाणां स्थितिः नीचराशिषु चेदथवा शत्रुनवमांशस्थाः सन् दशमस्थानं विहायान्येषु भावेषु स्थिताः स्युस्तदा योगेऽस्मिन्नुत्पन्नो जातकः विद्या-बुद्धि-स्त्री-पुत्रादिभिर्विहीनः, क्रोधी, भिक्षाटनेन च स्वकीयं जीवनं निर्वहति। प्रसङ्गेऽस्मिन् सर्वार्थचिन्तामणिवचनम्-

भागेश्वरे रिष्फगते तदीशे वित्तस्थिते भ्रातृगतैश्च पापैः।
केमद्रुमेस्मिन् स भवेत्कुभोजी दुष्कर्मयुक्तोऽन्यकलत्रगामी।।(१२)

अत्र प्रसङ्गवशात् मनसि विचारोऽयमुदेत्यत् ये जनाः परस्त्रिगामिनः व्यभिचारिणश्च सन्ति तेषां जन्मकुण्डल्यां नूनमेव राजभङ्गयोगान् द्रष्टुं शक्यते।साम्प्रतिकेऽस्मिन् काले भारतवर्षे उपर्युक्तेऽस्मिन् प्रसङ्गे उच्चपदाधिष्ठितानां जनानां प्रत्यक्षत्त्वेन राजभङ्गत्त्वं दरीदृश्यते।विषयेऽस्मिन् शास्त्रे अन्ये ये ग्रहयोगाः आचार्यैः कथिताः तेषां योगानां समुपस्थापनं क्रियते। तद्यथा-

लग्नेशः व्ययभावस्थः,भौमेन सह चन्द्रः दशमभावे क्रूरराशिषु (मेष-सिंह-धनु-कुम्भादिषु) स्यात्तदा योगेऽस्मिन्प्रादुर्भूतो जातकः धन-सुखहीनः, दरिद्रो भूत्त्वा परस्त्रीरतो भवति। एवमेव जन्मलग्न-चन्द्रराश्याधिपती शुभग्रहैरसंयुक्तौ अस्तङ्गतौ च स्यातां तथा भाग्येशः द्वादशभावगतस्तदा योगेऽस्मिन्

प्रसूतो जातकः जाया-सुतादिभिर्हीनः स्वकुलसंहारकश्च भवति। यथोक्तम्-

लग्नस्वामिनि रिष्फगे तु वियति क्रूरे सचन्द्रे कुजे
जातोऽसौ परदेशगः सुखधनत्यागी दरिद्रो भवेत्।
होराजन्मपती न शोभनयुतावस्तङ्गतावन्त्यगे
भाग्येशे यदि नष्टदारतनयो जातः कुलध्वंसकः।।(१३)

अपि च-

सौम्यासौम्ययुतेषु केन्द्रभवनेश्विन्दौ तनुस्वामिना
दृष्टे मन्दनवांशके सति कुलध्वंसी विदारात्मजः।
कामे बोधनशुक्रयोः सुतगृहे जीवे सुखस्थेऽशुभे
पापे रन्ध्रगते च चन्द्रभवनाज्जाताः कुलध्वंसिनः।। (१४)

अर्थात् यदि शनिनवांशगतः केन्द्रस्थः चन्द्रमाः लग्नेशेन संदृष्टः स्यात्तथा केन्द्रभावेषु सौम्यपापग्रहाः स्थिताःस्युस्तदा योगेऽस्मिन्नुत्पन्नो जातकः सुत-कलत्रादिहीनः, कुलध्वंसी च भवति। एवमेव जातकस्य जन्मपत्रं सम्यक् निरीक्ष्य राजयोगसम्बन्धिफलविवेचने ध्यानं दातव्यं भवति येन फलादेशकथनं सम्यक् घटति।

सन्दर्भग्रन्थसूची-

१.सुभाषितरत्नभाण्डागारम्-
२.जातकपारिजातः-६/१
३.तत्रैव- ६/२
४.सारावली-३८/१४-१६
५.जातकपारिजातः-६/३
६.तत्रैव-६/४
७.सर्वार्थचिन्तामणिः-९/४१
८.जातकपारिजातः-६/५
९.सर्वार्थचिन्तामणिः-९/६२
१०.जातकपारिजातः-६/६
११.तत्रैव-६/७
१२.सर्वार्थचिन्तामणिः-९/५१
१३.जातकपारिजातः-६/८
१४.जातकपारिजातः-६/९

राजयोगविमर्शः

वेदप्रकाशपाठकः
फलितज्योतिषाचार्यः
राष्ट्रियसंस्कृतविद्यापीठम्,
तिरुपति-517507
e-mail:- ved_manchester@rediffmail.com
Mob:-800930804

वेदस्य निर्मलं चक्षुर्ज्योतिःशास्त्रमकल्मषमिति[1] नारदीयवचनानुसारं वेदपुरुषस्य षडङ्गेषु चक्षुर्रूपेण राराजते ज्योतिषशास्त्रम्। ननु नासिका-कर्ण-मुख-हस्त-पादेत्यादिषु षडङ्गेषु चक्षुर्रूपेणैव कथं ज्योतिषशास्त्रमित्याह भास्कराचार्यः-

शब्दशास्त्रं मुखं ज्योतिषं चक्षुषी श्रोत्रमुक्तं निरुक्तञ्च कल्पः करौ।
या तु शिक्षास्य वेदस्य सा नासिका पादपद्मद्वयं छन्द आद्यैर्बुधैः।।[2]

अनेनैव वेदाङ्गेषु चक्षुःस्वरूपेण ज्योतिषशास्त्रेण ज्योतिषशास्त्रस्य ज्ञाता (दैवज्ञः) जातकस्य ललाटे सर्वामपि लिखितामक्षरमालिकां पठितुं सर्वथा समर्थो भवति। तद्यथा श्रीकल्याणवर्मा आह-

विधात्रा लिखिता याऽसौ ललाटेऽक्षरमालिका ।
दैवज्ञस्तां पठेद् व्यक्तं होरानिर्मलचक्षुषा ।।[3]

अपि च -

होरेत्यहोरात्रविकल्पमेके वाञ्छन्ति पूर्वापरवर्णलोपात् ।
कर्मार्जितं पूर्वभवे सदासि यत्तस्य पङ्क्तिं समभिव्यनक्ति ।।[4]

ज्योतिषशास्त्रस्य स्कन्धत्रयेषु होरास्कन्धः सर्वाधिकव्यावहारोपयोगिनो भूत्वा लोके प्रसिद्धोऽस्ति। लोके दृश्यते यत् कश्चन जनः सर्वगुणसंपन्नः, कश्चन दरिद्रः, तथा कश्चन जनः वैभवयुक्तः भवति। तत्र कारणीभूताः ग्रहैव सन्ति। जातकस्य जन्मकुण्डल्यां ग्रहस्थित्यनुसारं राजयोगादिशुभयोगाः तथारिष्टयोगाद्यशुभयोगाः भवन्ति। एतेषां शुभाशुभयोगानां विचारणात् प्राक् जातकस्यायुर्दायविचारः करणीयोऽन्यथा योगः व्यर्थं याति। यथोक्तं श्रीपराशरेण -

पूर्वमायुः परीक्ष्येत पश्चाल्लक्षणमेव च।
अन्यथा लक्षणज्ञाने ह्याशो व्यर्थतामियात्।।[5]

आयुर्दायविचारात् परं तन्वादिद्वादशभावाः एवं सूर्यादिनवग्रहाः अनयोः माध्यमेन राजयोगाः

---

1. नारदसंहिता-1/4
2. सिद्धान्तशिरोमणिः कालमानाध्यायः श्लो.सं.10
3. सारावली- 2/1
4. बृहज्जातकम् 1/3
5. बृहत्पाराशरहोराशास्त्रम्

विचारणीयाः। तत्रादौ तन्वादिद्वादशभावानुसारं राजयोगाः विमृश्यन्ते। तन्वादिस्पष्टद्वादशभावेषु एकादश-तृतीय-अष्ट-षष्ठ-द्वादशभावाः अशुभभावाः भवन्ति। एषां भावानां योगः (यदि राशिस्थाने द्वादशादधिकं भवेत्तर्हि द्वादशभिः तष्टितः कार्यः) मेषादिक्रमे यस्मिन् भावे भवति तस्य भावस्य हानिं करोति। तद्यथा मध्यपराशरौ -

लाभस्तृतीयो रन्ध्रश्च षष्ठभावो व्ययस्तथा।
एषां योगेन यो भावस्तस्य नाशो भवेद् ध्रुवम्।[6]

यथा अस्यां कुण्डल्यां(चि.सं.१) कल्प्यते यत् यदि एकादश-तृतीय-अष्ट-षष्ठ-द्वादशभावानां योगः १६/२०/१६/०४ इत्यस्ति तथा तत् द्वादशभिः अधिकः अतः द्वादशभिः विशोधनीयः- १६/२०/१६/०४-१२=४/२०/१६/०४ शेषराश्यादिकः षष्ठभावे अस्ति। अतः षष्ठभावात् विचारणीयविषयाणां यथा ऋणरिपुरोगादीनां नाशो भवति। पुनः यदि सुखकर्माधिपौ मन्त्रनाथेन (पञ्चमेशेन) संयुतौ धर्मनाथेन (नवमेशेन) संदृष्टौ भवेतां तर्हि जातकः बहुराज्यभाक् भवति। यथा अस्यां कुण्डल्यां (चि.सं.१) सुखकर्माधिपौ बुधजीवौ मन्त्रनाथेन चन्द्रेण संयुतौ धर्मनाथेन शुक्रेण संदृष्टौ राजयोगकारकौ भवतः। तद्यथा -

सुखकर्माधिपौ द्वौ चेत् मन्त्रनाथेन संयुतौ।
धर्मनाथेन संदृष्टौ जातश्चेद् बहुराज्यभाक्।।[7]

जन्मकुण्डल्यां बुधशुक्रयुक्तः दृष्टः वा शनिः मकरकुम्भान्यतरे लग्ने भवेत्तर्हि जातकः धनयशोऽर्चितः भवति। यथा अस्यां कुण्डल्यां (चि.सं.२) मकरलग्ने शनिः बुधशुक्रयुतः वर्तते। अतः योगेऽस्मिन् उत्पन्नजातकः धनयशोभ्यां युक्तः भवति। तद्यथा -

शनिक्षेत्रे गते लग्ने तस्मिन् शनियुते यदि।
बुधशुक्रयुते दृष्टे जातो धनयशोऽन्वितः ।।[8]

जातकस्य जन्मकुण्डल्यां त्रिकोणेशः (५,९) यदि केन्द्रे तथा केन्द्रेशः (१,४,७,१०) यदि त्रिकोणभावे भवेतथवा येन केनापि प्रकारेण अनयोर्मध्ये सम्बन्धः भवेत्तर्हि राजयोगोत्पद्यते।

योगोऽयमस्माकं देशस्य प्रथमराष्ट्राध्यक्षस्य डा. राजेन्द्रप्रसाद-महाभागस्य जन्मकुण्डल्यां द्रष्टुं शक्नुमः। तेषां जन्मकुण्डल्यां लग्नाधीशः गुरुः नवमे तथा पञ्चमभावस्याधिपतिः भौमः लग्ने स्थितः वर्तते। अनेन केन्द्रत्रिकोणयोः मध्ये सम्बन्धेन

अथ जन्माङ्गचक्रम्



रूसदेशस्य राष्ट्रपतिः स्टालिन महोदयः
जन्मतिथिः 21/12/1879

6. मध्यपाराशरी-
7. बृहत्पाराशरहोराशास्त्रम्-41/37
8. मध्यपाराशरी 2/16

राजयोगः सञ्जायते। तद्यथा भगवता पराशरेण -

लक्ष्मीस्थानं त्रिकोणाख्यं विष्णुस्थानन्तु केन्द्रकम्।
तयोः सम्बन्धमात्रेण चक्रवर्ती नरो भवेत्।।[9]

राजयोगेषु पञ्चमहापुरुषयोगः कश्चन विशिष्टयोगो वर्तते। रुचकभद्रहंसमालव्यशशयोगाः पञ्चमहापुरुषयोगान्तरगताः भवन्ति। मूलत्रिकोणे निजगृहे वा तुङ्गे केन्द्रे गताश्च भौमादिपञ्चग्रहाः पञ्चमहापुरुषयोगानुत्पादयन्ति। तद्यथा -

मूलत्रिकोणनिजतुङ्गगृहोपयाता भौमज्ञजीवसितभानुसुता बलिष्ठाः।
केन्द्रस्थिता यदि तदारुचभद्रहंसमालव्यचारुशशयोगकरा भवन्ति।।[10]

एतेषु पञ्चमहापुरुषयोगेषु रुचकमालव्ययोगौ स्टालिनमहोदयस्य जन्मकुण्डल्यां द्रष्टुं शक्नुमः। महोदयोऽयं कुशलराजनीतिज्ञः एवं रशियादेशस्य राष्ट्रपतिः(१९२२-१९५२) आसीत्। अस्य जन्मकुण्डल्यां शुक्रः स्वक्षेत्रगतः भूत्वा लग्नेऽवस्थितः सन् मालव्य-योगाख्यं राजयोगमुत्पादयति। योगेऽस्मिन् उत्पन्नः जातकः सौन्दर्यशाली, गुणी, तेजस्वी, सुतदारवाहनधनी, शास्त्रार्थवित्-पण्डितादि योगफलमवाप्नोति। परिणामतः अयं जातकः एतादृशं फलमवाप्नुयात्।

स्टालिनमहोदयस्य जन्मकुण्डल्यां स्वक्षेत्रगतः भौमः सप्तमभावेऽवस्थितो भूत्वा रूचकयोगमुत्पादयति। योगेऽस्मिन् उत्पन्नः जातकः बलान्वित-वपुः नृपः सेनातुरङ्गाधिपश्च भवति। तद्यथा जातकपरिजाते -

जातः श्रीरुचके बलान्वितवपुः श्रीकीर्तिशीलान्वितः
शास्त्री मन्त्रजपाभिचारकुशलो राजाऽथवा तत्समः।
लावण्यारुणकान्तिकोमलतनुस्त्यागी जितारिर्धनी
सप्तत्यब्दमितायुषा सह सुखी सेनातुरङ्गाधिपः।।[11]

अस्य योगप्रभावादेव अयं महानुभावः बलान्वित-वपुः नृपः

अथ जन्माङ्गचक्रम्



भारतदेशस्य प्रथमप्रधानमन्त्री
पं.जवाहरलालनेहरुमहोदयः
तिथिः 14/11/1889, समयः-23/30
जन्मस्थानम्- प्रयागः (उ.प्र.)

अथ जन्माङ्गचक्रम्



अमेरिकादेशस्य राष्ट्रपतिः
आजिन होवरमहोदयः Eisenhower
तिथिः 14/10/1890, समयः-17/15
जन्मस्थानम्- Denison America

---

9. मध्यपाराशरी 1/16
10. जातकपारिजाते 7/59
11. जातकपारिजाते 7/60

सेनातुरङ्गाधिपश्च सञ्जातः।

मालव्ययोगोऽयमस्माकं देशस्य प्रथमप्रधानमन्त्रिणः कुण्डल्यामपि अस्ति। नेहरुमहोदयस्य जन्मकुण्डल्यां शुक्रः तुलाराशौ चतुर्थभावे स्थितः सन् मालव्ययोगमुत्पादयति। मालव्ययोगोत्पन्नजातकः तेजस्वीसुतदारवाहनधनी शक्ति- सम्पन्नः गुणी च भवति। तद्यथा **मालव्ययोगः -**

स्त्रीचेष्टो ललिताङ्गसन्धिनयनः सौन्दर्यशाली गुणी
तेजस्वी सुतदारवाहनधनी शास्त्रार्थवित्पण्डितः ।
उत्साहप्रभुशक्तिमन्त्रचतुरस्त्यागी परस्त्रीरतः
सप्तत्यब्दमुपैति सप्तसहितं मालव्ययोगोद्भवः ।। [12]

यद्यपि जातकस्यायुषः निर्धारणमायुर्दायविचारेणैव करणीयं तथापि "सप्तत्यब्दमितायुषा" एवं "सप्तत्यब्दमुपैति सप्तसहितं" इत्यनयोः पङ्क्त्योरनुसारं जातकस्यायुः सप्ततिः (७०) सप्तसप्ततिः (७७) मध्ये एव भवेत्। एवं वयं सर्वे जानीमः यत् स्टालिन-नेहरूमहोदयोरायुः प्रमाणं तन्मध्यसमः अर्थात् चतुर्सप्ततिः (७४) आसीत्।

अस्य भद्रयोगस्योदाहरणरूपेण डेविड-आइजनहोवरमहोदयस्य जन्मकुण्डलीं द्रष्टुं शक्नुमः। तेन द्वितीयविश्वयुद्धावसरे अमेरिका-ब्रिटेनदेशयोः सैन्यानां सञ्चालनं कृतमासीत्। असौ एव १९५३ तः १९६१ यावत् अमेरिकादेशस्य राष्ट्रपतिपदमलंकृतवान्। "अशीतिमितायुः" इति शास्त्रीयवचनासन्नमेव तस्यायुः एकोनाशीतिः (७९) इत्यासीत्। तस्य जन्मकुण्डल्याम् इन्दुतनयः स्वक्षेत्रे कन्याराशौ अवस्थितो भूत्वा सप्तमभावगतो वर्तते। योगेऽस्मिन् उत्पन्नजातकः शार्दूलप्रतिमाननः, गजगतिः, पीनोरुवक्षस्थलः, सुवृत्तबाहुः, मानी, बन्धुजनोपकारनिपुणः, राजा, विपुलप्रज्ञायशो- वित्तवाँश्च भवति। तद्यथा -

शार्दूलप्रतिमाननो गजगतिः पीनोरुवक्षस्थलो
लम्बापीनसुवृत्तबाहुयुगलस्तत्तुल्यमानोच्छ्रयः ।
मानी बन्धुजनोपकारनिपुणः श्रीभद्रयोगोद्भवो
राजाऽशीतिमितायुरेति विपुलप्रज्ञायशोवित्तवान्।।[13]

इत्थं जन्मपत्रफलादेशप्रसङ्गे अन्येऽपि राजयोगाः अन्वेषणीयाः। किमधिकं विस्तरेणेति दिक्।

---

12. जातकपारिजाते 7/64
13. जातकपारिजाते 7/62

वेदज्यौतिषयोः दृष्ट्या जीवजगति सूर्यप्रभावः

डॉ. रमेशशर्मा
राजकीयनेहरुसंस्कृतमहाविद्यालयः
फागली, शिमला (हि. प्र.)

वेदेषु वर्णितमस्ति यत् सूर्यः सर्वस्य स्थावरजङ्मात्मकस्य सर्वप्राणिजातस्य आत्मा वर्तते। **सूर्य आत्मा जगतस्तस्थुषश्च**[1] । अथ स एष आत्मा लोकानां द्यावापृथिव्योरन्तरेण नभोवलयस्य कालचक्रगत्या द्वादशमासान् भुङ्क्ते[2]। ज्योतिषशास्त्रे सृष्टिनिरूपणे भूगोलाध्याये परब्रह्मणो वासुदेवस्यांशरूपः संकर्षणो नाम (प्रकृतिर्हि ब्राह्मी माया तदन्तर्गतः) स्वकीयांशेन आदौ जलसृष्टिं निर्माय तासु स्वशक्तिविशेषं वीर्यं अवासृजत्। तेन उत्क्षिप्तवीर्येण जलस्य संयोगेनान्धकारेणाच्छादितं हैमं पिण्ड़मेकं प्रादुर्भूत्। तद्धैमं पिण्ड़ मेवानिरूद्धरूपेणाभिव्यक्तोऽभूत्। यथोक्तं सूर्यसिद्धान्ते [3]-

वासुदेवः परं ब्रह्म तन्मूर्तिः पुरुषः परः ।
अव्यक्तो निर्गुणः शान्तः पंचविंशात्परोऽव्ययः ।।
प्रकृत्यन्तर्गतो देवो बहिरन्तश्च सर्वगः ।
संकर्षणोऽपः सृष्ट्वादौ तासु वीर्यमवासृजत् ।।
तदण्डमभवद् हैमं सर्वत्र तमसावृतम् ।
तत्रानिरुद्धः प्रथमं व्यक्तीभूतः सनातनः ।।

अतोऽयं षड्गुणैश्वर्यसम्पन्नो भगवाननिरूद्धो हिरण्याण्डमध्यगतोऽभिव्यक्तत्वात् वेदेषु हिरण्यगर्भः इति गीयते। यथा[4]-

हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेकऽआसीद्।
स दाधारपृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ।।

ज्योतिषशास्त्रेऽयं हिरण्यगर्भः अनिरुद्धो वा आदिभूतत्वादादित्यः तथा च जगदुत्पत्तितया प्रसूत्या वा सूर्यः इत्युच्यते[5] -

हिरण्यगर्भो भगवानेषच्छन्दसि पठ्यते ।
आदित्यो ह्यादिभूतत्वात् प्रसूत्या सूर्य उच्यते ।।

अतः सम्पूर्णजगदुत्पतेः तथा पालनस्य कारणं सूर्य एव। शब्दार्थदृष्ट्या सरति आकाशे इति

1. शुक्लयजुर्वेदे-7/42
2. श्रीमद्भागवत्पुराणे पंचमस्कन्धे द्वाविंशाध्याये ।
3. सूर्यसिद्धान्ते भूगोलाध्याये 12/12-14
4. शुक्लयजुर्वेदे-13/4
5. सूर्यसिद्धान्ते भूगोलाध्याये 12/15

सूर्यः। सूर्यस्य अपरं नाम सविताऽपि वर्तते। यस्यार्थोऽस्ति सुवति स्व-स्वकर्मणि, स्व-स्वव्यापारे जगत् प्रेरयतीति सविता। सूर्योदये एव सर्वप्राणिनां सर्वव्यापारेषु प्रवृत्तिः। उक्तं च याज्ञवल्क्येन -

सविता सर्वभूतानां सर्वभावान्प्रसूयते ।
सवनात्पावनाच्चैव सविता तेन चोच्यते ।।[6]

यजुर्वेदे वर्णितं यत् भुवनवर्ती सूर्यदेवः अन्तरिक्षलोकेन परागच्छन् पुण्यपापकर्तृन् साक्षिवत् निरीक्षमाणः देवं मनुष्यं च स्वस्वकर्मणि प्रवर्तयति -

आकृष्णेन रजसा व्वर्तमानो निवेशयन्नमृतं मत्यञ्च ।
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन्।।[7]

वेदेषु द्विविधा देवाः भवन्ति। 1. कर्मदेवाः 2. आजानदेवाः। स्वकर्मभिः तपस्यादिभिरुत्कृष्टकर्मभिः देवत्वं गताः कर्मदेवाः। सृष्ट्यादौ समुत्पन्ना आजानदेवाः। अतः सूर्यः सृष्ट्यादावुत्पन्नत्वाद् आजानदेवः। स कर्मदेवापेक्षया श्रेष्ठः। देवत्वमाजानमग्रे इति श्रुतिवचनात् देवलोकेषु अग्निचन्द्रनक्षत्राऽपेक्षया उत्कृष्टज्योतिस्वरूपः। सूर्य एव एतादृशः ग्रहः वर्तते, यस्य किरणैरन्ये ग्रहाः उज्ज्वलाः ज्योतियुक्ताः दृश्यन्ते। ग्रहाणां नक्षत्राणां च पार्श्वे स्वगततेजो नास्ति। तेषु ग्रहनक्षत्रेषु यावद् भागे यावति प्रदेशे रविकिरणास्तत्र लगन्ति, तावानेवोज्ज्वलः तदन्यभागोऽनुज्ज्वलोऽस्ति। यथोक्तमाचार्यकमलाकरभट्टेन -

तेजसां गोलकः सूर्यो ग्रहर्क्षाण्यम्बुगोलकाः।
प्रभावन्तो हि दृश्यन्ते सूर्यरश्मिप्रदीपिताः।।[8]

यजुर्वेदे वर्णनमुपलभ्यते यद्वयं सूर्योपस्थानकर्मणा भूलोकस्योपरिस्थितं स्वर्गलोकं पश्यन्तः सूर्यं प्राप्नुयामः -

ॐ उद्वयं तमसस्परि स्वः पश्यन्तऽउत्तरम् ।
देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ।। [9]

सृष्ट्युत्पत्तिप्रक्रियायां वेदेषु वर्णितं, यत् विराटपुरुषस्य चक्षुषः सूर्य उत्पन्नोऽभूत् । चक्षुषः सूर्योऽजायत अर्थात् परमात्मनः नेत्रस्वरूपं सूर्यं वर्तते । श्रीमद्भगवद्गीतायामपि महर्षिवेदव्यासेनोक्तम्-

यदादित्यगतं तेजो जगद्भासयतेऽखिलम् ।
यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम् ।।[10]

अतः भारतवर्षे वैदिककालादेव सूर्योपासनायाः प्रचलनमस्ति। वेदेषु - पुराणेषु - उपनिषत्सु वर्णितं यत् सूर्य एव सृष्टेः मूलतत्त्वं येन सम्पूर्णं जीवजगत् नियन्त्रितं भवति। वेदस्य ज्ञानप्रवर्तकानि षड्वेदाङ्गानि

6. यज्ञवल्क्यशिक्षा-
7. शुक्लयजुर्वेदे-33/43
8. सिद्धान्ततत्त्वविवेकः, बिम्बाधिकारः श्लो.सं. 03
9. शुक्लयजुर्वेदः- 20/21
10. श्रीमद्भगवद्गीतायाम्-15/12

प्रोक्तानि। शिक्षा-कल्प-व्याकरण-निरुक्तच्छन्दज्योतिषशास्त्राणीति[11]। वेदांगेषु ज्योतिषशास्त्रस्य चक्षुः स्थानमस्ति। यथोच्यते **ज्योतिषामयनं चक्षुः**[12]। अस्मिन् शास्त्रे भूगोलखगोलयोरुभयोरेव दर्शनं मिलति। कालज्ञानं ज्योतिषशास्त्रस्य महत्त्वपूर्णो विषयो वर्तते। यतोहि सृष्टेः स्थिति-प्रलयं च कालाधीनं वर्तते। समस्तज्ञानं विज्ञानं च कालस्य अधीनं वर्तते। सूर्यसिद्धान्ते स्वयमेव भगवता सूर्येणोक्तम् -

लोकानामन्तकृत् कालः कालोऽन्यः कलनात्मकः।
स द्विधा स्थूलसूक्ष्मत्वान्मूर्तश्चामूर्त उच्यते।।[13]

अथर्ववेदेऽपि वर्णितमस्ति -

काल ह भूतं भव्यं चेषितं ह वि तिष्ठते।[14]

कालो हि द्विविधः - एकस्तु सकलभुवनभूतानां संहारकः। अन्यः कालः गणनात्मकः, येन समयस्य गणना भवति। अस्य कालस्य नवमानानि सन्ति। तेषु सूर्यसम्बन्धितमानं सौरमानं वर्तते। अनेन मानेन सर्वं स्थावरजङ्गमात्मकं सर्वप्राणिजातं स्वकर्मसु प्रवृत्तं भवति। यतो हि यदा सूर्यस्य दर्शनं भवति तदा दिनमदर्शने रात्रिः। ज्योतिषशास्त्रीयपरिभाषानुसारं क्षितिजोर्ध्वस्थे रवौ दिनं, क्षितिजादधःस्थे रवौ च रात्रिर्भवति[15]। अतएव ज्योतिषशास्त्रे कालगणनायामाधारितस्य कालस्य मुख्यावयवानां मास-ऋतु-गोल-अयन-वर्षादीनां पूर्तिज्ञानं पूर्णवैज्ञानिकरूपेणोपलभ्यते। अस्य मूलाधारः सूर्य एव। रवेः मेषादिद्वादशराश्यात्मकचक्रस्य पूर्वगत्या यावताकालेन भोगं करोति, सः कालो रविवर्षमित्युक्तमाचार्यभास्करेण- **रवेश्चक्रभोगोऽर्कवर्षं प्रदिष्टम्,**[16] **वर्षायनर्तुयुगपूर्वकमत्र सौरान्।**[17] एकस्मिन् वर्षे द्वादशमासाः भवन्ति। सूर्यस्य एकराशिभ्रमणकालः भोगकालः वा एकसौरमासः वर्तते। एवमेव द्वादशराशिभोगकालेन द्वादशसौरमासाः भवन्ति। प्रसङ्गादत्र चैत्रादिद्वादशचान्द्रमासानां नामानि उपस्थाप्यन्ते। तद्यथा-[18]

मासश्चैत्रोऽथ वैशाखो ज्येष्ठ आषाढसंज्ञकः ।
ततस्तु श्रावणो भाद्रपदोऽथाश्विनसंज्ञकः ।
कार्तिको मार्गशीर्षश्च पौषो माघोऽथ फाल्गुनः।।
एतानि मासनामानि चैत्रादीनां क्रमाद्विदुः।।

---

11. पाणिनीयशिक्षायाम्- श्लो.सं. 41-42
12. तत्रैव पाणिनीयशिक्षायाम्- श्लो.सं. 41-42
13. सूर्यसिद्धान्ते मध्यमाधिकारे श्लो.सं. 1/10
14. अ थ व-ॅ व े द े
15. **दिनं दिनेशस्य यतोऽत्रदर्शने तमी तमोहन्तुरदर्शने सति।**
कुपृष्ठगानां द्युनिशं यथा नृणां तथा पितृणां शशिपृष्ठवासिनाम्।। सि.शि. गोला. त्रिप्रश्नवासना-श्लो.सं. 10
16. सि.शि. मध्यमा.कालमानाधिकारे श्लो. सं. 19
17. सि.शि. मध्यमा.कालमानाधिकारे श्लो. सं. 31
18. भारतीयकुण्डलीमीमांसा-2/26-27

एवमेव ज्योतिषशास्त्रे द्वादशराशिषु सूर्यगतिः पृथक्-पृथक् द्वादशमासरूपेण प्राप्ता भवति। भारतीयसंस्कृतौ योगासनविधिना सूर्यनमस्कारः सूर्यस्य द्वादशनामरूपेण प्राचीनकालादेवोपलभ्यते - 1. ॐ मित्राय नमः। 2. ॐ रवये नमः। 3. ॐ सूर्याय नमः। 4. ॐ भानवे नमः। 5. ॐ खगाय नमः। 6. ॐ पूष्णे नमः। 7. ॐ हिरण्यगर्भाय नमः। 8.ॐ मरीचये नमः। 9. ॐ आदित्याय नमः। 10. ॐ सवित्रे नमः। 11. ॐ अर्काय नमः। 12. ॐ भास्कराय नमः।

आदित्यस्य नमस्कारं ये कुर्वन्ति दिने दिने ।
जन्मान्तरसहस्त्रेषु दारिद्र्यं नोपजायते ।।[19]

अत एव भारतीयसंस्कृतौ नित्यकर्मरूपेण सूर्यस्य पूजनमर्चनं तथा च नमस्कारः प्रतिदिनं भवति। प्रातः संध्यावसाने तु नित्यं सूर्यं समर्चयेत्। (पारिजात) एकस्मिन् वर्षे षडर्तवो भवन्ति[20]। सूर्यस्य द्वयोः राश्योः भ्रमणकालः ऋतुर्भवति। अर्थात् चैत्रादिद्विद्विमासाभ्यां वसन्तादयः षडर्तवः भवन्ति। यथा मीनमेषयोः वसन्तर्तुः, वृषमिथुनयोः ग्रीष्मर्तुः, कर्कसिंहयोः वर्षर्तुः, कन्यातुलयोः शरदृतुः, वृश्चिक-धन्वोः हेमन्तर्तुः तथा च सूर्यस्य मकरकुम्भराशौ स्थिते सति शिशिरऋतुर्भवति। ऋतूनां परिवर्तनेन पारिस्थितिकतन्त्रं पूर्णरूपेण परिवर्तितं भवति। परिवर्तनोऽयं सूर्यराशिभ्रमणकालाद् प्रत्यक्षरूपेण दृश्यते। कस्मिन् ऋतौ कीदृशं वातावरणं भवति। आयुर्वेदशास्त्रे विकाररहितासु ऋतुषु औषधिसंचयो निर्माणं च गुणकारि भवति। यः ऋतुविकारोत्पन्नं रोगं नाशयति। यस्योल्लेखो ज्योतिषशास्त्रस्य संहितास्कन्धे आदित्याचाराध्याये विस्तरेणोपलभ्यते। आचार्यवराहमिहिरः ऋतुवशादाकाशे सूर्यमण्डलस्य वर्णानुसारं शुभाशुभफलं निगदति[21] -

ताम्रः कपिलो वार्कः शिशिरे हरिकुंकुमच्छविश्च मधौ ।
आपाण्डुकनकवर्णं ग्रीष्मे वर्षासु शुक्लश्च।।
शरदि कमलोदराभो हेमन्ते रुधिरसंनिभः शस्तः।
प्रावृट्काले स्निग्धः सर्वर्तुनिभोऽपि शुभदायी।।

अर्थात् यदि शिशिरे ऋतौ सूर्यमण्डलस्य वर्णः ताम्रपीतसदृशः, वसन्तर्तौ हरितकुंकुमवत्, ग्रीष्मर्तौ पाण्डुसवर्णसदृशः, वर्षाकाले शुक्लः, शरदृर्तौ कमलनाभसदृशः, हेमन्ते रक्तसंन्निभः स्यात् तदा शुभफलदायको भवति। ग्रीष्मर्तौ रक्तवर्णो रविमण्डलं भयमुत्पादयति, वर्षर्तौ कृष्णवर्णः सूर्यमण्डलं अनावृष्टिं करोति, हेमन्तर्तौ पीतवर्णं रविमण्डलं रोगभयं ददाति। यदि रविमण्डलं इन्द्रधनुश्चापेन खण्डितं स्यात्, तदा नृपतीनां परस्परं विरोधो भवति। वर्षाकाले निर्मलकान्तियुक्तं रविमण्डलः सद्यः वृष्टिं करोति[22]-

ग्रीष्मे रक्तो भयकृद्वर्षास्वसितः करोत्यनावृष्टिम्।.

19. शिवसपर्या
20. भारतीयकुण्डलीमीमांसा-2/24
21. बृहत्संहिता -3/23-24,
22. बृहत्संहिता -3/ 26-27

हेमन्ते पीतोऽर्कः करोति न चिरेण रोगभयम्।।
सुरचापपाटिततनुर्नृपतिविरोधप्रदः सहस्त्रांशुः।
प्रावृट्काले सद्यः करोति विमलद्युतिर्वृष्टिम्।

यद्याकाशे स्वच्छः, अखण्डितः, विस्तृतरश्मिवान्, अविकृततनुवर्णचिन्हयुक्तश्च रविमण्डलं दृश्यते, तदा लोकस्य मंगलं करोति [23]-

अमलवपुरवक्रमण्डलः स्फुटविपुलामलदीर्घदीधितिः।
अविकृततनुवर्णचिह्नभृज्जगति करोति शिवं दिवाकरः।।

यथा वेदेषु सृष्ट्युत्पत्तिप्रक्रियायां विराट्पुरुषस्यावयवानां वर्णनमुपलभ्यते, तथैव ज्योतिषशास्त्रस्य होरास्कन्धे मेषादिद्वादशराशिसहितनक्षत्रयुक्तः कालपुरुषः वर्तते। सूर्यः तस्य कालपुरुषस्य आत्माऽस्ति। कालात्मा दिनकृदिति तथा च सौरमण्डलस्याधिपतिरस्ति। राजानौ रविशीतगू। यथा गृहमध्यभागे स्थितः दीपकः सम्पूर्णगृहं प्रकाशयति, तथैव सौरमण्डलाधिपतिः सूर्यः स्वकीयसहस्त्ररश्मिप्रकाशेन लोकान् प्रकाशयति। होरास्कन्धे सूर्यस्य स्वरूपं विविधप्रकारेण प्रतिपादितमस्ति[24] -

मधुपिंगलदृक्सूर्यश्चतुरस्त्रः शुचिर्द्विजः ।
पितप्रकृतिको धीमान् पुमानल्कचो द्विजः ।।

मधुवत्पिंगलदृष्टियुक्तः प्रसारितभुजद्वयप्रमाणसमोच्छ्रायः, पिताधिकः, पवित्रः, विरलकेशयुक्तः सूर्यः वर्तते। अस्य रक्तश्यामवर्णः[25], देवता अग्निः[26], गुणः सत्वं वर्तते[27]। सूर्यः क्षत्रियवर्णानामधिपतिः[28], पुरुषग्रहः[29], शरीरे अस्थ्याद्यंगानां प्रतिनिधित्वं करोति[30]। सूर्यस्य स्थानं देवस्थानं[31], स्वराशिः/ मूलत्रिकोणराशिः सिंहः[32], उच्चराशिः मेषः[33], नीचराशिः तुला वर्तते[34]। ग्रहेषु गुरुभौमचन्द्राः सूर्यस्य सुहृदः शनिशुक्रौ शत्रू, बुधः समः जायते[35]।एवमेव होरास्कन्धे सूर्यस्यायमाधारभूतबोधः, यः सर्वेषां कृते आवश्यको वर्तते। तदन्तरं शुभाशुभफलं वक्तुं शक्यते। जातकशास्त्रानुसारेण मानवजीवने सूर्यप्रभावः त्रिविधरूपेण

---

23. बृहत्संहिता -3/ 40
24. बृहत्पाराशरहोराशास्त्रम् 3/24
25. बृहज्जातकम्- 2/4
26. बृहज्जातकम्- 2/5
27. बृहज्जातकम्- 2/7
28. बृहज्जातकम्- 2/6
29. बृहज्जातकम्- 2/11
30. बृहज्जातकम्- 2/12
31. बृहज्जातकम्- 1/14
32. बृहज्जातकम्- 1/13
33. तत्रैव
34. तत्रैव
35. बृहज्जातकम्- 2/15-16

भवति। 1. शारीरिकरूपेण 2. आत्मिकरूपेण 3.अनात्मिकरूपेण शारीरिकरूपेण चक्षुर्दन्तकर्णाद्यंगानां प्रतिनिधिरस्ति[36]। आत्मिकरूपेण प्रभुत्वं, ऐश्वर्यं, स्नेहः, औदार्यं, महत्वाकांक्षा, आत्मबलनियन्त्रणं, विचारभावोद्रेकं, सहृदयता इत्यादीनां प्रतिनिधिरस्ति[37]। अनात्मिकरूपेण प्रशासकनृपमन्त्रिसेनानायकाः, आविष्कारकाः, पुरातत्त्वविज्ञानां प्रतिनिधिरस्ति[38]। ज्योतिषशास्त्रानुसारं सप्तमीतिथेरधिपः सूर्यः वर्तते[39]। अतः सप्तम्यां तिथौ सूर्यपूजनेन नीरोगता यशः प्राप्तिश्च भवति। आरोग्यं भास्करादिच्छेत्। अत एव ज्योतिषशास्त्रं वेदस्य चक्षुः वर्तते[40]। अनेन शास्त्रेण भूतवर्तमानभविष्यादृष्टाविच्छिनानां सर्वेषां वस्तूनां प्रत्यक्षज्ञानं भवति। सूर्य एवास्य शास्त्रस्यात्मा तथा च ब्रह्माण्डस्य नियामकः संचालको वा वर्तते। इह लोके यावन्तः प्राणिनः चक्षुभ्यामवलोकयन्ति तावतां सर्वप्राणिनां यच्चाक्षुषतेजस्तत्सर्वं सूर्यस्यैव।

देवतिर्यग् मनुष्याणां सरीसृपसवीरूधाम्।
सर्वजीवनिकायानां सूर्य आत्मा दृगीश्वरः।।

इत्थं सूर्यः जगतः प्रत्यक्षदेवत्वेन ख्यातो विद्यते। वेदे बहुत्र सूर्यस्य चर्चा प्राप्यते। ज्योतिषशास्त्रे अयं ग्रहराजत्वेन राराजते एवेति दिक्।

शुभाषितम्

ब्रह्मा येन कुलालवन्नियमितो ब्रह्माण्डभाण्डोदरे
विष्णुर्येन दशावतारगहने क्षिप्तो महासंकटे।
रुद्रो येन कपालपाणिपुटके भिक्षाटनं कारितः
सूर्यो भ्राम्यति नित्यमेव गगने तस्मै नमः क म ।। ण`

नैवाकृतिः फलति नैव कुलं न शीलं
विद्याऽपि नैव न च यत्नकृतापि सेवा।।
भाग्यानि पूर्वतपसा खलु सञ्चितानि
काले फलन्ति पुरुषस्य यथैव वृक्षाः ॥

भतृहरिनीतिशतकम्-श्लो.सं.- 96-97

36. उत्तरकालामृते-
37. भारतीयज्योतिष डॉ. नेमिचन्द्रशास्त्री
38. भारतीयज्योतिष डॉ. नेमिचन्द्रशास्त्री
39. मुहूर्तचिन्तामणिः 1/3
40. सि.शि. मध्यमा.कालमानाधिकारे श्लो. सं. 11

मुहूर्तशास्त्रे गोधूलिलग्नविचारः

डॉ.वेदप्रकाशपाण्डेयः
ज्योतिषाचार्यः
राजकीयसंस्कृतमहाविद्यालयः
क्यार्टू - शिमला (हि.प्र.)

सम्पूर्णे भुविमण्डले वेदोऽस्ति ज्ञानस्य मूलस्रोतः। ऐहिकमामुष्मिकञ्च सर्वविधज्ञानमत्र सन्निहितम्। अत एव उक्तमपि महाभारते- **यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्**।[1] अर्थात् यद्वेदे नास्ति, तदन्यत्रापि न प्राप्यते। तथा यत्किमपि समस्ते भुविमण्डलेऽवलोक्यते तत्सर्वं वेदेऽपि न दृश्यते। अपि च वेदाः अस्माकं भारतीयसंस्कृतेः धर्मस्य च मूलम्। यथोक्तम्- **वेदोऽखिलो धर्ममूलम्[2]।** अस्यानन्तज्ञानविधायकवेदस्यार्थोऽतीव दुरुहः आसीत्। अतः तस्यार्थज्ञानाय प्रयोगाय च केषाञ्चन शास्त्राणाम् आवश्यकता महर्षिभिरनुभूता। आवश्यकतानुगुणञ्च शब्दार्थप्रयोगविधायकशास्त्राणि वेदाङ्ग-संज्ञकानि रचितानि। वेदस्य षड्ङ्गभूतानि[3] शिक्षा-कल्प-निरुक्त-ज्यौतिष-छन्द-व्याकरणादि शास्त्राणि संदृश्यन्ते। यथोक्तमपि पाणिनीयशिक्षायाम्[4] -

शिक्षाकल्पोऽथ व्याकरणं निरुक्तं छन्दसां च यः ।
ज्यौतिषामयनं चैव वेदाङ्गानि षडेव तु ।।

आचार्यपतञ्जलिना पञ्चाशीत्याह्निकेषु विभक्ते महाभाष्यस्य प्रथमपादस्य प्रथमाह्निके पस्पशाह्निके **अथ शब्दानुशासनमित्यस्य** प्रयोजनप्रसङ्गे **रक्षोहागमलघ्वसन्देहाः प्रयोजनम्** अर्थात् वेदानां (रक्ष-ऊह-आगम-लघु-असन्देह) इति प्रयोजनसिद्ध्यर्थं धर्मः नाम धर्मशास्त्रम्, षड्ङ्गो वेदो नाम शिक्षादीनि षडङ्गानि तथा ऋग्यजुःसामाथर्ववेदाऽध्येयाः ज्ञेयाश्चेति उक्तम्। तद्यथा- **ब्राह्मणेन निष्कारणो धर्मः षड्ङ्गो वेदोऽध्येयो ज्ञेयश्चेति**।[5] षट्स्वेतेषु वेदाङ्गेषु शिक्षाकल्पनिरुक्तादिषु ज्यौतिषं काल-विधानशास्त्रत्वेनाङ्गीक्रियते। यथाह नारदः[6]-

वेदस्य निर्मलं चक्षुः ज्यौतिःशास्त्रमकल्मषम् ।
विनैतदखिलं कर्म श्रौतस्मार्तं न सिद्ध्यति ।।

इदं हि शास्त्रं वेदपुरुषस्य निर्मलचक्षुषाङ्गेनाख्यातमाचार्यैः। चक्षुषाङ्गेन हीनो न किञ्चित्करः

1. महाभारते आदिपर्व 63/93
2. मनुस्मृतिः 2/6
3. सिद्धान्तशिरोमणिः गणिताध्यायः श्लो.सं. 10
4. पाणिनीय शिक्षा- श्लो.सं. 41-42
5. पाताञ्जलमहाभाष्यम् - अगमपदार्थनिरूपणप्रसङ्गे 3/1/3/
6. नारदसंहिता 1/4

इति आचार्यभास्करेण प्रतिपादितसिद्धान्तानुसारं यथा चक्षुषा विहीनः जनः न किञ्चित्करः तद्वदेव ज्योतिषशास्त्रमन्तरा कालरहस्यं नावगन्तुं कोऽपि क्षमः। वस्तुतः कालानुगुणं शुभाशुभफलविवेचनं ज्योतिषशास्त्रस्य मुख्यं प्रयोजनम्।[7]

अतः भारतीयसंस्कृतेः परिपोषकैः दिव्यदृग्भिराचार्यैः ज्योतिषशास्त्रं किल कालविधायक-शास्त्ररूपेण अङ्गीक्रियते। अस्य कालविधायकस्य ज्योतिषशास्त्रस्य मुख्यविषयः शुभाशुभकालस्य प्रतिपादनं वर्तते। यतोहि जगतः सर्वाणि जातकादिक्रियाकलापानां शुभाशुभफलानि कालाधिगतानि। अतः सर्वेष्वपि कार्येषु आदौ शुभाशुभकालविचारस्य निर्देशोऽस्माकं शास्त्रेषु प्राधान्येनोपलभ्यते।

अयं हि शुभाशुभकालः द्विविधः। तत्र सकलप्राणिनामुत्पादकः संहारकश्च कालः प्रथमः। द्वितीयश्च स्थूल-सूक्ष्मभेदेन (मूर्तामूर्तभेदेन) त्रुटिकालादारभ्य कल्पादिपर्यन्तं ज्योतिषशास्त्रीयग्रन्थेषु सविस्तरं व्याख्यातम्। त्रुट्यादिकालादारभ्य कल्पादिकालपर्यन्तमस्य कालस्य अनन्तानि अङ्गानि भवन्ति। शुभाशुभफलपरिचायकस्य कालस्याङ्गद्वयं यथोक्तं सूर्यसिद्धान्ते [8]-

लोकानामन्तकृत्कालः कालोऽन्यः कलनात्मकः ।
स द्विधा स्थूलसूक्ष्मत्वान्मूर्तामूर्तश्च उच्यते ।।

यद्यपि त्रुटिकालादारभ्य कल्पादिपर्यन्तमस्य कलनात्मककालस्य सन्त्यनन्ताः भेदास्तथापि तेष्वनन्तेषु कालाङ्गेषु पञ्चाङ्गानि मुख्यानि। यद्यपि पञ्चाङ्गम् इति कथनेन तिथिः, वासरः, करणं, योगः, नक्षत्रञ्चेति पञ्चाङ्गानां ग्रहणं जायते।[9] किन्तु कालतन्त्रज्योतिषशास्त्रे एतानि मुख्यानि पञ्चाङ्गानि विहाय अन्यानि कालस्य पञ्चाङ्गानि मुहूर्तस्य महत्त्वदृष्ट्वा कथितानि सन्ति। तद्यथा -

वर्षं मासो दिनं लग्नं मुहूर्तश्चेति पञ्चकम् ।
कालस्याङ्गानि मुख्यानि प्रबलान्युत्तरोत्तरम् ।।
पञ्चस्वेतेषु शुद्धेषु समयः शुद्ध उच्यते ।
मासो वर्षभवं दोषं हन्ति मासभवं दिनम् ।।
लग्नं दिनभवं हन्ति मुहूर्तः सर्वदूषणम् ।
तस्मात् शुद्धिर्मुहूर्तस्य सर्वकार्येषु शस्यते ।।

अर्थात् वर्षं, मासः, दिनं, लग्नं, मुहूर्तश्चेति कालस्य मुख्यानि पञ्चाङ्गानि सन्ति । एतानि कालस्य पञ्चाङ्गानि क्रमेण उत्तरोत्तरं प्रबलानि भवन्ति। अर्थात् वर्षाद्बलवत्तरः मासः, मासाद् बलवत्तरं दिनं, दिनाल्लग्नं तथा लग्नाद्बलवत्तरं मुहूर्तो भवति। एवमेतेष्वपि कालाङ्गेषु मुहूर्तः सर्वाधिको महत्त्वाधायकोऽस्ति। अतः सर्वाधिकमहत्त्वपूर्णस्य मुहूर्ताख्यस्य कालाङ्गस्य विशिष्टं विवरणं स्वबुद्ध्याऽत्र प्रस्तूयते -

हुर्छ + क्त धातोरादौ मुटागमे मुहूर्तशब्दस्योत्पत्तिर्जायते। मुहूर्तः कालविशेषः, यस्य कालविधायके

7. शुभाशुभफलादेशः ज्योतिःशास्त्रप्रयोजनम्। स च लग्नबलाधीनः कथितः पूर्वसूरिभिः ।। नारदसंहिता- 1/3

8. सूर्यसिद्धन्तः मध्यमाधिकारः श्लो.सं. 10

9. तिथिं वारञ्च नक्षत्रं योगं करणमेव च । इति पञ्चाङ्गमाख्यातं वर्तपर्वनिदर्शकम्।। भारतीयकुण्डलीविज्ञानम् -

ज्योतिषशास्त्रे महत्त्वपूर्णं स्थानं वर्तते। यतोहि एतेषां कालस्य पञ्च अङ्गानां शुद्धे सति कालः शुद्धः उच्यते। अत्र कलनात्मको यः कालस्तस्यैवाङ्गः मुहूर्तः वर्तते। अतः सुकाले कृतमेव यत्किञ्चिदपि कर्म साफल्यम् अकाले बहुकृतमपि कर्म वैफल्यं परिणमति। कालात्मकस्यास्य मूहूर्तशास्त्रस्य प्रतिपदं प्रतिक्षणं प्रत्येकस्मिन् कार्ये प्रयोजनमावश्यकता च निश्चयेन भवति। अत एव गर्भाधानादारभ्य देहावसानपर्यन्तं जीवनस्य प्रत्येकस्य संस्कारस्य प्रत्येकस्य कर्मणश्च कृते मुहूर्ताः प्रदर्शिता आचार्यैः। अतः लाभालाभाय जयपराजयाय कर्तव्याकर्तव्याय च मुहूर्तस्य वैशिष्ट्यं सर्वत्र भवति।

अतः अस्माकं पूर्वाचार्यैः सकलशुभाशुभकार्येषु मुहूर्तविचारः करणीयः इति कथितम्। अस्माकं सनातनपरम्परायां षोडशसंस्कारेषु विवाहसंस्कारः सर्वाधिको महत्त्वपूर्णसंस्कारो वर्तते। विवाहसंस्काराय शुभलग्नस्य चयनमत्यावश्यकम्। यतोहि शुभलग्नेनैव भार्या शुभशीलयुक्ता भवति। यथोक्तं मुहूर्तचिन्तामणौ [10]-

भार्यात्रिवर्गकरणं शुभशीलयुक्ता शीलं शुभं भवति लग्नवशेन तस्याः ।

तस्माद्विवाहसमयः परिचिन्त्यते हि तन्निघ्नतामुपगताः सुतशीलधर्माः ।।

अत एव विवाहसंस्कारे शुभलग्नस्य चयनं भवितव्यम्। तत्र ज्योतिषशास्त्रे मेषवृषादिद्वादशलग्नानि प्रसिद्धानि। अत्र मुख्यरूपेण गोधूलिलग्नस्य विवरणमुपस्थाप्यते। तत्र किन्नाम गोधूलिलग्नमित्यस्मिन् विषये आचार्यैः कथितम् [11] -

अर्धास्तात्पूर्वमप्यूर्ध्वं घटिकार्धं तु गोरजः ।

स कालो मङ्गलः श्रेयान् विवाहादौ शुभप्रदः ।। इति मुहूर्तगणपतिः ।

मुहूर्तमार्त्तण्डेऽपि - **रवेरर्धास्तात्परपूर्वतोऽर्धघटिकम्** ---। [12]

परञ्च पीयूषधारायां तु सूर्यास्तानन्तरं घटिकाद्वयं गोधूलिकालः कथितः।[13] यथा -

यावद्दिनान्ते निशि पश्चिमायां पश्येत्तृतीयं रविबिम्बभागम् ।

तस्मात्परं नाडिकयुग्ममेके गोधूलिकालं मुनयो वदन्ति ।।

अत्रापि देशाचारव्यवस्थैव प्रमुखा वर्तते। कश्चित् स्थाने सूर्यास्तबिम्बात् प्राक्पश्चाच्च घटिकादलस्य ग्रहणं भवति। कश्चिच्च स्थाने सूर्यास्तादनन्तरं घटिकाद्वयोर्ग्रहणं भवति।

कुत्रचित्तु ऋतुभेदानुसारं अथवा वारभेदानुसारं मुहूर्तगणपतौ द्रष्टव्यम् [14] -

निदाधे सार्धबिम्बेऽर्के पिण्डीभूते हिमागमे ।

मेघकाले तु पूर्णेऽस्ते प्रोक्तं गोधूलिकं स्मृतम् ।।

तत्र वारानुसारं ज्योतिर्निबन्धकारस्य वचनम् -

10. मुहूर्तचिन्तामणिः विवाहप्रकरणम्- श्लो.सं. 1
11. मुहूर्तगणपतिः विवाहप्रकरणम्- श्लो.सं. 1
12. मुहूर्तमार्त्तण्डे गोधूलिलग्नविचारप्रसङ्गे व्याख्यायाम्
13. मुहूर्तचिन्तामणिः पीयूषधाराटीकायां 6/100 इत्यस्य व्याख्यायाम्।
14. मुहूर्तगणपतिः विवाहप्रकरणम्- श्लो.सं. 254

अनागतेऽर्केऽर्कदिने शनौ व त्रिभागनष्टे शशिशुक्रयोश्च ।
सूर्यार्द्धबिम्बे शुभदं च जीवे लग्नं कुजे ज्ञे च मुखं रजन्याः ।।

वासराः - ग्राह्यलग्नकालः ।
सूर्यशनी - सूर्यस्तात् पूर्वः ।
चन्द्रशुक्रौ - त्रिभागनष्टे सूर्यबिम्बे सति ।
गुरुः - सूर्यार्द्धबिम्बे दृष्टे सति ।
भौमबुधौ - सूर्यास्तादनन्तरो रात्र्यारम्भयावत्

आचार्यकेशवार्कस्तु कथयति यत् यदा गावः स्ववत्सान् द्रष्टुं सायंकाले वनेभ्यः गृहान् आगच्छन्ति, तदा तेषां धूलयोः गोधूलिकालः कथ्यते। निश्चयेन गोधूलिलग्नस्य अयमेव कालः उचितः। यथा नाम्ना बोधो भवति। मतानुसारं गोधूलिलग्नं हीनवर्णेभ्यः विशेषफलप्रदमस्ति। यथा ज्योतिर्निबन्धकारस्य वचनम् [15] -

घटीलग्नं यदा नास्ति तदा गोधूलिकं शुभम् ।
शूद्रादीनां बुधाः प्राहुर्न द्विजानां कदाचन् ।।

मुहूर्तमार्तण्डकारस्य कथनम् -

गोधूलिः पादजातके हितकरम् ।। [16]

नारदादिप्राचीनाचार्याणां मतानुसारेण गोधूलिलग्नं प्राच्यानां कलिङ्गानां कृते तथा गान्धर्वादि-विवाहेषु उचितं वर्तते। परञ्च अत्यावश्यकतायां तु सर्ववर्णेभ्यः गोधूलिकं शुभम्। यथोक्तमादौ एव तथा च [17] -

विप्रेषु घटिकालाभे दातव्यं गोरजो बुधैः।
संकीर्णे गोरजः शस्तं परेषु द्वितयं शुभम्।।

गोधूलिलग्नस्य प्रशंसा सर्वत्र दृश्यते। सर्वेषु कार्येषु प्रशस्तोऽयं कालः गोधूलिलग्ने नक्षत्रतिथिकरणवारनवांशलग्नजामित्रदीनां विचारोऽपि न क्रियते। यथा मुहूर्तचिन्तामणिकारः [18] -

नास्यामृक्षं न तिथिकरणं नैव लग्नस्य चिन्ता।
न वारो न च लवविधिर्ना मुहूर्तस्य चर्चा ।।
नो वा योगो न मृतिभवनं नैव जामित्रदोषो।
गोधूलि सा मुनिरुदिता सर्वकार्येषु शस्ता।।

यद्यपि गोधूलिलग्नस्य विषये कथितं यदत्र कोऽपि दोषो न भवति। तथापि अस्मिन् लग्ने

---

15. ज्योतिर्निबन्धे -
16. मुहूर्तमार्त्तण्डे विवाहप्रकरणे श्लो.सं. 38
17. मुहूर्तमार्त्तण्डे विवाहप्रकरणे
18. मुहूर्तचिन्तामणिः विवाहप्रकरणे श्लो.सं. 100

षष्टाष्टमचन्द्रस्य दोषस्तु केचन् आचार्याः कथ्यन्ति [19]-

कुलिकं क्रान्तिसाम्यं च मूर्ता षष्टाष्टमः शशी ।
पञ्चगोधूलिके त्याज्या अन्ये दोषाः शुभावहाः ।।

पीयूषधारायाम् -

षष्ठेऽष्टमे मूर्तिगते शशांके गोधूलिके मृत्युमुपैति कन्या ।[20]

एतैः प्रमाणवचनैः सिद्धयति यत् केचनाचार्याः गोधूलिलग्ने षष्टाष्टमचन्द्रं सर्वथैव त्यजन्ति। परञ्च मतमिदमुचितं न प्रतीयते। यतो हि विवाहलग्ने सप्तमस्थाने कोऽपि ग्रहः शुभो न भवति। यथा मुहूर्तसंग्रहदर्पणकारः कथयति [21] -

सप्तमस्थानगाः सर्वे ग्रहाः कुर्वन्ति शीघ्रतः ।
दम्पत्योर्मरणं यद्वा स्यादेकस्य न संशयः ।।

अपरञ्च सूर्यसम्बन्धे कथितम् -

मदनमूर्तिशयः शयसंग्रहे मृगदृशामशनिः ।

अर्थात् विवाहलग्ने प्रथमस्थाने अथवा सप्तमस्थाने स्थितः सूर्यवज्रवत् कष्टप्रदो भवति। परञ्च गोधूलिलग्ने तु सूर्यो लग्नात् सप्तमस्थाने एव भवति। यतोहि गोधूलिलग्नं सांयकाले सूर्यास्तसमये भवति। सप्तमसूर्यो लग्नात् षड्राश्यन्तरे स्थितो भवति तथा तत् सप्तमस्थानमेव। अतः यदा गोधूलिलग्ने सप्तमस्थानस्य सूर्यस्य त्यागो न भवति तदा षष्ठाष्टमचन्द्रस्य त्यागः कथम् ? गोधूलिलग्ने नवांशः यदि स्वस्वामिना दृष्टियुतो न भवेत् तदापि दोषो न भवति। शनिराहुसूर्यभौमादीनां क्रूरग्रहाणां योगेनापि लग्नमिदं न भङ्गं भवति। तदा केवलचन्द्रचारस्य भयं कथमस्तु। यथा विवाहवृन्दावनकारस्य कथनम् [22] -

नांशो न लग्नमिह दृष्टयुतं स्वभर्त्रा नार्कारसौरतमसामपि संगभङ्गः ।
किं चन्द्रचारभयमेकनिहास्तु किंचिन्नात्र प्रमाणवचनं किमपि श्रुतं न ।।

अतः यदा गोधूलिलग्ने अन्येषां दोषाणां विचारो नैव भवति। तदा षष्टाष्टमचन्द्रस्य विचारोऽपि नोचितः। तथा अस्मिन् चन्द्रचारविषये प्राचीनग्रन्थेष्वपि प्रमाणवचनं न प्राप्यते। इति दिक्।

19. मुहूर्तचिन्तामणिः विवाहप्रकरणे पीयूषधाराटीकायाम्
20. मुहूर्तचिन्तामणिः विवाहप्रकरणे पीयूषधाराटीकायाम्
21. मुहूर्तसंग्रहे -
22. विवाहवृन्दावनम्-

वेदोक्तवास्तुविज्ञानम्

- डॉ. चन्द्रश्रीपाण्डेयः
- संविदा अध्यापिका-ज्योतिषविभागः
राष्ट्रियसंस्कृतसंस्थानम् , लखनऊपरिसरः,
लखनऊ-10 (उ.प्र.)
Mob:- 9455738065
e-mail:- chandrashreepandey@gmail.com

वास्तुविद्या बहुप्रचीनास्ति। प्रकृत्या प्राप्तानि शीतोष्णवातादि दुःखानि असह्यानि भवन्त्येव। तेभ्यः परिमुक्तये रक्षणार्थं वा भारतीयैः प्रचीनमहर्षिभिः पुराकाले एव विचारो विहितः। प्रायः सर्वेऽपि प्राणिनः विपरीतवातावरणे जीवनरक्षार्थं प्रयतमानाः दृश्यन्ते। यथा पक्षिणः, नीडेषु कोटरेषु, वन्याः पशवः विटपकुञ्जेषु, गह्वरेषु, जलजन्तवः तटीयमृत्तिकासु अन्ये च जन्तवः भूमिगर्तेषु, विलेषु च आश्रयं भजन्ते। बहवस्तु खगाः कीटाश्च आश्चर्योत्पादकानि सुमनोरमानि आश्रयस्थानानि विरचयन्ति। मनुजास्तु श्रेष्ठतमाः सन्ति प्रणिषु। ते न केवलं स्वात्मरक्षार्थं अपितु अन्येषामपि जीवानां जनानाञ्च परिपालनार्थं दत्तावधाना अभवन्। अतस्तैस्तु पुराकालादिदानीं पर्यन्तमपि बहुविधानां सुखसाधनपरि-युक्तानां मनोहराणाम् आश्रयस्थानानां रचना क्रियते। परन्तु वयं भारतीया भौतिकस्य जगतः ऐहिकं सुखमवाप्तुमेव न कामयामहे। अस्माकं लक्ष्यं तु किमप्यदृष्टजन्यं पुण्योत्पादनमपि कर्तव्यं भवति। यथा-

कोटिघ्नं तृणजे पुण्यं मृण्मये दश सङ्गुणम्।
ऐष्टिके शतकोटिघ्नं शैलेऽनन्तफलं भवेत्।।
वापीकूपतडागेषु देवतायतनेषु च।
जीर्णान्युद्धरते यस्तु पुण्यमष्टगुणं भवेत्।।[1]

वस्तुतस्तु चतुर्षु आश्रमेषु गृहस्थाश्रमस्य परिकल्पना गृहकारणादेव समुद्भूता। यदि गृहमेव न स्यात् तदा आश्रमस्य परिपूर्तिरेव न भवति। अतो गृहस्थानां गृहकरणं परमावश्यकमेव। यदि कस्यापि अन्यस्य गृहे एव श्रौतस्मार्तादि क्रियाः सम्पाद्यते तदपि न वरम्-

परगेहे कृताः सर्वाः श्रौतस्मार्तक्रिया शुभा।
निष्फलाः स्युर्यतस्तासां भूमिशः फलमश्नुते।।[2]

नूनमेव गृहस्थानां परमोपादेयं तथा च पुरुषार्थरूपतपसः फलमपि गृहं परिकल्प्यते। गृहस्थेनैव वानप्रस्थाः, ब्रह्मचारिणो, यतयो द्विजाश्च परिपालयन्ते, यत्र प्रमुखं साधनं गृहमेव भवति।
गृहशब्दः वास्तुशब्दश्च समानार्थकौ न स्तः। ग्रह उपादाने, धातो- गृह्णातीति गृहमुच्यते। गृहहाश्च पुं भूम्नि कलत्रेऽपि [3] शब्दोऽयं पुलिङ्गे नपुंसके च प्रयुज्यते। गृह-गेह उद्वसित, वेष्म, सद्म, निकेतनम्, निशान्तम्,

1. वास्तुरत्नाकरे- १/१०
2. बृहद्वास्तुमाला-गृहारम्भविधि १६
3. मेदिनीकारोक्तवचनेन

वस्त्य, सदनं, भवनं, अगार, मन्दिर, निकाय, निलय, आलय-गृहमिति पर्यायाः गृहस्य सन्त्यमरकोषे[4] वस् धातोः निवासार्थे वसन्त्यत्रेति विग्रहे वास्तुशब्दः निष्द्यते। यथा- वेश्मभूर्वास्तुरस्त्रियाम्[5] अनेन वास्तुशब्दस्य गृहोपयुक्ता भूमि एवार्थः। वेश्मनो भूः वास्तु चेतिशब्दद्वयं पर्यायवाचकोऽस्ति।

विश्ववाङ्मये सर्वप्रचीनभूताः ज्ञानराशयो भारतीयसंस्कृतेश्च समुद्घाटकाः, सर्वशास्त्राणं अधिमूलोत्साः वेदे एव विराजन्ते। तेषु श्रेष्ठतमे ऋग्वेदे वास्तोष्पत्ते विवरणं सम्यक्तया स्थापितमस्ति। अत्र द्विपदानां चतुष्पदानाञ्च कल्याणाय सारोग्यवासाय च प्रर्थना कृतास्ति।

वास्तोष्पत्ते प्रित जानीह्यस्मान् स्वावेशे अनमीवो भवानः।

यत् त्वेमहे प्रित तन्नो जुषस्व शन्नो भवो द्विपदे शं चतुष्पदे।।[6]

एवमेवात्र अग्रे त्रयो मन्त्राः सन्ति- ऋग्वेदे[7], सामवेदे च[8] तथा तैत्तिरीयसंहितायां[9] मन्त्राः विषयेऽस्मिन् द्रष्टव्याः सन्ति। यत्र वास्तुविषये वास्तोष्पत्तेः समुल्लेखोऽस्ति। अस्यैव वास्तोष्पत्तेः ज्योतिषशास्त्रेषु वास्तु-पुरुषरूपेण निदर्शनं कृत्वा वास्तुचक्रं तस्य मुखाद्यङ्गानि विनिश्चित्य वास्तुपुरुषस्य पूजनं क्रियते।

गृहगृहमहना यात्यच्छा दिवे दिवे अधि नामा दधाना।[10]

गृहमेधाया विषयेऽपि।[11]

गृहमेधास आगत मरूतो माप भूतन। युष्माकोती सुदानवः[12] तथा च तैत्तिरीयसंहितायां[13], शतपथब्रह्मणे श्रौत्रसूत्रादिषु च वेदिकवाङ्मयेषु वास्तोः गृहस्य च समुल्लेखोऽस्ति। वास्तोष्पत्तये बलिं प्रदानाय मनुरब्रवीत-

ब्रह्म वास्तोष्पत्तिभ्यां तु वास्तुमध्ये बलिं हरेत्।[14]

अथर्ववेदेऽपि वास्तोष्पत्तेः प्रीत्यर्थं मन्त्राः सन्ति।[15]

अत्र गृहार्थे शालाशब्दस्य प्रयोगे दृश्यते । शालानिर्माणार्थं प्रयुक्तमन्त्रः रहैव ध्रुवांनि मिनोमिशालां क्षेमं तिष्ठति घृतमुक्षमाणा।

---

4. अमरकोषे
5. अमरकोष- काण्ड-२ पूरवर्ग १९
6. ऋग्वेदे - ७.५४.१
7. ऋग्वेदे- ८.१७.१४
8. सामवेदे- २७५
9. तैत्तिरीय संहितायां- ३.४.१०.१
10. ऋग्वेदे- १.१२३.४
11. ऋग्वेदे- ७.५१.१०
12. ऋग्वेदे- १०.११९.१३
13.तैत्तिरीय संहितायां- ४.३.१३.५
14. अर्थवेदेऽपि- ५.२६.२
15. अर्थवेदेऽपि- ३.१२.१

त्वां त्वा शाले सर्ववीराः सुवीरा अरिष्टवीरा उप सं चरेम्।[16]

नवशालायां घृतहोमार्थं द्वादशमन्त्राणां निर्धारणं कृतमस्ति अथर्ववेदे।[17]

अग्निपुराणे, विष्णुधर्मोत्तरे, मात्स्ये च वास्तुविषयस्य स्पष्टतयास्थानं प्रप्यते। तत्र मत्स्यपुराणे सुविस्तृतं सर्वाङ्गपूर्णं वर्णनं दृश्यते। अत्रैव ज्ञायते यद् वास्तुशास्त्रस्य प्रवर्तकाष्टादशऋषयोऽभवन्-

भृगुरत्रिर्वशिष्ठश्च विश्वकर्मा मयस्तथा।
नारदो नग्नजिच्चैव विशालाक्षः पुरन्दरः।।
ब्रह्मा कुमारो नन्दीशः शौनकौ गर्ग एव च।
वासुदेवोऽनिरुद्धश्च तथा शुक्रबृहस्पती।।
अष्टादशैते विख्याता वास्तुशास्त्रोपदेशकाः।
सङ्क्षेपेणोपदिष्टं यन्मनवे मत्स्यरूपिणा।।[18]

अष्टादशोपदेशकेषु विश्वकर्मा एव वास्तुशास्त्रस्य प्रधानोपदेशकत्वेन स्वीक्रियते। विश्वकर्मापि महादेवं शिवमेव आदि प्रणेतृरूपेण मन्यते। तत्र क्रमोऽपि किञ्चिद् भिन्नो दृश्यते। प्रथमतः शिवः, द्वितीयः पराशरः, चतुर्थो बृहद्रथस्तथा च पञ्चमो विश्वकर्मास्ति -

प्रवक्ष्यामि मुनिश्रेष्ठ श्रृणुष्वैकाग्रमानसः।
यदुक्तं शम्भुना पूर्वं वास्तुशास्त्रं पुरातनम्।।
पराशर प्रह बृहद्रथाय बृहद्रथः प्रह च विश्वकर्मणे।
स विश्वकर्मा जगतां हिताय प्रेवाच शास्त्रं बहुभेदयुक्तम्।
अथ स विमलाविद्यो विश्वकर्मा महात्मना सकलुणवरिष्ठः सर्वशास्त्रार्थवेत्ता।।[19]

सकल सुरगणानां सूत्रधारः कृतात्मा भवनिवसतां मच्छास्त्रमेतच्चकार एवं प्रकारेण विश्वकर्मणा एवैदं प्रणीतमेतत् वास्तुशास्त्रं परिपूर्णं मन्यते। इदानीं वास्तुशास्त्रान्तर्गतानां प्रमुखविषयाणां विचारो विधास्यते।

१. वास्तुपुरुषविचारः २. भूपरिग्रहणम् ३. दिक्शोधनम् ४. शल्योद्वारः ५. मेलापकः ६. पिण्डसाधनम् ७. ग्रहोपकरणानि ९. द्वारविचारः ९. गृहारम्भमुहूर्तम् १०. गृहप्रवेशः ११. जलाशयविचारः इति प्रमुखरूपेणैकादशविषयाः विचार्यन्ते।

वैदिकवास्तुशास्त्रे भवननिर्माणस्यास्ति सम्पूर्णो विचारः इति प्रस्तुत-निबन्धेन ज्ञातं यत् यत्र कुत्रापि गृहं न कर्तव्यमिति निर्देशः प्रप्यते। बहुधनव्ययेन निर्मिते गृहे सुखसौभाग्यं लभेत् इति लक्ष्यं विद्यते तथा च पर्यावरण-संरक्षणं, ग्रहस्य स्थापित्त्वं, चुम्बकीयक्षेत्राणां विचारः, वायुप्रवाहस्य च सम्यग्

16. अर्थवेदेऽपि- ५.२६.१.१२
17. पुराणेषु (मत्स्य)- २५२.२-४
18. विश्वकर्मप्रकाशे- १.४
19. तत्रैव

विचारोऽस्ति। अतः यत्र भूमिचयनं तत्र देवानां निवासश्चात्र विचार्यते। उत्तरदक्षिणक्रमेण अधिकं पूर्वपश्चिमक्रमेण च न्यूनं भवनप्रमाणं सूर्यस्य प्रकाशप्रप्त्यर्थमेव श्रेयस्करं स्वीकृतम्। प्लवविचारोऽपि तथैव द्वारस्य रक्षणार्थम् वृक्षाणां रोपणं तु नूनमेव पर्यावरणस्य सन्तुलनार्थं भवति। निषिद्धकाष्ठानां त्यागेन, विहितानाञ्च गृहणेन दीर्घायुष्यता भवति। नवीनगृहे जीर्णानि प्रचीनानि च वस्तूनि एतदर्थमेव त्याज्यानि भवन्ति। गृहारम्भे मासा अपि प्रकृतेः सानुकूलाः एव गृह्यन्ते एवं सर्वविधिना वास्तुविद्या विज्ञानसम्मता भारतीयसंस्कृतेश्चानुरूपाः इति नात्र सन्देहः।

शुभाषितम्

को लाभो गुणिसङ्गमः किमसुखं प्राज्ञेतरैः सङ्गतिः
का हानिः समयच्युतिनिपुणता का धर्मतत्त्वे रतिः
कः शूरो विजितेन्द्रियः प्रियतमा काऽनुव्रता कि धनं
विद्या किम् सुखमप्रवासगमनं राज्यं किमाज्ञाफलम् ॥

मालतीकुसुमस्येव द्वे गती स्तो मनस्विनः।
मूर्ध्नि वा सर्वलोकस्य शीर्यते वन एव वा ॥

अप्रियवचनदरिद्रैः प्रियवचनाढ्यैः स्वदारपरितुष्टैः।
परपरिवादनिवृत्तैः क्वचित्क्वचिन्मण्डिता वसुधा ।।

वह्निस्तस्य जलायते जलनिधिः कुल्यायते तत्क्षणा-
न्मेरुः स्वल्पशिलायते मृगपतिः सद्यः कुरङ्गायते ।
व्यालो माल्यगुणायते विषरसः पीयूषवर्षायते
यस्याऽङ्गेऽखिल लोकवल्लभतमं शीलं समुन्मीलति ।।

वाजसनेयीसंहिता में 12 मासों के नाम-			
मधु	चैत्र	इष	आश्विन
माधव	वैशाख	ऊर्ज	कार्तिक
शुक्र	ज्येष्ठ	सहस्	मार्गशीर्ष
शुचि	आषाढ़	सहस्य	पौष
नभस्	श्रावण	तपस्	माघ
नभस्य	भाद्रपद	तपस्य	फाल्गुन

(भास्करोदयः अङ्कः-17 / पृ.सं. 82)

पाटीगणिते भास्कराचार्यस्य अवदानम्-

हिमांशुझाः
राष्ट्रियसंस्कृतसंस्थानम्, लखनऊ-परिसरः
सिद्धान्तज्योतिषम्, शास्त्री(प्रथमवर्षम्)
e-mail:- himanshujhanuq@gmail.com
Mob:-7667215685

ज्यौतिषशास्त्रस्येतिहासे श्रीभास्कराचार्यः देदीप्यमानः नक्षत्रवत् मन्यते। आचार्यस्यास्य जन्म कर्णाटक-राज्यस्य सह्यपर्वतस्य समीपस्थ 'बीजापुर' ग्रामे वैष्णवसम्प्रदायस्य शाण्डिल्य-गोत्रोत्पन्नो द्विजः श्रीमहेश्वरस्य गृहे बभूव[1]। अयमाचार्यः स्वोत्पत्तिविषये स्वीये सिद्धान्तशिरोमणौ कथयति-

रसगुणपूर्णमही(१०३६) समशकनृपसमयेऽभवन्ममोत्पत्तिः।[2]

श्रीमद्भास्कराचार्यः अल्पावस्थायां स्वपित्रा ज्ञानम् अलभत। आचार्यः रसगुणवर्षेण(३६) सिद्धान्तशिरोमणिः अरचयत्[3]। अयं हि ज्यौतिष-जगतः प्रमुखः ग्रन्थोऽस्ति। सिद्धान्तशिरोमणिः पाटीगणित-बीजगणित-ग्रहगणित-गोलाध्यायेति चतुर्भागेषु विभक्तो विद्यते। अस्येव प्रत्येको भागः पृथग् ग्रन्थरूपः। अद्यत्वे यत्र-तत्र सर्वत्र उपलभ्यते। पाटीगणितभाग एव लीलावती संज्ञया ख्यातः। कथ्यते यदस्य एव लीलावत्याख्या दुहिताऽऽसीत्। तन्नाम्ना एव अनेन लीलावतीग्रन्थः रचितः। भास्कराचार्यस्य बीजगणितम् अवयक्तगणितमस्ति। गोलाध्याये मुख्यतः गोलादिविषयाणां विवर्णनं वर्तते। तथा गणितध्याये दिक्-देश-कालादि ज्ञानं प्रतिपादितमस्ति। आचार्यस्य एक अन्योऽपि करणग्रन्थोऽस्ति, तस्य नाम **'करणकुतूहलम्'** इति। सिद्धान्तशिरोमणिः हि १०७२ मिते शकाब्दे, करणकुतूहलन्तु ११०६ वर्षे निर्मितः। यतो हि तत्र ११०५ शकाब्दमुपक्रमवर्षत्वेन गृहीतः।

श्रीभास्कराचार्यः न केवलं ज्यौतिषशास्त्रे अपितु व्याकरण-साहित्य-दर्शनादि विषये अपि दक्ष आसीत्।[4] आचार्यस्य ग्रन्थैव अस्य प्रमाणमस्ति। सिद्धान्तशिरोमणौ ज्योतिषशास्त्रश्रवणाधिकारिणां लक्षणमुल्लिखितम्-[5]

यो वेद वेदवदनं सदनं हि सम्यग् ब्राह्मयाः स वेदमपि वेद किमन्यशास्त्रम्।
यस्मादतः प्रथममेतदधीत्य धीमान् शास्त्रान्तरस्य भवति श्रवणेऽधिकारी।।

---

1. सिद्धान्तशिरोमणिः गोलाध्यायः ज्योत्पत्तिः श्लो.सं. 61
2. सिद्धान्तशिरोमणिः गोलाध्याये प्रश्नाध्या. श्लो.सं. 58
3. तत्रैव
4. अष्टौ व्याकरणानि षट् च भिषजां व्याचष्ट ताः संहिताः, षट् तर्कान् गणितानि पञ्च चतुरो वेदानधीते स्म यः।
   रत्नानां त्रितयं द्वयञ्च बुबुधे मीमांसयोरन्तरे, सद् ब्रह्मैकगाधबोधमहिमा सोऽस्याः कविर्भास्करः।। गणकतरङ्गिणी
5. सिद्धान्तशिरोमणिः गोलाध्याये गोलस्वरूपप्रश्नाध्या. श्लो.सं. 8

तथा हि-[6]

द्विविधगणितमुक्तं व्यक्तमव्यक्तयुक्तं तदवगमननिष्ठः शब्दशास्त्रे पटिष्ठः ।
यदि भवति तदेदं ज्योतिषं भूरिभेदं प्रपठितुमधिकारी सोऽन्यथा नामधारी।।

ननु भास्कराचार्यस्य पूर्वं श्रीधराचार्येण पाटीगणितं **'त्रिशतिका'**भिधः ग्रन्थः प्रतिपादितः।[7] श्रीधराचार्य-भास्कराचार्ययोः गुणनादि रीतिः समानाऽस्ति। परन्तु भास्कराचार्यस्य **'लीलावती'** ग्रन्थः सरलः लघ्वाकारः अस्ति। अनेन कारणेन ग्रन्थोऽयं सुप्रसिद्धः सञ्जातः। लीलावती-ग्रन्थे आदौ प्राचीनकालस्य प्रचलिताः परिभाषाः सन्ति। तासु परिभाषासु तस्य कालस्य यवनप्रचारितमान-आलमगीरशाहमान-शेषकालादीनां मानानि प्रतिपादितानि वर्तन्ते।[8] ग्रन्थेऽस्मिन् परिभाषया अग्रे पाटीगणितस्य बहवः विषयाः विभिन्नेष्वध्यायेषु विवेचिताः सन्ति। तेषु अध्यायेषु अभिन्नकर्माष्टकगणितं प्रथमेऽध्याये वर्तते। तद्यथा-

अङ्कानां योग-अन्तर-गुणन-भजन-वर्ग-वर्गमूल-घन-घनमूलानि सन्ति। तत्रादौ पाटीगणिते प्रयोज्य- मानासंख्या प्रदत्ता विद्यते। अनेन गणितीयाङ्कलेखनक्रमेणैव समग्रगणितव्यवसायः प्रचलति। तद्यथा गणितीयाङ्कलेखनव्यवस्था [9]-

एकदशशतसहस्रायुतलक्षप्रयुतकोटयः क्रमशः ।
अर्बुदमब्जं खर्वनिखर्वमहापद्मशङ्कवस्तस्मात्।।
जलधिश्चान्त्यं मध्यं परार्धमिति दशगुणोत्तराः संज्ञाः ।
संख्यायाः स्थानानां व्यवहारार्थं कृताः पूर्वैः ।।

इदानीम् अभिन्नपरिकर्माष्टके प्रतिपादितं सङ्कलितव्यवकलितयोः करणसूत्रमपस्थाप्यते। तद्यथा-

"कार्यः क्रमादुत्क्रमतोऽथवाऽङ्कयोगो यथास्थानकमन्तरं वा।" [10]

अर्थात् समानजात्योरेव योगान्तरं भवतीति। क्रमात् अथवा उत्क्रमतः यथास्थानकं अङ्कयोगः कार्यः वा अन्तरं कार्यम्। अस्योदाहरणप्रसङ्गे स्वयमाचार्यः प्रश्नं करोति। तद्यथा -

अये बाले! लीलावति मतिमति ब्रूहि सहितान्
द्विपञ्चद्वात्रिंशत् त्रिनवतिशताष्टादश दश।
शतोपेतानेतानयुतवियुतांश्चापि वद मे
यदि व्यक्ते युक्तिव्यवकलनमार्गेऽसि कुशला।। [11]

---

6. सिद्धान्तशिरोमणिः गोलाध्याये गोलस्वरूपप्रश्नाध्या. श्लो.सं. 7
7. भारतीयज्योतिष, शिवनाथझारखण्डी-पृ.सं. 316, उत्तरप्रदेश हिन्दी संस्थान, लखनऊ प्रकाशन चतुर्थ संस्करण वर्ष 2010
8. **लीलावती** परिभाषा प्रकरणे ।
9. लीलावती अभिन्नपरिकर्माष्टक-प्रकरणे श्लो.सं. 2-3
10. लीलावती अभिन्नपरिकर्माष्टक-प्रकरणे श्लो.सं. 4
11. लीलावती अभिन्नपरिकर्माष्टक-प्रकरणे संकलितव्यवकलितयोरुदाहरणम् श्लो.सं. 1

अर्थात् २ + ५ + ३२ + १९३ + १८ + १० + १०० संयोजनात् किं भवति? एवञ्च ऊपर्युक्त-संकलनगणितस्य योगफलं = (३६० संख्या)अयुत १०,००० संख्यायां विशोधनेन किं भवति?

अस्य प्रश्नस्योत्तरप्रसङ्गे स्वयं भास्कराचार्यः सर्वादौ सङ्कलनगणितं प्रदर्शयति। इदानीं सङ्कलनगणितस्य लेखने वैशिष्ट्यं प्रदर्श्यते। तद्यथा-

सङ्कलनस्य क्रमगणितस्योदाहरणम्-

१ २

००२
००५
०३२
१९३
०१८
०१०
+१००

= ३६०

सङ्कलनस्य उत्क्रमगणितस्योदाहरणम्-

००२
००५
०३२
१९३
०१८
०१०
+१००

२४०
+१२

= ३६०

व्यवकलनस्य क्रमगणितस्योदाहरणम्-

अयुतवियुतांश्चापि वद मे।

१०,०००
-३६०

= ९,६४० संख्या समागता। अर्थात् ऊपर्युक्ताः संख्या अयुत १०,०० संख्या तः विशोध्यते तदा = ९६४० भवतीति।

इदानीं गुणनस्य कृते करणसूत्रमत्र प्रदर्श्यते। तद्यथा-

"गुण्यस्त्वधोऽधो गुणखण्डतुल्यस्तैः खण्डकैः संगुणितो युतो वा।" [12]

अस्योदाहरणम्- गुणकेन यः गुण्यते स गुण्यः, गुण्यं येन गुण्यते सैव गुणकः इति। अत्र गुण्यः- १३५, गुणकः- १२ तर्हि गुणकस्य खण्डद्वयं कृत्वा ८, ४ तदा गुण्यः १३५ × ८ = १०८० । तथाहि १३५ × ४ = ५४० अनयोः संयोजनात् १६२० गुणनफलं जातम्। अर्थात् १०८० तथा ५४० संख्या पूर्वप्रदर्शित-सङ्कलितगणितवत् संयोज्यते तदा १६२० संख्या जाता। अथवा १३५ × १२ = १६२० भवति।

इदानीं कर्माष्टके भागहारगणितं प्रदर्श्यते। तस्य कृते भागहारे करणसूत्रस्य वृत्तम्-[13]

12. लीलावती अभिन्नपरिकर्माष्टक-प्रकरणे गुणनकरणसूत्रम् श्लो.सं. 4

13. लीलावती अभिन्नपरिकर्माष्टक-प्रकरणे भागहारे करणसूत्रम् श्लो.सं. 7

भाज्यात् हरः शुध्यति यद्गुणः स्यादन्त्यात् फलं तत् खलु भागहारे।
समेन केनाप्यपवर्त्य हारभाज्यौ भजेद्वा सति सम्भवे तु।।

अत्रोपपत्तिः- भक्तुं योग्यो भाज्यो येन विभज्यते स भाजकस्तथा भजनेन यत्फलं सा लब्धिः। भाज्याद् यद् गुणो भाजकः शुध्यतिः सा गुणसङ्ख्या एव लब्धिर्भवतीति स्फुटम्। अस्योदाहरणम्-

भाज्यः -१६२०,भाजकः-१२। अत्र भाज्य-भाजकयोः ४ तः अपवर्तनं कृत्वा क्रमेण ४०५,०३ प्राप्नोति। तर्हि ४०५ ÷ ३ कृत्वा १३५ लब्धिर्जायते। अस्य मूल्याङ्कनस्य कृते सामान्यसूत्रमस्ति।

भाज्यः = भाजकः × भागफलम् + शेषफलम्।

अस्याग्रे वर्गे करणसूत्रं वर्तते[14]-

समद्विघातः कृतिरुच्यतेऽथ स्थाप्योऽन्त्यवर्गो द्विगुणान्त्यनिघ्नाः।
स्वस्वोपरिष्टाच्च तथाऽपरेऽङ्कास्त्यक्त्वाऽन्त्यमुत्सार्य पुनश्च राशिम्।।
खण्डद्वयस्याभिहतिर्द्विनिघ्नी तत्खण्डवर्गैक्ययुता कृतिर्वा।
इष्टोनयुग्राशिवधः कृतिः स्यादिष्टस्य वर्गेण समन्वितो वा।

श्लोकस्याभिप्रायः स्पष्ट एव वर्तते। चतुर्षु श्लोकेषु श्रीभास्कराचार्यः वर्गसाधनं अवदत्। अस्योदाहरणम्- $(२८)^{२}$ = २८ × २८ = ७८४ इति। पुनः वर्गमूले करणसूत्रं विद्यते[15]-

त्यक्त्वाऽन्त्याद्विषमात्कृतिं द्विगुणयेन्मूलं समे तद्धृते
त्यक्त्वा लब्धकृतिं तदाद्यविषमाल्लब्धं द्विनिघ्नं न्यसेत्।
पङ्क्त्यां पङ्क्तिहृते समेऽन्यविषमात् त्यक्त्वाऽऽप्तवर्गं फलं
पङ्क्त्या तद् द्विगुणं न्यसेदिति मुहुः पङ्क्तेर्दलं स्यात् पदम्।।

अस्योपपत्तिः- $(अ+ब)^{२} = अ^{२} + २अब + ब^{२}$, अस्य स्वरूपावलोकनेन ज्ञायते यत्प्रथमम् अन्त्याङ्कवर्गस्ततो द्विगुणितान्त्योपान्त्याङ्कयोर्घातस्तत उपान्त्यवर्गस्तेन अन्त्याद्विषमाङ्काद्यस्य वर्गः शुध्यति तं शोधयेत्। ततस्तेन द्विगुणितमूलेन समे भक्ते सत्युपान्तिमाङ्कः स्यात्। तस्यवर्गं तदाद्यविषमे शोधनेन मूलं स्यात्। शेषसत्वे तु पुनर्मूलं द्विगुणयेदित्यादि क्रिया कर्तव्यः समुचित एवेति सर्वमुपन्नम्।

उदाहरणम्- प्राच्यरीत्या वर्गमूलानयनम्-

५	२५
५	५
	१

यतो हि २५=५× ५ अनेन √२५ = ५ भवत्येव। किन्तु नवीनरीत्या वर्गमूलानयनस्योदाहरणम् अनेन प्रकारेण कर्तुं शक्यते। तद्यथा-

14. लीलावती अभिन्नपरिकर्माष्टक-प्रकरणे वर्गे करणसूत्रम् श्लो.सं. 9
15. लीलावती अभिन्नपरिकर्माष्टक-प्रकरणे वर्गमूले करणसूत्रम् श्लो.सं. 10

	२५
२	६२५
२	४
४५	२२५
५	२२५
५०	xxx

तर्हि $\sqrt{६२५}$=२५ इति।
कर्माष्टके सप्तममङ्गं घनः वर्तते। अतः घने करणसूत्रस्य वृत्तत्रयम् - [16]

समत्रिघातश्च घनः प्रदिष्टः स्थाप्यो घनोऽन्त्यस्य ततोऽन्त्यवर्गः।
आदित्रिनिघ्नस्तत आदिवर्गस्त्र्यन्त्याहतोऽथादिघनश्च सर्वे।।
स्थानान्तरत्वेन युता घनः स्यात् प्रकल्प्य तत्खण्डयुगं ततोऽन्त्यम्।
एवं मुहुर्वर्गघनप्रसिद्धावाद्याङ्कतो वा विधिरेष कार्यः ।।
खण्डाभ्यां वा हतो राशिस्त्रिघ्नः खण्डघनैक्ययुक्।
वर्गमूलघनः स्वघ्नो वर्गराशेर्घनो भवेदिति।।

अस्योदाहरणम्- $(३२)^३$ = ३२ × ३२ × ३२ = ३२७६८ अस्ति।
अभिन्नपरिकर्माष्टके अन्तिमे घनमूलस्य करणसूत्रं विद्यते-[17]

आद्यं घनस्थानमथाघने द्वे पुनस्तथाऽन्त्याद् घनतो विशोध्य।
घनं पृथक्स्थं पदमस्य कृत्या त्रिघ्न्या तदाद्यं विभजेत् फलं तु।।
पङ्क्त्यां न्यसेत् तत्कृतिमन्त्यनिघ्नीं त्रिघ्नीं त्यजेत् तत्प्रथमात् फलस्य।
घनं तदाद्याद् घनमूलमेवं पङ्क्तिर्भवेदेवमतः पुनश्च।।

अभाज्य-गुणनखण्डविधिना **अस्योदाहरणम्-**

७	३४३
७	४९
७	७
	१

अनेन हि ३४३ = ७ × ७ × ७ तदा $\sqrt[३]{३४३}$ = ७ भवतीति।

16. लीलावती अभिन्नपरिकर्माष्टक-प्रकरणे घने करणसूत्रम् श्लो.सं. 11-13
17. लीलावती अभिन्नपरिकर्माष्टक-प्रकरणे घनमूले करणसूत्रम् श्लो.सं. 14

एतस्य अग्रे द्वितीयाध्यायरूपेण **'भिन्नकर्माष्टको'** [18]वर्तते। अत्रापि गणितमष्टविधमेव वर्तते। भिन्नपरिकर्माष्टकस्य सहाय्येन विभिन्नः परिणामः आप्तुं शक्यते। अस्यानन्तरे तृतीयाध्याये **'इष्टकर्म'**[19] गणितमस्ति। आलापानुसारेण साधितं कर्म इष्टकर्म भवति। एतस्योदाहरणं वर्तते-[20]

कामिन्या हारवत्याः सुरतकलहतो मौक्तिकानां त्रुटित्वा
भूमौ जातस्त्रिभागः शयनतलगतः पञ्चमांशश्च दृष्टः ।
प्राप्तः षष्ठः सुकेश्या गणक! दशमकः संगृहीतः प्रियेण
दृष्टं षट्कं च सूत्रे कथय कतिपयैर्मौक्तिकैरेष हारः ।।

अनेन प्रश्नानुसारेण सङ्ख्या भवत्यत्र १/३, १/५, १/६, १/१० दृश्यम्= ६ अस्ति। तदा कल्प्यतां १ इष्टं तर्हि उपर्युक्तमानं शोधनेन १- (१/३+१/५+१/६+१/१०)= १- २४/३०

=१- ४/५

=१/५

अनेन इष्टगुणितं दृश्यं १×६=६ भवति। एतस्मिन् भजनं दत्वा मौक्तिकानां सङ्ख्या= ६ ÷ १/५ = ६× ५/१=३० भवतीति।

यत्र इष्टद्वयस्य प्रयोगो भवति, तन्नाम **'द्वीष्टकर्म'** [21]। अस्मिन् द्वीष्टकर्मगणिते आलापानुसारेण गुणन-भजन-योग-अन्तरादीनां विवेचनानि प्रतिपादितानि सन्ति।

एतदनन्तरमस्ति **'संक्रमणगणितम्'**। तत्र संक्रमणगणितस्य करणसूत्रस्य वृतार्द्धम् अत्रोपस्थाप्यते। तद्यथा-

"योगोऽन्तरेणोनयुतोऽर्धितस्तौ राशी स्मृतं संक्रमणाख्यमेतत्"। [22]

एतस्य अग्रे क्रमशः **'वर्गकर्म'** [23] - **'गुणकर्मगणितञ्च'** [24] वर्तेते। तत्र भास्कराचार्येण **'व्यस्तविधेः'** गणितमिदं प्रतिपादितम्। व्यस्तविधिना अज्ञात-राशेः ज्ञानं वर्गमूलादिसहाय्येन सम्भवति।

व्यस्तविधेरनन्तरं **'त्रैराशिकगणितम्'** [25] अस्ति। अस्मिन् गणिते त्रयाणां राशीनां ज्ञानेन चतुर्थस्य राशेः ज्ञानं भवति। एवम्भूतस्य गणितस्य नाम त्रैराशिकगणितम्। अनेन त्रैराशिकगणितेन सह व्यस्तविधे अपि सम्बन्धो वर्तते। तस्मिन् एव प्रसङ्गे **'पञ्चराश्यादिकस्य'** [26] गणितस्य विधिः

18. लीलावती भिन्नपरिकर्माष्टके भागजातौ करणसूत्रम्- श्लो.सं. 1
19. लीलावती अभिन्नपरिकर्माष्टके इष्टकर्मसु करणसूत्रम्- श्लो.सं. 1
20. लीलावती इष्टकर्म-प्रकरणोदाहरणम् श्लो.सं. 2
21. लीलावती द्वीष्टकर्मसु भास्करभिन्नं कस्यचित् पद्यं लीलावत्यां - श्लो.सं. 1
22. लीलावती संक्रमण-प्रकरणे करणसूत्रवृत्तार्द्धम्, श्लो.सं. 01
23. लीलावती वर्गकर्म- श्लो.सं. 2 - 3
24. लीलावती गुणकर्म- श्लो.सं. 5 - 6
25. लीलावती त्रैराशिक-प्रकरणे करणसूत्रे, श्लो.सं. 07
26. लीलावती पञ्चराशिक-प्रकरणे करणसूत्रे, श्लो.सं. 09

प्रदत्तोऽस्ति। एतस्य अभिप्रायो विद्यते यत् पञ्चानां राशीनां ज्ञानेन षष्ठस्य ज्ञानं कर्तव्यम्। एवं भूतं गणितं भवति पञ्चराशिकगणितम्। एवमेव सप्तराश्यादिगणितमपि बोध्यम्।

तदनन्तरं प्रकीर्णके **'ऐकिकनियम'** [27] सम्बन्धितं गणितं वर्तते। तत्र एकस्य वस्तुनः मूल्यं-तौल्यादिकञ्च ज्ञात्वा अनेक-वस्तुनः मूल्यादिज्ञानस्य विधिरस्ति। ऐकिकनियमस्य अनन्तरं **'मिश्रक-व्यवहारः'** अस्ति। मिश्रक अर्थात् मूलधन-मिश्रधन-ऋणादि व्यवहारिकं गणितम्। अस्योपयोगस्य कृते अनेकानि सूत्राणि वर्तन्ते।

मिश्रकस्य अग्रे **'श्रेढीव्यवहारः'** [28] अस्ति। श्रेढीव्यवहारस्य प्रयोगः राश्यादि ज्ञानार्थम् आलापानुसारेण भवति। एतस्य अध्यायस्य पश्चात् **'क्षेत्र-व्यवहारो'** [29] वर्तते। एतस्मिन् अध्याये भुज-कोटि-कर्णादीनाम् आनयनमस्ति। तदानीं **'खातव्यवहारः'** [30] अस्ति। अस्य खातव्यवहारस्य करणसूत्रम्-

गणयित्वा विस्तारं बहुषु स्थानेषु तद्युतिर्भाज्या।
स्थानकमित्या सममितिरेवं दैर्घ्ये च वेधे च।।[31]

खातव्यवहारेण वयं कस्यापि क्षेत्रस्य दैर्घ्य-उच्छ्रित-परिमापादि ज्ञानं कर्तुं शक्नुमः। तदनन्तरं ग्रन्थेऽस्मिन् **'चितिव्यवहार'**[32] अस्ति। अस्मिन् प्रकरणे इष्टिका माध्यमेन चितिः निर्माणं कथं सम्भवति, एतस्य गणितमस्ति। तथा हि **'क्रकचव्यवहारः'**[33] वर्तते। क्रकच इत्युक्ते ग्रंथिलवृक्षः। पुनः क्रकचतः **'राशि-व्यवहारो'** [34] वर्तते। अग्रिमपाठे भास्करचार्यः **'छाया-व्यवहारं'** [35] दत्तवान्। शङ्कु-पलभा-पलकर्णादि साधनेन छायाव्यवहारस्य प्रयोगो भवति। अस्य पाठस्य पश्चात् **'कुट्टक-व्यवहारः**[36]**'** आयाति। व्यवहारे कुट्टकशब्दस्य अर्थः खण्डनं वा कस्यापि चूर्णनं भवति। यस्मिन् गणिते भाज्य-हार-क्षेपवशात् लब्धिगुणौ आनीयते तदेव कुट्टकगणितम्। स्थिरकुट्टके त्रय अवयवाः भाज्य-हार-क्षेपकाः भवन्ति। लीलावतीग्रन्थस्य अन्तिमपाठे **'अङ्कपाशः'** [37] विद्यते। कमपि अङ्कं वा कमपि समूहम् अधिकतमं येन प्रकारेण वयं लेखितुं शक्नुमः सा एव प्रक्रिया अङ्कपाशसम्बन्धितगणितप्रक्रिया। लीलावतीग्रन्थे

---

27. लीलावती पञ्चराश्यादिकगणितप्रतिपादनानन्तरं परिशिष्टप्रकरणे
28. लीलावती श्रेढ़ीव्यवहार-प्रकरणे करणसूत्रे, श्लो.सं. 01
29. लीलावती क्षेत्रव्यवहार-प्रकरणे करणसूत्रे, श्लो.सं. 1 - 2
30. लीलावती खातव्यवहार-प्रकरणे करणसूत्रे, श्लो.सं. 01
31. लीलावती श्रेढ़ीव्यवहार-प्रकरणे करणसूत्रे, श्लो.सं. 01
32. लीलावती चिति-व्यवहार-प्रकरणे करणसूत्रे, श्लो.सं. 01
33. लीलावती क्रकच-व्यवहार-प्रकरणे करणसूत्रे, श्लो.सं. 02
34. लीलावती राशि-व्यवहार-प्रकरणे करणसूत्रे, श्लो.सं. 01
35. लीलावती छाया-व्यवहार-प्रकरणे करणसूत्रे, श्लो.सं. 01
36. लीलावती कुट्टक-व्यवहार-प्रकरणे करणसूत्रे, श्लो.सं. 1 - 5
37. लीलावती अङ्कपाश-प्रकरणे करणसूत्रे, श्लो.सं. 01

एतानि मुख्यगणितानि विवेचितानि सन्ति।

सर्वगणितापेक्षया लोकव्यवहारे पाटीगणितस्य उपयोगः सर्वतोऽधिकः दरीदृश्यते। लीलावतीग्रन्थं पठित्वा एव अङ्कगणितस्य समीचीनं ज्ञानं प्राप्तुं शक्यते। अस्मात् कारणात् श्रीमद् भास्कराचार्यः ज्यौतिषशास्त्रस्य वैशिष्ट्यं प्रतिपादयति। तद्यथा -

वेदचक्षुः किलेदं स्मृतं ज्यौतिषं मुख्यता चाङ्गमध्येऽस्य तेनोच्यते।
संयुतोऽपीतरैः कर्णनासादिभिश्चक्षुषाङ्गेन हीनो न किञ्चित्करः।। [38]
तस्माद् द्विजैरध्ययनीयमेतत् पुण्यं रहस्यं परमं च तत्त्वम्।
यो ज्यौतिषं वेत्ति नरः स सम्यग्धर्मार्थकामान् लभते यशश्च।। [39]

इत्थं पाटीगणिते दैवज्ञकुलकमलदिवाकरस्य भास्कराचार्यस्य महनीयं महत्त्वं विद्यते। विषयेऽस्मिन् हिन्दीभाषायाः कवेः मैथिलीशरणगुप्तमहाभागस्य काश्चन पङ्क्तयः स्मरणे आगच्छन्ति। यथा-

वृत्तान्त पहले व्योम का प्रकटित हमीं ने था किया,
वह क्रान्तिमण्डल था हमीं से अन्य देशों ने लिया।
थे आर्यभट्ट आचार्य भास्कर तुल्य ज्योतिर्विद यहाँ,
अब भी हमारे मान मन्दिर वर्णनीय नहीं कहाँ।
जिस अङ्कविद्या के विषय में वाद का मुह बन्द है,
वह भी यहीं के ज्ञान रवि की रश्मि का आनन्द है।
उन शुल्बसूत्रों के जगत में जन्मदाता हैं हमीं,
रेखागणित के आदि ज्ञाता या विधाता हैं हमीं।
हमको हमारी वेदियाँ पहले इसे दिखला चुकीं,
निज रम्य रचना हेतु के रेखागणित सिखला चुकीं ।[40]

38. सिद्धान्तशिरोमणिः गणिताध्याये कालमानाध्याये श्लो.सं. 11
39. सिद्धान्तशिरोमणिः गणिताध्याये कालमानाध्याये श्लो.सं. 12
40. भारतभारती अतीतखण्ड 2/3, मैथिलीशरणगुप्त

ज्यौतिषरत्न-गेनालालचातुर्धरिकस्य जीवनवृत्तम्



डॉ. वरुणकुमारझाः
अंशकालिक-सहायक-प्राचार्यः
स्नातकोत्तरज्यौतिषविभागः
विश्वविद्यालयपञ्चाङ्गगणितकर्ता सम्पादकश्च
कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालयः
चलवाणी - 9905459527
अन्तर्जालम् - varunkjha87@gmail.com

उदये ब्रह्मणो रूपं मध्याह्ने तु महेश्वरः।
अस्तमाने स्वयं विष्णुस्त्रिमूर्त्तिश्च दिवाकरः॥

प्राचीनकालिकाचार्याणामियमेका विशिष्टा परम्पराऽऽसीद्यत्ते स्वपरिचयादिकं प्रायो न लिखन्ति स्म। अतस्तज्जीवनवृत्तान्तसन्दर्भे तेषां कृतिभिरेवांशिकरूपेण समग्ररूपेण वा किञ्चिज्ज्ञातुं शक्यतेऽथवा परवर्त्तिनो विद्वांसः तेषां जीवनवृत्तान्तादिविषये पक्षे विपक्षे वा यत्किञ्चिल्लिखन्ति तान्येव स्वीकृत्य तद्विषये सामान्यं विशिष्टं वा ज्ञानं प्रजायते। एवमिह महर्षिकश्यपो ज्यौतिषशास्त्रस्याष्टादशसङ्ख्यक-आचार्याणां परिगणनं कृतवान्। तद्यथा -

सूर्यः पितामहो व्यासो वशिष्ठोऽत्रिः पराशरः।
कश्यपो नारदो गर्गो मरीचिर्मनुरङ्गिराः॥
लोमशः पौलिशश्चैव च्यवनो यवनो भृगुः।
शौनकोऽष्टादश ह्येते ज्योतिश्शास्त्रप्रवर्त्तकाः॥

(गणकतरङ्गिणी, पृ॰ १)

अत्रापि बहूनामाचार्याणां केवलं नामान्येवोपलभ्यन्ते, कृतयो न।

बिहारप्रदेशे विशेषतस्तीरभुक्तिक्षेत्रे यथा जनक-याज्ञवल्क्य-गौतम-कपिल-कणाद-मण्डन -गङ्गेशोपाध्याय- वाचस्पति- उदयन- अयाची- शङ्कर- विद्यापत्याद्यनेक-विश्वविख्यात-विदुषां वेद-वेदान्त-न्याय-व्याकरण-साहित्य-साङ्ख्य-मीमांसादिविविधविद्यासु विशिष्टावदानं दृश्यते तथैव ज्यौतिषक्षेत्रेऽपि समुत्कृष्टं योगदानं प्रवर्तते। अत्र ज्यौतिषशास्त्रस्यैका विशिष्टा परम्परा प्राचीनकालदेव समायाति। अस्यां परम्परायां श्रीपति-म॰म॰परमानन्दठक्कुर-म॰म॰हेमाङ्गदठक्कुर-म॰म॰माधव-भानुनाथ- म॰म॰गोकुलनाथ-म॰म॰मधुसूदनओझा-जीवेश्वर-म॰म॰चण्डेश्वर-नीलाम्बरझा-जीवनाथझा-बुद्धिनाथझा- मुरलीधरठक्कुर- बलदेवमिश्र- म॰म॰मुरलीधरझा- अनूपमिश्र- कपिलेश्वरचौधरी-बालकृष्णमिश्र-गङ्गाधरमिश्र-कृष्णदत्तझा-बबुआजीमिश्र-अपूछझा-सीतारामझा-अच्युतानन्दझा-देवचन्द्रझा-ब्रजकिशोरझा प्रभृतयो विद्वांसः सुप्रसिद्धाः सन्ति। अस्यामेव विद्वन्मणिमालायां दैवज्ञरत्न - गेनालालचौधरीः अप्यन्यतमो मणिः।

यद्यपि दैवज्ञरत्न-गेनालालचातुर्धरिकस्य न कोऽपि ग्रन्थो विद्यते परन्तु तद्विषये तच्छिष्यलि-

खितमूलग्रन्थेषु टीकाग्रन्थेषु वा यत्किञ्चित् पठितं यच्च गुरुपरम्परया श्रुतं तत्सर्वमाश्रित्य तेषां पाण्डित्य-प्रकाशनाय तदिह तथ्यं प्रस्तूयते।

अस्य महानुभावस्य प्रादुर्भावो नवसप्तत्यधिकद्वादशशततमे (१२७९) सालसंज्ञकवर्षे द्विसप्तत्य-धिकाष्टादशशततमे (१८७२) ख्रीष्टाब्दे च कृष्णाष्टम्यां दरभङ्गामण्डलान्तर्गत-पञ्चोभग्रामे निधनञ्च त्रिपञ्चाशदधिकत्रयोदशशततमे (१३५३) सालसंज्ञकवर्षे षट्चत्वारिंशदधिकैकोनविंशतितमे (१९४६) ख्रीष्टाब्दे च राधाष्टम्यां दशाश्वमेधघट्टे वाराणस्यामभूत्। शाण्डिल्यगोत्र-पगुलवारराजेमौलिकः पं॰ हंसराजचौधरीपितुर्नामास्य विद्वद्वरस्य। अस्य पिता परमनैष्ठिकः आद्याया अनन्योपासकश्चासीत्।

अयं महानुभावो बाल्ये स्वजन्मस्थाने एव संस्कृत-मैथिली-हिन्दीभाषाणां ज्ञानं सम्प्राप्य पञ्चोभतो हावीभौआड़ (दरभङ्गा) नामकग्रामे मातृकुलमागत्य तन्निकटे एव "कन्थूडीह" नामकग्रामेऽष्टात्रिंशन्मासं यावद्गुरुवरेभ्यः श्रीमलङ्गमिश्रशर्मभ्यः षोडशवर्षावस्थायां लीलावती- बीजगणित-रेखागणित-शिशुबोध-नाह्निदत्तपञ्चविंशतिका-व्यवहाररत्न-मुहूर्त्तचिन्तामणि- गोलीयरेखागणित-चापीयत्रिकोणमिति-सूर्यसिद्धान्तप्रभृतिग्रन्थानधीतवान्। तदनन्तरं काशीं गत्वा म॰म॰सुधाकरद्विवेदिभ्यः परमगुरुभ्यः षड्वर्षं यावत् समग्रं ज्यौतिषं पठित्वा सर्वा अपि परीक्षाः प्रथमश्रेण्यामुत्तीर्णवान्। श्रूयते यदध्ययनकाले स्वप्रतिभाबलेन छात्रानपि गुरोराज्ञया पाठयति स्म श्रीचातुर्धरिकमहोदयः। प्राचीनकाले इयमेका विशिष्टा परम्पराऽऽसीत्। साम्प्रतं त्वेतदर्थं पृथक् प्रशिक्षणव्यवस्था निर्धारिता विद्यते।

अस्य महानुभावस्य विवाहः चतुर्विंशतिवर्षावस्थायां माऊबेहट(दरभङ्गा)निवासि - नरहापाँजि - दरिहरेराजनपुरामौलिकस्य काश्यपगोत्रस्य श्रीझूलनझामहाभागस्य कन्यया सह बभूव। विवाहानन्तरम-ध्यापनकार्यं प्रारभत महेश्वरसंस्कृतविद्यालये स्वग्रामे हावीभौआड़ एव। तत्पश्चादेकपञ्चाशद्वर्षावस्थायां त्रिंशदधिकत्रयोदशशततमे (१३३०) सालसंज्ञकवर्षे त्रयोविंशत्यधिकैकोनविंशतितमे (१९२३) ख्रीष्टाब्दे च काशीस्थ टीकमणिसंस्कृतमहाविद्यालये कृष्णदत्तझा(भषराजि,दरभङ्गा)महोदयस्य निधनप्रयुक्तरिक्तज्यौतिषशास्त्राध्यापकपदे श्रीझामहोदयस्य पूर्वकृतानुशंसया छात्राणामनुरोधेन च नियुक्तिरभवत्। तत्र तदानीं श्रीदेवकीनन्दनशास्त्रीमहाभागः प्रधानाचार्यः (प्रिंसिपल) आसीत्। अत्र यावज्जीवमध्यापयामास श्रीचातुर्धरिकमहोदयः। यथास्य महोदयस्य पूर्वं मिथिलायां ख्यातिरासीत् तथैव पश्चात् काश्यामपि सञ्जातेति।

श्रीचातुर्धरिकमहोदयानां परमगुरुणां निम्नलिखिताः छात्राः सुप्रसिद्धाः सन्ति -

१.	श्रीसदाशिवमिश्रः	(डढिया, समस्तीपुर)
२.	श्रीबुद्धिनाथझा	(रामभद्रपुर, दरभङ्गा)
३.	श्रीमहीधरझा	(हटनी, मधुबनी)
४.	श्रीपञ्चाननझा	(मुजौना, समस्तीपुर)
५.	श्रीगङ्गाधरमिश्रः	(चैनपुर, सहरसा)
६.	श्रीबलदेवमिश्रः	(वनगाँव, सहरसा)

७.	श्रीमुरलीधरठक्कुरः	(सुगमा, सहरसा)
८.	श्रीसुदिष्टपाठकः	(पुरी, उड़ीसा)
९.	श्रीबैद्यनाथरथः	(पुरी, उड़ीसा)
१०.	श्रीअर्जुनमिश्रः	(मैमनसिंहजिला, बङ्गाल)
११.	श्रीलक्ष्मीकान्तझाः	(हरिनगर, दरभङ्गा)
१२.	श्रीमार्कण्डेयझाः	(निकासी, दरभङ्गा)
१३.	श्रीसत्यदेवझाः	(निकासी, दरभङ्गा)
१४.	श्रीरामोत्सादनमिश्रः	(नेपाल)
१५.	श्रीविश्वेश्वरझाः	(डुमरा, मधुबनी)
१६.	श्रीदेवचन्द्रझाः	(नगवास, मधुबनी)
१७.	श्रीलक्ष्मीनारायणझाः	(डखराम, दरभङ्गा, लक्ष्मीपञ्चाङ्गनिर्माता)
१८.	श्रीविश्वेश्वरमिश्रः	(जयदेवपट्टी, दरभङ्गा)
१९.	श्रीअच्युतानन्दझाः	(जरिसो, दरभङ्गा)
२०.	श्रीरमानन्दचौधरी	(पुत्रः शिष्यश्च)
२१.	श्रीरामोत्साहमिश्रः	(केवर, बलिया, उत्तरप्रदेश)

एकदा दरभङ्गामण्डलान्तर्गत-सझुआरग्रामे मैथिलवैवाहिकसभायां श्रीचातुर्धरिकमहोदयस्य दरभङ्गा-मण्डलान्तर्गत-घनश्यामपुरग्रामवासि-सुप्रसिद्ध-दैवज्ञ-श्रीएकनाथरायमहोदयेन सह परिचयः सञ्जातः। तदनु श्रीरायमहाभागः स्वकीयेन सह समागतान् छात्रान्

१.	श्रीदामोदरमिश्र	(गजहरा, मधुबनी)
२.	श्रीशशिधरझा	(बथनाहा, अररिया)
३.	श्रीदुर्गादत्तझा	(सुगौना, मधुबनी)
४.	श्रीदयानन्द(प्रसिद्ध दयानाथ)झा	(बेला, मधेपुरा)

श्रीमद्गेनालालचातुर्धरिकं प्रति उच्चशिक्षाप्राप्तये समर्पितवान्।

श्रीचातुर्धरिकमहोदयानां त्रयः पुत्राः कन्या द्वयञ्चाऽसन्। तेषु ज्येष्ठः श्रीरमानन्दचौधरी पितृवदेव ज्यौतिषशास्त्रपारङ्गतो मत्पितू रामचन्द्रशर्मणो गुरुरासीत्।

गेनालालचातुर्धरिकमहोदयानां विषये तच्छिष्यलिखितग्रन्थेषु ये उद्गाराः, ये चाभिनवसिद्धान्तास्तेषां समुपलभ्यन्ते ते साम्प्रतं यथाक्रमेण यथामति प्रस्तूयन्ते। तत्रादौ "वास्तवचन्द्रश्रृङ्गोन्नतिसाधन" ग्रन्थस्य व्याख्याकारः श्रीगङ्गाधरमिश्रो गुरुवर्यं श्रीगेनालालचातुर्धरिकं प्रति स्वोद्गारं प्रकटयति -

गेयो ज्ञानाब्धिमद्भिः सततमतियशोराशिभिः सौम्यमूर्त्तिः।
नानान्तेवासिचेतोगगनगततमो नाशकः स्वोपदेशैः॥
लाभालाभे त्वभेदः शिवपदकमलानन्यभक्तो बुधेन्द्रः।

(भास्करोदयः अङ्कः-17 / पृ.सं. 93)

लक्ष्मज्ञः सर्वजन्तोर्जगति जयति मे श्रीगुरुर्ज्ञानमूर्त्तिः॥

(वास्तवचन्द्रश्रृङ्गोन्नतिसाधने, मङ्गलश्लोके, २)

पुनस्तत्रैव -

"हावीभौआड़" नाम्नि प्रचुरधनलसत्कीर्त्तिभाजां समाजे।
ग्रामे "पञ्चोभ" वासी जननिकुलजनस्याश्रयेणोष्य तत्र॥
यस्तूर्णं पूर्णविद्योद्यदुदधिमथने मन्दरीभूय भूयो -
नूत्नान् सद्युक्तिरत्नानवनिसुरवरेभ्यो ददौ बुद्धिसिद्धान्॥
यः सम्प्रत्यस्ति भूमावमरमुनिरिव क्रोधलोभादिहीनः।
कः शत्रुः कोऽस्त्यशत्रुस्त्विति मतिरहितो ध्याननिष्ठः पटिष्ठः॥
गार्हस्थ्ये तत्सुताढ्येऽपि हि सकलभवं सारशून्यं प्रपश्यन्।
"गेनालालः" सचातुर्धरिक इति गुरुः संज्ञयाऽस्ति प्रसिद्धः॥
शान्तो यः प्रकृतौ कृतौ पटुतमः कान्तः कृती चाकृतौ।
प्रान्तः सन्मतिसागरस्य सततं श्रान्तो न विद्याऽर्पणे॥
भक्तः श्रीगिरिजापतेरतितरां रक्तः स गोलागमे।
शक्तोऽखर्वजनस्य गर्वदलने श्रीमान् गुरू राजते॥
योऽनेकस्थलजीविकां धनकरीं त्यक्त्वाऽतिसन्तोषतः।
स्वग्रामे मुनिवृत्तिरर्थविमुखश्छात्रान् सदाऽध्यापयन्॥
श्रौताचारविचारपूतहृदयः सूक्तप्रमोदोदयः।
दुर्बोधप्रलयो विवेकनिलयः शश्वत्समुद्यद्दयः॥

(वास्तवचन्द्रश्रृङ्गोन्नतिसाधने, उपसंहारे, श्लो॰ १-४)

अनयोः स्थलयोः श्रीमिश्रो गुरोः व्यक्तित्वं सश्रद्धं निरूपयति।

अत्रैव ग्रन्थसमाप्तौ संशोधकः श्रीबलदेवमिश्रः शृङ्गोन्नतिपरिलेखोपकरणभूताद्यान्ययोः समत्व-विषये श्रीगुरुवराणां युक्तिमेवं निरूपयति -

क्षेत्रेण वासना बोध्या समत्वे प्रथमान्ययोः।
श्रीमद्भिर्गुरुवर्यैर्या गेनालालैः प्रभाषिता॥

पुनस्तत्रैव, चन्द्रस्य द्वे शृङ्गे भवत इति सर्वे जानन्त्येव, परन्तु गोलयुक्त्या शृङ्गचतुष्टयोत्पत्तिरपि भवितुमर्हतीति गुरुचरणानामतिचमत्कृतां युक्तिमेवं निरूपयति -

शुक्लाख्यदृश्यवृत्ताभ्यां वास्तवाभ्यां तु तन्नहि।
अवास्तवाभ्यां ताभ्यां वै भवतीह सुगोलवित्॥

अर्थाद्दृष्टिस्थानादवास्तवदृश्यवृत्तचन्द्रबिम्बसम्पातगतानि सूत्राणि चन्द्रबिम्बेऽधः प्रदेशे यत्र-यत्र लग्नानि तद्बिन्दुगतं यल्लघुवृत्तं तस्यावास्तवशुक्लवृत्तस्य यौ सम्पातौ तथा अवास्तवदृश्यवृत्तावास्तव

शुक्लवृत्तयोर्यौ सम्पातौ एवं सम्पातचतुष्टयगतं शृङ्गचतुष्टयं अवास्तवशुक्लवृत्तावास्तवदृश्यवृत्ताभ्यामेव सञ्जातमिति। एवमेव भाभ्रमबोधनामकग्रन्थे श्रीदयानन्दझामहोदयो लिखति -

गेनालालो गुरुर्यस्य गेनालालः सुधीः पिता।
माता श्रीसंयतिर्देवी दयानन्दो जयत्यसौ॥

(भाभ्रमबोधे, भूमिकायाम्)

अत्र लेखको गुरोरुत्कर्षं प्रदर्शयति।

दरभङ्गामण्डलान्तर्गत-रामभद्रपुरग्रामनिवासि-पडुएवंशोद्भव-झोपाख्यज्योतिर्विच्छ्रीपञ्चरथशर्मात्मज-श्रीबुद्धिनाथझामैथिलो लिखति -

तस्मात्तातप्राप्तबोधः कनिष्ठोऽध्यैष्टग्रन्थान्भूयसः स्वीयदेशे।
ज्यौतिर्विद्यालब्ध भूरिप्रतिष्ठाच्छ्रीमद्गेनालालतः शास्त्रनिष्ठात्॥

(टिप्पणीविवरणे, उपसंहारश्लोके, ६)

इत्यनेन सुप्रतिष्ठितस्य श्रीगेनालालचातुर्धरिकस्य शिष्यपरम्परायां बुद्धिनाथझामहाभागोऽपीति।

प्रतिभाबोधकटीकायां श्रीगङ्गाधरमिश्रो निरूपयति -

"गेनालाल" इतिस्वनामविदितः पूर्णात्मसर्वाशय-
श्छात्राज्ञानतमोहरोगुरुवरोऽस्ति ज्यौतिषे कल्पकः।
यन्नामश्रवणादवाप्तगुरुतावेशो न को दैववित्
यद्विद्यागुरुतां विभाव्य सहसा के न स्तुवन्तीह तम्॥
लोकाडम्बरवस्तुवस्त्रविरमः प्राप्तेऽपि योग्ये धने
त्यागी धार्मिकधीरधीर्विजयते श्रीमान् मदीयो गुरुः॥

(प्रतिभाबोधके, उपसंहारे, श्लो० ६-७)

मैथिलपण्डित - श्रीमुरलीधरठक्कुरः सिद्धान्तशिरोमणेः प्रभानामकवासनाभाष्ये श्रीमद्गुरुचरणानां प्रभावं वैदुष्यञ्चैवं वर्णयति –

गाम्भीर्यं क्व च भास्करीयरचनासारार्थवारान्निधेः,
क्वेयं तत्त्वविमर्शभावविकला क्षोदीयसी मे मतिः।
यत् किञ्चित्कविभास्करस्य सुगिरां तत्त्वं मयाऽवेदि तत्,
गेनालालगुरोः पदप्रणमनप्रीतेर्लवानां फलम्॥

(प्रभावासनायाम्, पृ० २)

वराहमिहिरविरचितायाः बृहत्संहितायाः "विमला" हिन्दीटीकाकारः श्रीमदच्युतानन्दझामहाभागोऽपि गुरुवैभवं वर्णयति -

कृत्याकृत्यविचारणासु कुशलं को वा न वेत्ति क्षितौ
प्रश्नानाकर्ण्य तूर्णं सदसि सरति वाग् यन्मुखादुत्तरार्थम्।

छात्राध्यापनकर्मणैव महती संस्थापिता भारते
कीर्तिर्येन बुधाग्रगं गुरुवरं गेनादिलालं भजे॥

(बृहत्संहितायाम् , टीकाकारकृन्मङ्गलाचरणे)

भावकुतूहलग्रन्थस्य टीकाकारः श्रीरामोत्साहमिश्रो गुरुवन्दनमेवं करोति -

सिद्धान्ते गणितप्रकाशनविधौ यस्सूर्यरूपः क्षितौ।
नानाशास्त्रविचारचारुसुमतिर्मत्पूज्यपादौ गुरुः॥
गेनालाल बुधः सदा विजयते सन्मैथिलः कर्मठः।
यत्पादाम्बुजरेणुसत्कणिकया ज्ञानस्य लब्धिः परा॥

(भावकुतूहले, उत्साहवर्द्धिनीभाषाटीकायाः भूमिकायाम्)

भास्करीयबीजगणितस्य "विमला" हिन्दीटीकाकारः श्रीमदच्युतानन्दझामहाभागो गुरुचरण-वन्दनमेवं करोति -

यस्य प्रसादलवमेत्य समुद्रकल्पे शास्त्रे दधामि रसनाप्लवनप्रलौल्यम्।
मोहान्धकारमिहिरं गुरुपादपद्मजन्माणुरेणुमनिशं सकलार्थमीडे॥
ग्रामे निवासी "जरिसो" समाख्ये झोपा "च्युतानन्द" कृतीह मैथिलः।
प्रत्यग्रयुक्तिं सुरभाषया बी-जे भाषयोदाहरणं प्रवच्म्यहम्॥
युगलं विमलं सविशेषमलं यदहं वितनोमि सुटीकनकम्।
सकलाः सकलाः सरलाः शमलाः विबुधा "विमला"भिधकं मनुताम्॥

(टीकाकारकृन्मङ्गलाचरणे, २ - ४ श्लोके)

श्रीदेवचन्द्रझा स्वकीये "व्यावहारिकं ज्यौतिषसर्वस्वम्" इति नामके ग्रन्थे गुरुवन्दनमित्थं करोति -

विश्वेश्वरं गुरुवरं गेनालालाभिधं परम्।
प्रणम्य विशदं वच्मि ज्यौतिषं व्यावहारिकम्॥

(मङ्गलश्लोके- १)

अत्रैव ग्रन्थान्तभागे पुनरपि गुरुवैभवं वर्णयति झामहाशयः -

गेनालालाभिधसुरगुरुर्यन्मुखाब्जात्तु काश्या-
माद्योपान्तं निखिलगणितज्यौतिषग्रन्थजातम्॥

(ग्रन्थकारपरिचये, पञ्चमश्लोकस्य पूर्वार्द्धे)

ज्यौतिषशास्त्रस्य कठिनतमो ग्रन्थः सिद्धान्ततत्त्वविवेकनामधेयः कमलाकरविरचितः। अस्य ग्रन्थस्येदानीं यावदेकैवोत्पत्तिः वासनाभाष्यनामधेया विद्यते। सा चेयमुत्पत्तिः श्रीगङ्गाधरमिश्रमहोदयस्य खगोलमर्मज्ञश्रीगेनालालचातुर्धरिकशिष्यस्य। यथोक्तं मङ्गलाचरणे -

श्रीश्यामां शरणागतार्त्तिशमनीं ध्यात्वा हृदि श्रीलसद्
गेनालालगुरोः पदाम्बुजयुगं भूयः प्रणम्यादरात्।
सूक्त्या तत्त्वविवेकभाष्यममलं प्रारभ्यते मैथिल
श्रीगङ्गाधरशर्मणाऽऽशुमतिदं मिश्रोपनाम्ना स्फुटम्॥

(सिद्धान्ततत्त्वविवेके, प्रथमभागे, टीकाकारकृतप्रथममङ्गलश्लोके)

तथा च त्रिप्रश्नाधिकारान्ते -

"हावीभौआड़" संज्ञस्वपुरनिवसतां विज्ञशिष्यान्वितानाम्।
श्रीगेनालालनाम्नां चरणकमलयोरन्तिकं प्राप्य तेभ्यः।
सर्वान् ग्रन्थानधीत्याधिगतमतिरथोत्तीर्णतीर्थः परस्तात्॥

(सिद्धान्ततत्त्वविवेके, प्रथमभागे, त्रिप्रश्नाधिकारान्ते, ३ - ४ श्लोकमध्ये)

तत्रैव ग्रन्थे द्वितीयभागे मङ्गलाचरणक्रमे गुरुचरणकमलद्वन्द्वं स्मरति मिश्रमहोदयः -

प्रणम्यादावाद्यामखिलसुखदां विश्वजननीम्,
चिरं चित्त ध्यात्वाऽमितगुणगुरोरङ्घ्रिकमलम्।
अहं तद्बिम्बाद्याधिकृतिविषये भाष्यममलम्,
विदां प्रीत्यै कुर्वे गुरुपददयोद्योतितधिया॥

(सिद्धान्ततत्त्वविवेके, द्वितीयभागे, टीकाकारकृन्मङ्गलाचरणे)

पुनस्तत्रैव तृतीयभागे सूर्यग्रहणाधिकारे नतिसाधनप्रसङ्गे लाघवप्रकारेण श्रीमद्गुरुवरोक्तां वासनां प्रदर्श्य गुरुवराणां विषये एवं भावः प्रकटितः श्रीमिश्रेन -

कियन्ति पुण्यानि कृतानि तैरहो समाः कियत्यः परमं कृतं तपः।
वशीकृता गीः परयाऽर्चया नु किं यत्कल्पना मे गुरवः स्युरीदृशाः॥
दयालवो योगिमुनिस्वभावाः सदा सदध्यापनयातकालाः।
विश्वेश्वराराधनसक्तचित्ता जयन्ति नित्यं गुरवो मदीयाः॥

(सिद्धान्ततत्त्वविवेके, तृतीयभागे, लम्बनप्रकरणे, ५४ - ५६ श्लोकवासनायाम्)

अत्रैव सूर्यग्रहणाधिकारे श्रीमिश्रमहोदयः कथयति यद्यथाऽयनवलनद्वारा भास्कराचार्यैरुत्क्रम-ज्यानिराकरणमुक्तं तथैव पूज्यचरणैर्मद्गुरुभिः श्रीगेनालालचातुर्धरिकैराक्षवलनद्वारा तन्निराकरण-प्रकारोऽभिनवः उदीरितः। तदत्रोपन्यस्यते -

द्युज्यावृत्तापवृत्तैक्ये विन्यस्ताद्रविमण्डलात्।
आयने वलने यद्वत्तथाऽऽक्षे न कथं भवेत्॥

(सिद्धान्ततत्त्वविवेके, तृतीयभागे, वलनप्रकरणे, २८६ - २९० श्लोकवासनायाम्)

तत्र मन्येऽव्यक्तद्वयघाताङ्कपतनाद्भास्करेणाक्षवलनद्वारा तथा नोक्तं परञ्च गुरुवर्यैः तत्साधनं सम्यग्विहितमिति गुरुवर्याणां खगोलज्ञाननैपुण्यमतीव चमत्कारपूर्णमासीत्।

एवमेव सूर्यग्रहणाधिकारे वित्रिभलग्नभ्रमणनिरूपणप्रसङ्गे श्रीमिश्रमहोदयो गुरूपदिष्टां वासनां सश्रद्धं निरूपयति। तथाहि -

त्रिभोनलग्नभ्रमजो विचारो गुरूपदेशेन निवेशितोऽत्र।
सुगद्यबद्धः सुखबोधहेतोः संक्षेपतो ज्ञैः सकलं विलोक्यम्॥
शास्त्रानुरागाद्विषयागमाग्रहादेवं सुधीभिर्बहुशः प्रकाराः।
विभावनीया हृदि रक्षणीयास्ततो यशः स्यान्नियतं नराणाम्॥

(सिद्धान्ततत्त्वविवेके, तृतीयभागे, वित्रिभलग्नभ्रमणनिरूपणोपसंहारे)

एवमेवोपर्युक्तविषयाणां सम्यगवलोकनेनेदं स्फुटं प्रतिभाति यच्छ्रीमद्गेनालालगुरुवर्याणां ज्यौतिषशास्त्रस्य विकासे प्रचारे-प्रसारे च महत्त्वपूर्णं योगदानं विद्यते। न केवलं बिहारेऽपितु समग्रेऽपि देशस्य पूर्वोत्तरभागे नेपालसहिते एतेषां विद्वद्वराणां शिष्योपशिष्यपरम्परा सुसमृद्धा इदानीमपि विद्यतेऽग्रेऽपि स्थास्यतीत्यलम्।

१८७२ ख्रीष्टाब्दे
आविर्भावः

१९४६ ख्रीष्टाब्दे
तिरोभावः

।। ज्यौतिषरत्न पण्डितगेनालालचौधरीमहाभागाः ।।

"गुरुवन्दना"

गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः । गुरुरेव परंब्रह्म तस्मै श्रीगुरवे नमः ॥

**

ध्यान मूलं गुरु मूर्ति पूजा मूलं गुरु पद्म । मंत्र मूलं गुरु वाक्यं मोक्ष मूलं गुरु कृपा ।।

**

ब्रह्मानंदं परमसुखदं केवलं ज्ञानमूर्तिम् । द्वंद्वातीतं गगनसदृशं तत्वमस्यादिलक्ष्यम् ।
एकं नित्यं विमलमचलं सर्वधीसाक्षीभूतम् । भवातीतं त्रिगुणरहितं सद्गुरुं तं नमामि ॥

**

अखण्डमण्डलाकारं व्याप्तं येन चराचरम् । तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥

**

स्थावरं जंगमं व्याप्तं यत्किंचित्सचराचरम् । तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः॥

**

मन्नाथः श्रीजगन्नाथो मद्गुरुस्त्रिजगद्गुरुः । ममात्मा सर्वभूतात्मा तस्मै श्रीगुरवे नमः ।।

**

न गुरोरधिकं तत्त्वं न गुरोरधिकं तपः । तत्त्वज्ञानात्परं नास्ति तस्मै श्रीगुरवे नमः ॥

लखनऊपरिसरीय-ज्योतिष-विभागस्य गतिविधयः

उत्तरप्रदेशस्य राजधान्यां लखनऊ (लक्ष्मणपुरी)नामके नगरे अवस्थितोऽयं राष्ट्रिय-संस्कृत- संस्थानस्य लखनऊ-परिसरः स्वस्थापनादिवसात् (२ अगस्त १९८६ दिनाङ्कात्) भारतीयां संस्कृतिमभिरक्षयन् संस्कृत प्रचार- प्रसारादिषु क्षेत्रेषु महदवदानं कुर्वन् महानगरे अवस्थितोऽपि दशएकड़ परिमितेन क्षेत्रफलेन गोमतीनद्याः तटे विलसन् सज्जनानाकर्षयन् संस्कृतच्छात्राणां मनोकामनां पूरयन् निरन्तरमग्रे सरो वर्तते ।

अस्मिन् परिसरे १९९५ तमस्य ख्रिास्ताब्दस्य दिसम्बरमासे श्रीमताम् आचार्यसर्वनारायणझा-महोदयानामागमनेन ज्योतिष-विभागस्यारम्भः सञ्जातः। एतेषां कार्यकालः दिसम्बर १९९५ तः मई २०११ यावत् आसीत्। एतेषामागमनानन्तरं ज्योतिषशास्त्रस्य सम्यक् प्रचारः प्रसारश्च सञ्जातः। बहवः छात्राः ज्योतिषाचार्योपाधिं विद्यावारिध्युपाधिञ्च सम्प्राप्य देशस्य विभिन्नेषु प्रभागेषु ज्योतिषशास्त्रस्य प्रचार प्रसारादिकर्मणि शास्त्राध्यापनादिकर्मणि च संलग्नाः विद्यन्ते । इमे अद्यत्वे श्रीकामेश्वरसिंहदरभङ्गाविश्वविद्यालयस्य कुलपतिपदमलङ्कुर्वन्ति।

संस्थानस्य लखनऊ-परिसरेऽस्मिन् फलितज्योतिषस्य गणितज्योतिषस्य च सम्यक् अध्यापनं भवति। द्वयोः विभागयोः मेधाविनः छात्राः अध्ययन-लेखनादिकर्मसु अग्रसराः वर्तन्ते। सिद्धान्तज्योतिषशास्त्रस्य सविधि-अध्ययन-अध्यापन-निमित्तमाधुनिकयन्त्राणां सङ्कलनाय प्रस्तावः मुख्यालये प्रेषितो विद्यते। तेषु दूरवीक्षणयन्त्रम् (२०१६-१७)सत्रे ज्योतिषविभागेन सम्प्राप्तम्। अनेन यन्त्रमाध्यमेन छात्राः अध्यापकाश्च ग्रह-नक्षत्रैश्च वेधविधिना परिचिताः भवन्ति।

सत्रेऽस्मिन् विभागीयाचार्याणां नामानि -

अस्मिन् सत्रे लखनऊपरिसरे ज्योतिषविभागे पञ्च अध्यापकाः आसन्। तेषु विभागस्य वरिष्ठसहायकाचार्यः डॉ.अमितकुमारशुक्लः 27 फरवरी 2020 दिनाङ्के श्रीसम्पूर्णानन्दसंस्कृतविश्व-विद्यालये समायोजितायाम् आचार्यपदस्य अन्तर्वीक्षायां चयनितः सञ्जातः। अद्यत्वे अवशिष्टाः चत्वारः अध्यापकाः परिसरस्य ज्योतिषविभागे स्व-स्व दायित्वनिर्वहणे सन्नद्धाः सन्ति। तेषां नामानि तथा परिसरेऽस्मिन् कार्यभारग्रहणतिथिः-

नाम	पदम्		परिसरेऽस्मिन् कार्यभारग्रहणतिथिः-
१. **प्रो. मदनमोहनपाठकः**	आचार्योऽध्यक्षश्च		०६ जून २०११ तः
२. **डॉ. उमेशकुमारपाण्डेयः**	सहायकाचार्यः	(संविदा)	२१ जून २०११ तः
३. **डॉ. (श्रीमती) चन्द्रश्रीपाण्डेयः**	सहायकाचार्या	(संविदा)	०१ अगस्त २०१२ तः
४. **डॉ. नरेशशर्मा**	सहायकाचार्यः	(संविदा)	१८ सितम्बर २०१२ तः

अस्मिन् परिसरे ज्योतिषशास्त्रं पठितुं देशस्य विविधेभ्यः प्रान्तेभ्यः पिपठिषवः छात्राः अध्ययनं विधाय स्वीयं जीवनं सफलीकुर्वन्ति। ज्योतिषविभागे विषयद्वयोः फलित-गणितयोः सम्यक् अध्यापनं विभागीयाध्यापकैः सोत्साहं क्रियते। यस्य प्रमाणस्वरूपं अत्रत्याश्छात्राः समग्रेऽपि भारते फलित-सिद्धान्तविभागद्वयोरपि परीक्षायां सर्वाधिकानङ्कानवाप्नुवन्ति। परिणामतः अत्रत्याश्छात्राः स्वर्णपदकमवाप्य परिसरस्य विशेषेण ज्योतिषविभागस्य कीर्तिकौमुदीमभिवर्धयन्ति। प्रसङ्गादिदानीं स्वर्णपदकप्राप्तवतां छात्राणां नामानि अत्रोपस्थाप्यन्ते।

क्र.सं.	**नाम**	**विषयः/कक्षा**	**सत्रम्**	**प्राप्तपदकनाम**
1.	अङ्कितशर्मा	फ.ज्यो. आचार्यः	2016-17	एस. जे. जिन्दलट्रस्टस्वर्णपदकम्
2.	श्रीमती रेणुजयसवाल	सि.ज्यो. आचार्यः	2016-17	एस. जे. जिन्दलट्रस्टस्वर्णपदकम्
3.	आनन्दप्रकाशपाठकः	सि.ज्यो. आचार्यः	2018-19	एस. जे. जिन्दलट्रस्टस्वर्णपदकम्

यद्यपि ज्योतिषं पठितुं छात्राणं संख्या स्वल्पीयसी भवति । तथापि अत्रत्याः छात्राः आचार्यकक्षोत्तीर्णतां सम्प्राप्य विविध-उद्योगद्वारा स्वीयं जीवनं यापयन्ति। केचन छात्राः शास्त्रेऽस्मिन्

शोधकार्यमपि कुर्वन्ति। अत्र प्रतिकक्षं छात्राणां संख्या निम्नलिखिताः विद्यन्ते । तद्यथा –

अस्मिन् (२०१९-२०) सत्रे छात्रसंख्या - (फलितज्योतिष-सिद्धान्तज्योतिष-विभागयोः)							आहत्य कुलसं.
कक्षा	फलितज्योतिषे			सिद्धान्तज्योतिषे			
लिङ्गम्	पु.	स्त्री.	**योगः**	पु.	स्त्री.	**योगः**	
प्राक्शास्त्री- 1	03	00	**03**	-	-	**-**	03
प्राक्शास्त्री- 2	08	00	**08**	-	-	**-**	08
शास्त्री- 1	06	00	**06**	03	00	**03**	09
शास्त्री- 2	08	00	**08**	01	01	**02**	10
शास्त्री- 3	02	00	**02**	03	00	**03**	05
आचार्यः-1	02	00	**02**	01	00	**01**	03
आचार्यः-2	05	00	**05**	-	-	**-**	05
विद्यावारिधि-							
							43

२०१३-१४ शिक्षासत्रतः विद्यावारिधि (शोध) छात्राणां विवरणम्-

शोधार्थी नाम शोध-पञ्जीयनसंख्या आधारसंख्या	**पञ्जीयन-दिनांकः**	**शोधशीर्षकः**	नियमितः/ स्वतन्त्रः	**मार्गदर्शक- नाम**
१.उमाकान्ततिवारी पं.सं.- १५६८४ आ.सं- ५१९१७७७८५५४२	१४ फर. २०१४ **शोधप्रबन्धसमर्पित** दि.-16/7/2019	शुभाशुभफलनिर्धारणे सामुद्रिकशास्त्रस्य प्रायोगिकमनुशीलनम्	स्वतन्त्रः	प्रो.मदनमोहन पाठकः
२.शैलेशकुमारतिवारी पं.सं.-१५७१० आ.सं.-४५६९१५१६२४	२५ फर. २०१४ **उपाधिप्राप्तः**	ज्योतिषशास्त्र दृष्ट्या मानसिकरोगस्य प्रायोगकिमध्यनम्	नियमितः	प्रो.मदनमोहन पाठकः
३.अभयत्रिपाठी पं.सं. १६७९७ आ.सं.-९००९६४६६९०७६	२९ दिस.२०१४	मयमत-समरांगणसूत्र-धारयोः देवालयसन्दर्भे तुलनात्मकमध्ययनम्	स्वतन्त्रः	डा.अमितकुमार शुक्लः

४. कु. चित्राश्रीवास्तव पं. सं.-१६७९९ आ.सं.- ६०५९८३०३१५४१	२९ अप्रै.२०१४ **शोधप्रबन्धसमर्पित**	प्रशासकीययोगानां ज्योतिषशास्त्रदृष्ट्या अध्ययनम्	नियमितः	डा.अमितकुमारशुक्लः
५. सुधीरकुमारत्रिवेदी पं.सं.-१७१२३ आ.सं.-	०१ जन.२०१५	डा.गोस्वामिबलभद्र- प्रसादशास्त्रि कृत् सिन्धुराजवधम् इति महाकाव्यस्य समीक्षात्मकमध्ययनम्	स्वतन्त्रः	प्रो.मदनमोहन पाठकः
६. शत्रुघ्नपाण्डेयः पं.सं.- १८३९५ आ.सं.-२२३७४८०७६११४	२० जन.२०१५	ज्योतिषशास्त्रोक्तानाम् अरिष्टयोगानां विश्लेषणात्मकमध्ययनम्	नियमितः	डा.अमितकुमारशुक्लः
७. सरिता शुक्ला पं.सं. १७११५ आ.सं.	१ जन. २०१५	डा. प्रशस्यमित्रशास्त्रिणः कथासाहित्यिक समीक्षात्मक- मध्ययनम्	नियमितः	डा. अमितकुमारशुक्लः
८. वैङ्कटेश्वरपाण्डेयः पं.सं.- ४३२ आ.सं. ७८७६३०६४७९०२	२१ सित.२०१७	आदितस्त्रिप्रश्नाधि- कारपर्यन्तं सूर्यसिद्धान्तस्य समीक्षात्मकमध्ययनम्	नियमितः	प्रो. मदनमोहनपाठकः
९. सन्तोषपाठकः पं.सं. आ.सं. ५३००८७६६२०८३	२१ सित. २०१७	कमलाकरभटदृष्ट्या सूर्य- चन्द्रग्रहणयोस्तुलना त्मकमध्ययनम्	नियमितः	प्रो. मदनमोहनपाठकः
१०. अभयकुमारपाण्डेयः पं.सं. आ.सं. ५३००८७६६२०८३	१० अगस्त २०१७	कृषिपराशरस्य समीक्षात्मकमध्ययनम्	नियमितः	प्रो. मदनमोहनपाठकः
११. अमितकुमारमिश्रः पं.सं. आ.सं. ३४००३९२६७१८७	०७ अगस्त २०१७	जन्माङ्गचक्रे विदेशगमनयोगानां सर्वेक्षणात्मकमध्ययनम्	नियमितः	प्रो. मदनमोहनपाठकः

भास्कराचार्यपरिषद्-

छात्राणां सर्वमुखीविकासाय विभागेऽस्मिन् प्राध्यापकानां छात्राणाञ्च मनोयोगेन भास्कराचार्यपरिषदः परिकल्पना कृता विद्यते। यस्यां परिषदि मासे पूर्वसूचनानुसारं वारद्वयं छात्राः अध्यापकानां निर्देशने एकत्र सम्भूय भाषणादिना स्वाधीतस्य विषयस्य परिमार्जनं कुर्वन्ति। अस्यां परिषदि विभागीयाध्यापकानामपि क्रमशः व्याख्यानं भवति । अनेनापि छात्राः लाभान्विताः भवन्ति।

ज्योतिषपरिचयपाठ्यक्रमस्य उद्घाटनम्-

सर्वसामान्याः जनाः अपि ज्योतिषशास्त्रं जानीयुस्तदर्थं त्रैमासिकज्योतिषपरिचयपाठ्य-क्रमस्य आयोजनं प्रतिसत्रं प्रचलति। सत्रेऽस्मिन् 20 नवम्बर 2019 दिनाङ्के कार्यक्रमस्य **(पञ्चदशचक्रस्य)** शुभारम्भः सञ्जातः। अस्य ज्योतिषपरिचयपाठ्यक्रमस्य **पञ्चदशचक्रे** जिज्ञासूनां संख्या षोडश (16) वर्तते। अस्य ज्योतिषपरिचयपाठ्यक्रमस्योद्घाटनसमारोहे परिसरस्य प्रभारिप्राचार्यैः प्रो. लोकमान्यमिश्रमहोदयैः सह राष्ट्रिय-संस्कृत-संस्थानस्य भोपालपरिसरस्य प्राचार्यचराः आचार्याः डॉ.आजादमिश्रमहोदयाः विभागीयाः सर्वेऽपि आचार्याः, परिसरस्य अन्यविभागीयाचार्याः समुपस्थिताः सन्तः अध्येतृवर्गेभ्यः ज्योतिषशास्त्रस्य माहात्म्यं समसामयिकताञ्च प्रबोधितवन्तः। अत्र कार्यक्रमेऽस्मिन् अध्येतृवर्गेषु सामान्याः नागरिकाः, बैंककर्मिणः, सुरक्षाकर्मिणः, चिकित्सकाः, अभियन्तारः, विभिन्न-विभागीयाधिकारिणः, विविधव्यवसायिनः, नेतृगणाः, पौरोहित्यकर्मरताः, मिडियाबान्धवाः अन्ये सामाजिकाश्च समुपस्थिताः आसन्। अस्य **पञ्चदशचक्रस्य** समापनं 06 मार्च 2020 दिनाङके सञ्जातम्। अयं कार्यक्रमः पूर्वनिर्धारितकालानुसारेणैव प्रतिसप्ताहं दिनत्रयं दिनचतुष्टयं वा सायं 5 वादनात् 6 वादनं यावत् प्रचलत्। अनेन कार्यक्रमेण बहवः छात्राः अध्येतारश्च लाभान्विताः सञ्जाताः।

अस्मिन् प्रचलिते 2019-20 सत्रस्यावसाने कोरोना-वायरस-महामारिप्रभावात् मार्चमासस्य 22 दिनाङ्के देशस्य प्रधानमन्त्रिणः श्रीनरेन्द्रमोदीमहोदयस्य आह्वानेन जनताकर्फ्यु, तथा 23 तः 25 दिनाङ्कं यावत् मुख्यमन्त्रिणः Lockdown समग्रे उत्तरप्रदेशे, तदनु अग्रे एकविंशति दिनानां कृते देशस्य प्रधानमन्त्रिणः श्रीनरेन्द्रमोदीमहोदयस्य आह्वानेन समग्रे देशे 14 अप्रैल 2020 दिनाङ्कं यावत् lock-down आसीत्। अस्मात्कारणात् वर्षेऽस्मिन् विभागे ज्योतिषसङ्गोष्ठी तथा विभागे विशिष्टं व्याख्यानञ्च न जातम्। ज्योतिषविभागीया त्रिकालद्योतिनी नामिका पत्रिका अपि नैव प्रकाशिता। छात्राणां सत्रेऽस्मिन् विशेषरूपेण पूर्णतया अध्ययनमपि न जातम्। तथापि .... ईश्वरेच्छा बलीयासी। इत्थं सर्वतोभावेन विकासोन्मुखः अयं ज्योतिषविभागः देव-द्विज-गुरुप्रसादात् सर्वथा अग्रसरो वर्तते इति शम् ।

संस्कृतसंरक्षणसम्वर्धनसम्बन्धिविभिन्नकार्यक्रमेषु सम्पादकस्यावदानम् - (शैक्षिकसत्रम्-२०१९-२०)

दिनाङ्कः	स्थानम्	कार्यक्रमः
०४ अप्रै. २०१९	काशीहिन्दूविश्वविद्यालयः वाराणसी	अखिलभारतीय-ज्योतिषशास्त्र-संगोष्ठी विषयः- वास्तुशास्त्रस्य दशा एवं दिशा
२५ अप्रै. तः ०९ मई २०१९ यावत् कार्यशालायां मम व्याख्यानं २९ अप्रै. २०१९ दिनाङ्के।	श्रीवैकुण्ठनाथपवहारीसंस्कृत-महाविद्यालय, देवरिया (उ.प्र.)	ज्योतिष-वास्तु-कर्मकाण्ड-विषयक-कार्यशालायां मुख्यवक्तृत्वेन व्याख्यानम्
०५ जून तः ०९ जून २०१९ यावत् सांस्कृतिककार्यक्रमः उद्बोधनम्- ९ जून २०१९	अघैलामिश्र, विजयीपुर, गोपालगंज, बिहार	अघैला-मिश्र-महोत्सवः
५ जुलाई २०१९	जूथालालसंस्कृतमहाविद्यालय, मझौलिया, प.चम्पारण, बिहार	शासी-निकाय-उपवेशने वि.वि.प्रतिनिधित्वेन अंशग्रहणम्
२६ अगस्त २०१९	श्रीहरिहरसंस्कृतमहाविद्यालयः बकुलहर, प.चम्पारण, बिहार	शासी-निकाय-उपवेशने वि.वि.प्रतिनिधित्वेन अंशग्रहणम्
२५ अक्तुबर २०१९	श्रीहरिहरसंस्कृतमहाविद्यालयः बकुलहर, प.चम्पारण, बिहार	शासी-निकाय-उपवेशने वि.वि.प्रतिनिधित्वेन अंशग्रहणम्
१५- २४ जनवरी २०२०	राष्ट्रियसंस्कृतसंस्थानम्, एकलव्यपरिसरः, अगरतला, त्रिपुरा	परीक्षाविभागीयगोपनीयकार्यम्
१८ फरवरी २०२०	कामेश्वरसिंहदरभङ्गासंस्कृत - विश्वविद्यालयः दरभङ्गा, बिहार	स्नातकोत्तरगवेषणापरिषद्

यात्रादिनीयं विधिः-

आग्निं हुत्वा देवतां पूजयित्वा नत्वा विप्रानर्चयित्वा दिगीशम्।
दत्वा दानं ब्रह्मणेभ्यो दिगीशं ध्यात्वा चित्ते भूमिपालोऽधिगच्छेत्।।

मुहूर्तचिन्तामणिः-११/८३

भास्करोदयपत्रिकायाः सप्तम-अङ्कस्य लोकार्पणम् :-

सप्तम -अङ्कस्य गरली -परिसरे लोकार्पणं कुर्वन्तः नवदेहलीस्थितस्य राष्ट्रियसंस्कृतसंस्थानस्य निदेशकचराः श्रीमन्तः डॉ.कमलाकान्तमिश्रमहोदयाः पार्श्वे सन्ति गरलीपरिसरस्य प्राचार्याः प्रो.सुरेन्द्रझामहोदयाः एवञ्च आचार्याः रामदेवझामहोदयाः, आचार्याः रामनारायणदासमहोदयाः, पत्रिकासम्पादकःडॉ.मदनमोहनपाठकश्च

दिनाङ्कः- २२ फरवरी २००९ स्थानम्- रा.सं.संस्थानम्, गरली-परिसरः

भास्करोदयपत्रिकायाः त्रयोदश-अङ्कस्य लोकार्पणम् :-

भास्करोदयपत्रिकायाः त्रयोदशअङ्कस्य लोकार्पणं कुर्वन्तः भारतसर्वकारस्य माननीयगृहमन्त्रिणः श्रीमन्तःराजनाथसिंहमहोदयाः, पार्श्वे विलसन्ति प्रो. शिशिरकुमारपाण्डेयः, डॉ. उमेशचन्द्रपाण्डेयः, प्रो. रामसागरमिश्रमहोदयाश्च

दिनाङ्कः - २२ नवम्बर २०१६ शनिवासरः, लखनऊ

भास्करोदयपत्रिकायाः चतुर्दश-अङ्कस्य लोकार्पणम् :-

भास्करोदयपत्रिकायाः चतुर्दश-अंकस्यं लोकार्पणं कुर्वन्तः विलसन्ति दक्षिणतः ICPR इति संस्थायाः निदेशिकाः डॉ. पूजाव्यासमहोदयाः, का.सिं.द.सं. विश्वविद्यालयस्य कुलपतयः प्रो. सर्वनारायणझामहोदयाः, प्रभारिप्राचार्याः प्रो. विजयकुमारजैनमहोदयाः, उ.प्र.शासनस्य विधिमन्त्रिणः मा. ब्रजेशपाठकमहोदयाः, परिसरस्य वरिष्टाचाष्टाचार्याः प्रो.शिशिरकुमारपाण्डेयमहोदयाः पत्रिकासम्पादकाः प्रो. मदनमोहनपाठकमहोदयाश्च।

दिनाङ्कः - ०८ अप्रैल २०१७ शनिवासरः, लखनऊ

गोवंशस्य परिरक्षणं कुरु। राष्ट्रस्य परिवर्धनं कुरु।।

भास्करोदयनामिकायाः ज्योतिष-शोधपत्रिकायाः विगताङ्काः-

ISSN No.:2278-0815